Barcode : 1990010087912
Title - samgitaratnakara 1
Author - PT S. SUBRAHMANYA SASTRI
Language - sanskrit
Pages - 443
Publication Year - 1960
Barcode EAN.UCC-13
1 990010 087912

The Adyar Library Series No 30

GENERAL EDITOR

G SRINIVASA MURTI, B A , B L , M B & C M. VAIDYARATNA

Director, Adyar Library

SANGĪTARATNĀKARA OF S'ĀRNGADEVA

WITH TWO COMMENTARIES

Vol. I—Adhyāya I

SAṄGĪTARATNĀKARA

OF

S'ĀRNGADEVA

WITH

KALĀNIDHI OF KALLINĀTHA AND
SUDHĀKARA OF SIMHABHŪPĀLA

EDITED BY

PANDIT S SUBRAHMANYA SASTRI

Vol. I—Adhyāya I

THE ADYAR LIBRARY

1943

Printed by
C SUBBARAYUDU,
AT THE VASANTA PRESS,
ADYAR, MADRAS

INTRODUCTION

In introducing the first volume of S'ārngadeva's Sangītaratnākara, containing the first adhyāya, along with the two commentaries, namely, Kallinātha's Kalānidhi and Simhabhūpāla's Sudhākara, my first duty is to record the gratitude of the Adyar Library to that great scholar, the late Pandit S Subrahmanya Sastri, who undertook the edition of this important work He had corrected the entire material for all the seven adhyāyas of the work for the press and the first adhyāya was completely printed before his death In the normal course, this Introduction would have come from his pen Having regard to his solid erudition, his profound knowledge of music both on the practical and the theoretical side, his wide reading, his deep insight into subjects allied to music like dancing, I must confess that the present Introduction is only a poor substitute for what could have been expected from him

The Sangītaratnākara of S'ārngadeva is one of the most important works on music now available It is besides, one of the longest works on music in Sanskrit It is a very comprehensive exposition of the subject, dealing with all aspects Ever since it was written it has remained the standard work on music, it has been

drawn upon profusely, as authority, by all subsequent writers on the subject Perhaps it has superseded many earlier works and obscured them, and they have disappeared from the field But it has never been superseded till now

A complete edition of the work was undertaken by Kalivara Vedāntavāgis'a and S'ārada Prasāda Ghosha from Calcutta with the commentary of Simhabhūpāla some time back, and the first volume containing the Svarādhyāya was published in 1879 from the New Arya Press, Calcutta [1] In the Preface to that edition[2], it had been promised that the remaining portions too would be published, but it does not seem that any further progress had been made in that direction At that time they had access only to a very defective copy of the commentary of Kallinātha, which, as they say, was "very unintelligible, owing to numerous clerical mistakes" [3] As for Simhabhūpāla's commentary appearing in this edition, there is no indication of the source of the manuscripts The Preface does not mention the point at all Evidently they must have had access to a complete copy, since they had projected a complete edition The manuscripts known to us and utilised for this edition will be noticed in the course of this introduction

The text of Sangītaratnākara with the commentary of Kallinātha has been edited in the Anandasrama

[1] The book has become very rare and difficult to obtain

[2] p ii

[3] p iv

Sanskrit Series as No 35 in 1896[1] In preparing this present edition, Pandit Subrahmanya Sastri has made use of both the editions The text has been compared with manuscripts available in the various libraries in and near Madras and the commentary of Kallinātha has been compared with the manuscript in the Tanjore Palace Library[2] The printed editions have been carefully compared with these manuscripts and the readings have been improved

The plan was to add an English translation of the text at the end of each volume for the portion contained in it It is very unfortunate that the late Pandit Subrahmanya Sastri was not able to prepare the translation That work has devolved on me, along with the responsibility to see through the press the matter for the later portions which he had got ready The English translation for the first adhyāya is ready The delay in issuing this first volume, which had been printed more than a year ago, is due to the time taken for getting the English translation ready At this stage, the problem of printing-paper became a very acute one and it is not found possible at present to print the English translation Therefore the first volume containing the first adhyāya is being issued, along with the commentaries and also appendices The second and the third adhyāyas have been printed and the printing of the fourth adhyāya has begun and the second volume containing these three adhyāyas

[1] In two volumes

[2] Descriptive Catalogue, Vol XVI, No 10749

will appear very soon Unfortunately we have to hold up printing any further matter on account of difficulty in securing the needed paper It is proposed to publish the remaining portion in a few convenient volumes and the English translation will appear in a separate volume for the entire text

The appendices added in this volume from page 293 illustrate certain details given in the text Of these the Svaraprastāras from page 297 and the next one on p 394 are given at the end of the whole work in the Anandasrama edition, since the matter relates to the first adhyāya, it is given at the end of this volume containing the adhyāya It is hoped that these and the other appendices which were prepared by Pandit Subrahmanya Sastri, and the index of half verses will be of help to the readers in making use of the book

As is well known, the Sangītaratnākara is divided into seven adhyāyas dealing with

1	Svara	4	Prabandha	7	Nrtya
2	Rāga	5	Tāla		
3.	Prakīrnaka	6	Vādya		

The first adhyāya containing the Svara is divided into eight sections, called prakaranas and they deal with

1 Padārthasangraha
2 Pindotpatti
3 Nāda - sthāna - s'ruti-svara-jāti-kula-daivata-rsi-chando-rasa
4. Grāma-murchanā-krama-tāna

5 Sādhārana
6 Varnālankāra
7. Jāti
8 Gīti

In the Calcutta edition,[1] the first of these prakaranas is called the Introductory section and the rest of the adhyāya is divided into seven sections In the Preface[2] there, the fifth section is called Sādhārana and the Varnālankāra is spoken of as the fourth, but in the text itself the order of these sections is as given in the present edition I am adding a detailed list of contents, which, it is hoped, will be of use to the readers to understand the whole subject matter at a glance

S'ārngadeva, the author of the Sangītaratnākara, gives some information about himself in the beginning of the work,[3] before he begins the summary of the work, in the first prakarana of the first adhyāya The first verse is a mangala Then he speaks of his family,[4] which traces its origin to Kashmere[5] The family goes back to the sage Vrsagana[6] In that family there was one Bhāskara,[7] who migrated to the south[8] His son

[1] Preface, p ii
[2] p iii
[3] Verses 2 14
[4] अस्ति स्वस्तिगृह वश verse 2
[5] श्रीमत्काश्मीरसभव *Ibid*
[6] ऋषेर्वृषगणाज्जात *Ibid*
[7] तत्राभूद्भास्करप्रख्य verse 4
[8] अलकर्तु दक्षिणाशा यश्चक्रे दक्षिणायनम् *Ibid*

was Sodhala[1] He was patronised by King Singhana[2] This is a king of the Yadava dynasty, who ruled in Deogiri (modern Doulatabad) from 1210 to 1247 A D[3] S'ārngadeva was the son of this Sodhala[4] He speaks about his own learning in detail[5]

Many commentaries are known to have been written on this work of S'ārngadeva The editors of the work from Calcutta say[6] that they have known of seven commentaries, of which four are in Sanskrit, one in Hindi and two in Telugu But they had seen only two of the Sanskrit commentaries (evidently those by Kallinātha and Simhabhūpāla) and the one in Hindi The late Dr M Krishnamacharyar mentions the following commentaries on it, in his Classical Sanskrit Literature[7] Simhabhūpāla, Kes'ava, Kallinātha, Hamsabhūpala, Chandrikā, and the Hindi commentary by Gangārāma Of these the commentaries by Simhabhūpāla and Kallinātha will be taken up for detailed consideration presently

The commentary by Kes'ava is called Kaustubha, according to Dr Krishnamacharyar[8] A commentary by Kes'ava is mentioned in the Sangītasudhā[9]

[1] तस्याभूत्तनय श्रीसोढल verse 5
[2] येन न्यधायि महती श्रीसिङ्घणे श्रीरपि *Ibid*
[3] s'aka 1132-1169
[4] तस्मात् . जात शार्ङ्गदेव verse 9
[5] verses 10 14
[6] Preface, p 4
[7] para 1004, page 853
[8] foot-note 2 on p 853
[9] Sangitasudhā of Govinda Diksita mentions Kes'ava's commentary in

एना स्फुटीकर्तुमिह प्रवृत्तौ यौ ब्राह्मणौ केशवकल्लिनाथौ ।

Edition of Music Academy, Madras, No 1, p 152, verse 408

of Govinda Dīkshita,[1] which is published by the Music Acadamy Madras[2] For the commentary of Hamsabhūpāla, Dr Krishnamacharyar gives no reference This must be the commentary mentioned in the Catalogue of Sanskrit Manuscripts from Gujerat, Karachi, Sindh and Kandesh[3] Evidently this is a mistake for Simhabhūpāla For the commentary by Kumbhakarna, there is not enough evidence[4] For Chandrikā also Dr Krishnamacharyar gives no reference and simply says that it is anonymous[5] Dr V Raghavan says that he has information that there are two commentaries, one called Kaustubha and another only a paraphrase of the text[6] According to Dr Krishnamacharyar, Kaustubha

[1] This is given as by King Raghunātha of Tanjore, in the colophon, but Govinda Dikṣita's son Venkatamakhin says that the work was by his father in the following verses of his Caturdandiprakāśikā

चेव्वयाच्युतभूपालरघुनाथनृपाङ्किते ।
अस्मत्तातकृते ग्रन्थे प्रोक्तम् , श्लोकान् लिखामि तान् ॥

p 14, verses 154

in the edition of the Music Academy, Madras, No 3 The verses quoted are found on p 155, verses 440 443 in the edition of the Music Academy, Madras

[2] No 1

[3] p 274

[4] Dr V Raghavan also mentions this commentary in the Journal of the Music Academy, Madras, Vol iv, p 18 In this article he mainly gives the information he had himself gathered in his researches, but he records also what information he had received from others This is a point of the latter variety

[5] Foot-note 4 on p 853 Oppert mention this as No 6258

[6] Journal of the Music Academy, Madras, Vol iv, p 19

seems to be the work of Kes'ava[1] The commentary in Hindi is by Gangārāma, of which there is a good manuscript in the Tanjore Palace Library[2] A Tamil translation of the work also is available in the Tanjore Palace Library[3]

Of the two important commentaries, those by Kallinātha and Simhabhūpāla, the commentary of Simhabhūpāla is earlier Simhabhūpāla belongs to the Recherla dynasty His father was Anapota, who had a younger brother called Mada They built up a strong kingdom and they divided the kingdom between themselves, the northern part going to Anapota with the capital at Rajukonda and the southern part to Mada with the capital at Devarakonda[4] Anapota had two sons, Devagiris'vara was the elder, who must have died young since it is Simhabhūpāla who succeeded Anapota[5] About Simhabhūpāla there is enough material available in his own works In the commentary on Sangītaratnākara itself, there is not much information available He simply says that he has discussed the matter with scholars well-versed in

[1] See foot-note 8 on p X

[2] Descriptive Catalogue, Vol XVI, No 10754

[3] Tamil Catalogue by L Olaganatha Pillai, No 634, *b*

[4] See Velugotivārī Vams'āvali, edited by Dr N Venkata Ramanayya, No 6, Bulletin of the Department of Indian History, University of Madras, p 13 for this information For names Anapota and Mada see note 6 on p XIV below

[5] This is not mentioned in the book referred to in the note just above, but see note 12 on p XIV. below

the science of music[1] He adds that he has studied all the subjects also[2] But he has written other works which are now available in print

A great Alankāra work called Rasārnavasudhākara by Simhabhūpāla has been published in the Trivandrum Sanskrit Series by the late Mahāmahopādhyāya Dr T Ganapati Sastri as No 50 in 1916 Here there is a long introductory portion[3] where the author gives much information about himself There is the caste born of the feet of Visnu (the Sūdra caste)[4] Belonging to that caste there is the dynasty of Recalla where there was the king named Dacana[5] He defeated the Pāndya king,[6] and he had the Title of Khadga-nārāyana[7] His wife was Vocamāmbā[8] who belonged to the Tāmarasa dynasty[9] They had three sons,[10]

[1] सगीतागमसारविद्भिरखिलै सार्धं विचार्य स्फुटम् verse 9 in the commencement of his commentary

[2] विद्याजातविशारद *Ibid*

[3] verse 1-44

[4] तस्य (विष्णो) पादाम्बुजाज्जातो वर्ण verse 4

[5] तत्र रेचल्लवशाब्धिशरद्राकासुधाकर ।
कलानिधिरुदारश्रीरासीद् दाचननायक ॥ verse 5 The name of the dynasty is *recerla* and *lla* in the printed edition must be a mistake for *rlla*

[6] यस्यासिधारामार्गेण दुर्गेणापि रणाङ्गणे ।
पाण्डयराजगजानीकाज्जयलक्ष्मीरुपागता ॥ verse 6

[7] खड्गनारायणे यस्मिन् verse 7

[8] तस्य भार्या महाभाग्या . वोचमाम्बा गुणोदारा verse 8

[9] जाता तामरसान्वयात *Ibid*

[10] तयोरभूवन् पुत्रास्त्रय verse 9

S'inga Prabhu, Vennama Nayaka, and Reca [1] S'inga became the king[2] after the death of Dacana His brother Reca had a son named Nāgaya Nāyaka[3] who had the Title of Kuthārirāya[4] and who was also called Rāhuttarāya[5] S'inga Prabhu had two sons named Ananta and Mādhava[6] This Mādhava had many sons[7] of whom Vedagirīndra was the eldest[8] The elder brother of Madhava, namely, Ananta became known as Anapota also[9] His wife was Annamāmbā[10] They had two sons,[11] the elder was Devagirīs'vara[12] and the second was Singabhūpati[13] He lived in his anscestral city of Rājācala[14] His kingdom lay between the Vidhya mountains and the S'rīs'aila[15]

[1] शिङ्गप्रभुर्वेन्नमनायकश्च वीराग्रणी रेचमहीपतिश्च verse 9

[2] तत्र शिङ्गमहीपाले पालयत्यखिला महीम् verse 11

[3] श्रीमान् रेचमहीपति . लब्ध्वा पुत्र नागयनायकम् verse 14

[4] लब्धकुठारिरायबिरुदम् *Ibid*

[5] राहुत्तरायाङ्कितम् *Ibid*

[6] अनन्तमाधवौ यस्य तनूजौ verse 15 They are Anapota and Mada referred to in note 4 on p XII above

[7] तत्रानुजो माधवनामकेन्द्र यस्याभवन् वशकरा नरेन्द्रास्तनूभवा verse 16

[8] तनूभवा वेदगिरीन्द्रसुख्या *Ibid*

[9] तस्याग्रजन्मा भुवि राजदोषैरप्रोतभावादनपोतसञ्ज्ञा दधाति verse 17

[10] अन्नमाम्बेति विख्याता तस्यासीद्धरणीपते देवी verse 24

[11] तयोरभूता पुत्रौ द्वौ verse 26

[12] आद्यो देवगिरीश्वर *Ibid*

[13] द्वितीयस्त्वद्वितीयोऽसौ यशसा सिङ्गभूपति *Ibid* His date is towards the close of the 14th century A D

[14] राजा स राजाचलनामधेयामध्यास्य वशक्रमराजधानीम् verse 41

[15] विन्ध्यश्रीशैलमध्यक्ष्मामण्डल पालयन् verse 42

Another work of Simhabhūpāla is Kuvalayāvalī or Ratnapāñcālikā, published in the Trivandrum Sanskrit Series by Dr L A Ravi Varma as No 146 in 1941 This is a small drama in four Acts In the Prologue the author is mentioned as S'rī S'ingabhūpāla,[1] otherwise known as Khadganārāyana[2] who lived at the capital city named Rājas'aila[3] His mother was Annamātā[4] It is also stated there that one Vis'ves'vara had spoken very highly of his poetry[5] The Vis'ves'vara mentioned in the Prologue must be the author of Camatkāracandrikā, in the colophon of this work there is the mention of Simhabhūpāla[6]

There is a Telugu work called Velugotivārivams'āvali[7] In the Introduction to that work, Dr Venkata Ramanayya deals with Simhabhūpāla on pages 13 ff.

[1] श्रीमता श्रीशिङ्गभूपालेन प्रणीताम् p 2, ll 9, 10

[2] खड्गनारायणेन p 2 l 8 His grandfather too had this Title. See note 7 on p XIII above Perhaps this is a Family Title

[3] राजशैलाभिधाना राजधानीम् p 1, last line

[4] श्रीयन्नमातात्मज p 2, verse 4 In his other work the name is Annamāmbā See note 10 on p XIV above If अन्नमातृ=अन्नमाम्बा, the form ought to be अन्नमात्रात्मज, perhaps the word is अन्नमाम्बात्मज

[5] अहो साहित्यसौभाग्य श्रीशिङ्गधरणीपते ।
श्लाघायै यस्य सन्नद्धा विश्वेश्वरसरस्वती ॥ p 2, verse 3

[6] The colophon mentions Simhabhūpāla as a patron of Vis'ves'vara The colophon is इति सरससाहित्यचातुरीधुरीण श्रीविश्वेश्वरकविचन्द्रप्रणीताया श्रीसिंहभूपालकीर्तिसुधासारशीतलाया चमत्कारचन्द्रिकायान् etc Government Oriental Manuscripts Library, Madras, R 2679 and India Office, Eggeling 3966

[7] See note 4 on p XII above

Simhabhūpāla is a versatile scholar and a profuse writer Apart from his Kuvalayāvalī and Rasārnavasudhākara, both published in the Trivandrum Sanskrit Series, he must have written many other works In the Rasārnavasudhākara, he mentions a work called Kandarpasambhava as his own composition [1] In the whole of this Rasārnavasudhākara, he quotes from his own works about twenty five verses in illustration of various statements he makes, with the remark, *yathā mamaiva.* A few of them are traçable to his Kuvalayāvalī as is mentioned in the Preface to that Drama in the Trivandrum Sanskrit Series We have as yet no information about the other verses quoted from his works

In Aufrecht's Catalogus Catalogorum, there is an entry of Nātakaparibhāsā as a work of Singadharanīsena The entry is made on p 284 as found in Buhler's Report and on p 791 as found in the India Office The manuscripts in the India Office are described by Eggeling under Nos. 1201 and 1202. Evidently the author is Singadharanīs'a and Singadharanīsena must be the Intrumental Singular form with sa for s'a [2] It is not a separate work, it is only a part of Simhabhūpāla's Rasārnavasudhākara beginning from verse 290 on p 298

There is no reason to believe that the Rasārnavasudhākara was written by Vis'ves'vara on the ground that

[1] He says यथा कन्दर्पसभवे ममैव—

उभे तदानीमुभयोस्तु चित्ते कदुष्णनि श्वासचरिष्णुकेन ।
एकीकरिष्यन्ननुरागशिल्पी रागोष्मणैव द्रवतामनैषीत् ॥

P 151, under verse 112.

[2] Eggeling gives the name as Singadharanīs'a

in Camatkāracandrikā, Vis'ves'vara refers to Rasārnava-sudhākara for details[1] It is becoming a fashion now a days to refer all works bearing the name of a king to some court poet or court pandit Unless there is definite evidence as in the case of Sangītasudhā assigned to king Raghunātha and mentioned as by Govinda Dīksita by his son Venkatamakhin[2], we have to accept that the king himself wrote these works The kings in ancient and even in medieval India were not mere figure-heads in administration, nor were they mere administrators They were the true representatives of the civilization of the country In intellectual equipments, in cultural accomplishments and in every aspect of their lives, they represented the civilization in its ideal form They maintained Dharma, which is another word for civilization, they lived according to Dharma also Besides being warriors, conquerors and rulers, they were learned scholars, poets, philosophers and authors, and patrons of learning and arts They recognized only an Indian Dharma or civilization without any racial prejudices Simhabhūpāla himself says that he belonged to the lowest caste[3], at the same time he honoured the Brahmins and protected religion Neither caste distinction nor sectarian differences interfered with the unity of culture under the rule of those great Indian kings

[1] Cf Dr M Krishnamacharyar's Classical Sanskrit Literature, para 879, p 771

[2] See note 1 on p XI above

[3] See note 4 on p XIII above

Dr M Krishnamacharyar says that Simhabhūpāla who wrote the commentary on the Sangītaratnākara is different from the author of Rasārnavasudhākara[1] He does not give any explanation It is true that while he gives an elaborate description of his ancestry in the introductory portion of the Rasārnavasudhākara, he gives little information about himself in his commentary This must be due to the fact that he wrote the commentary after he wrote the Rasārnavasudhākara It is not possible at this stage to investigate the point on the basis of any internal evidence I must wait for that till the whole of the commentary is published But the colophon in the two works proves the identity of the authors beyond any doubt[2] The question of a work called Nātakaparibhāsa, the question of Rasārnavasudhākara having been written by another person who was a favourite in the court and the question of the authors of the two works being different—such questions should not have been raised, and if the points had been properly investigated such doubts would not have been raised But since they are found in works well known and relied on by many, it has become necessary for me to investigate the points and make certain remarks on them

[1] See Classical Sanskrit Literature, footnote 1, p 853

[2] The colophon in Rasārnavasudhākara read as follows

इति श्रीमदन्ध्रमण्डलाधीश्वरप्रतिगण्डभैरवश्रीयनपोतनरेन्द्रनन्दनभुजबलभीमश्री-शिङ्गभूपालविरचिते रसार्णवसुधाकरनाम्नि etc

This may be compared with the colophon at the end of the first chapter of the commentary Further the identity of the names सुधाकर in both works too point out to the identity of the authors

Three manuscripts of Simhabhūpāla's commentary on the Sangītaratnākara have come to our notice. One is in the collection at the Fort at Bikaner and we were able to secure a transcript of it[1] There is another work in the Oriental Library at Baroda and for this also, we were able to have a transcript[2] The third is in the Bhandarkar Research Institute, Poona[3] It is found that this last manuscript consists of a few stray leaves and so we did not utilise it Another manuscript is known to exist in Kashmere[4] We tried very much to secure a loan or a transcript of it But we are informed that the manuscript is not available there

Kallinātha also gives some information about himself in the introductory portion of his commentary[5] He speaks about the Karnāṭaka country[6] with the Kāverī and the Krsnā on the south and the north of the country,[7] which extends to the eastern and the western coasts[8] Here on the banks of the

[1] Simhabhūpāla's commentary is not noticed in Rajendralal Mitra's Catalogue No 1120 there is a part of Kallinātha's commentary A new and complete Catalogue is under preparation But the numbers have not been finally assigned and as such no number is given here for the Manuscript

[2] The Catalogue has not yet been printed

[3] Descriptive Catalogue, Vol XII, No 327

[4] The MS is not noticed in any catalogue But its existence in the Raghunath Temple, Srinagar is known through private information

[5] Verses 5 14 in the commencement of the commentary

[6] आस्ते कर्णाटदेश verse 5

[7] कावेरीकृष्णवेणीतरलतरतरङ्गार्द्रदक्षोत्तरास *Ibid*

[8] हृष्ट सश्लिष्य पूर्वापरनिजवपुषा प्राच्यपाश्चात्यवेले *Ibid*

Tungabhadrā there is the city called Vidyānagarī (Vijayanagar)[1] where there ruled the king Devarāya, son of Vijaya of the Yadava dynasty[2] Devarāya's son was Immadi Devarāya[3] Kallinātha lived there at that time[4] His grand-father was Vallabhadeva,[5] his mother was Nārāyanī[6] and father Laksmīdhara[7] He belonged to the S'āndilya Gotra[8] Under the orders of the king, he commented on the Sangītaratnākara[9]

Vijaya I, mentioned by Kallinātha reigned from 1418 to 1423, his son Devaraya II reigned from 1423 to 1446[10] Immadi Devarāya reigned from 1446 to 1465 Thus Kallinātha must have lived in the second half of the fifteenth century

[1] पुरीह विद्यानगरी चकास्ति तुङ्गातरङ्गैरभित पवित्रा verse 6

[2] एता शास्ति प्रौढ श्रीदेवरायो विजयनृपसुतो यादवाना वरेण्य verse 7

[3] तस्यास्ति पुत्र . इम्मिडिदेवराय verse 8

[4] सुधर्मेव सभा यस्य verse 9 and तस्यामस्ति कल्लिनाथार्यवर्य verse 10

[5] वल्लभेश्वरदेवो हि यस्य साक्षात् पितामहः verse 11 Anandasrama edition reads the name as तुत्तुलेश्वरदेव

[6] माता नारायणी यस्य verse 12

[7] पिता लक्ष्मीधर स्वयम् *Ibid*

[8] शाण्डिल्यगोत्रजः सोऽयम् *Ibid*

[9] तमाह कल्लिनाथार्य स राजा बहुमानत ।
रत्नाकर व्याकुरुष्व लक्ष्यलक्षणकोविद ॥ verse 13
अत· स कल्लिनाथार्यो रत्नाकरनिबन्धनम् ।
कलानिधि निबध्नाति ।. verses 14

[10] Inscriptions about Vijaya are available from 1418 1426, but Devarāya began to reign from 1423 So there must have been a joint rule by father and son for three years

S'ārngadeva the author of the Sangītaratnākara mentions many previous writers on the subject in verses 15 to 19 in the first prakarana of the first adhyaya. Of these authorities, some are very well known A detailed notice of them will be more appropriate when the whole book is out He must have eclipsed most of them He styles himself as Nis's'anka, "free from doubts" He also refers to himself as Karanāgranīh, which shows that he was the accountant-general of his king. Thus the author of the original was a high official in the service of the king, the commentator Kallinātha was a prominent figure in the royal court, held in high esteem by the king, the other commentator is a king This shows what a close relation there existed between the government and the culture of the country

The Adyar Library has already published two works on Music, the Melarāgamālikā of Mahāvaidyanātha S'ivan and the Sangrahacūdāmani which were both edited by the late Pandit S Subrahmanya Sastri and which appeared as Nos 16 and 17 in the Adyar Library Series The Rāgavibodha of Somanātha is already available in more than one edition and there is also an English translation. But the book is known to be out of print The Adyar Library has already started printing a fresh edition of the work prepared by the late Pandit S. Subrahmanya Sastri, where he has been able to improve the readings in many places This edition will be out very soon

The plan of the Adyar Library is to publish works in all aspects of ancient Indian Culture, of which we

consider music and other fine arts as very important ones In India, music did not develope as a secular entertainment, music in India is a fundamental phase of religion, rather music has become a religion itself, with a philosophy attached to it The musical notes are the physical manifestations of the Highest Reality termed Nāda-Brahman Music is not a mere accompaniment in religious worship, it is religious worship itself, likes Yāgas and Temple worship In India there has never been an antethesis between aesthetics and morality, there has never been developed an æsthetic doctrine which was not acceptable to the most orthodox follower of religion Thus the Sangītaratnākara and other works on music undertaken for publication by the Adyar Library are presentations of orthodox phases of Hindu religion and of Indian civilization as much as the commentaries on the Vedas and the works on religion and philosophy like the Ahirbudhnya Samhitā and the Vedāntaparibhāsā Through our publications we desire to exhibit the unity of Indian culture and the harmony that exists among the various phases of the Culture

Now what remains for me is to acknowledge the help that has been received in the preparation of this edition Our gratitude to Pandit S Subrahmanya Sastri, who prepared the edition is far beyond words to be adequately expressed His whole life was spent in scholarly pursuits, it is a great privilege for me to be able to associate myself with this great work even in this very humble capacity Dr G Srinivasa Murti,

the Director of the Adyar Library and the General Editor of the Library Series has all along been taking a keen interest in this publication There is no detail in which his advice has not been sought, and he was always ready with his help Mr Ramachandra Sarma, who is on the staff of the Library was working under the direction of Pandit Subrahmanya Sastri in preparing the edition The index at the end has been prepared by him. All the credit for the printing and general get up goes to the Vasanta Press, which always keeps up the high standard in all aspects of publication I express my very sincere gratitude to all of them who are directly connected with me in my work I must also thank the authorities of the Manuscripts Library in Bikaner and the Oriental Institute, Baroda for supplying the Library with the transcripts of the commentary of Simhabhūpāla

Adyar Library,
12th April 1943

C KUNHAN RAJA

विषयसूची

[प्रकरणाना पुटसंख्यया निर्देशः । प्रकरणस्थविषयाणा तु श्लोकसख्यया]

पुटाङ्काः

१. पदार्थसंग्रहप्रकरणम् १—२१

मङ्गलम् १ , ग्रन्थकृद्दश २—९ , ग्रन्थकृत , ग्रन्थश्च १०—१४ , प्राचीना ग्रन्थकारा १५—२० , सगीतलक्षणम् २१ , सगीतस्य द्वैविध्यम्, तयोर्लक्षण च २२—२४ , गीतस्य मूलम् २५ , गीतप्रयोजनम् २६, २७ , गीतप्रशसा २८—३० , प्रथमाध्यायसग्रह· ३२—३६ , द्वितीयाध्यायसग्रहः ३७, ३८ , तृतीयाध्यायसग्रहः ३९, ४० , चतुर्थाध्यायसग्रह· ४१—४३ , पञ्चमाध्यायसग्रहः ४४—४८ , षष्ठाध्यायसग्रह· ४८ , सप्तमाध्यायसग्रह ४८

२. पिण्डोत्पत्तिप्रकरणम् २२—६२

नादप्रशसा १, २ , नादद्वैविध्यम् ३ , ब्रह्मस्वरूपम् ४, ५ , जीवाना देहप्राप्ति· ६—१० , जीव-ब्रह्म-जगदैक्यम् ११, १२ , सृष्टिक्रम १२—१७ , मानुषशरीरस्योत्पत्तिक्रमः १८—२२ , गर्भस्य मासचतुष्टयेऽवस्थाविशेषा· २३—२७ , गर्भदोहदविधि. २८—३२ , गर्भस्य पञ्चममासादूर्ध्वमवस्थाविशेषा. ३३—४१ , प्रसूतिप्रकारः ४२, ४३ , भावभेदाः ४४ , मातृजा भावाः

पुटाङ्काः

४५, ४६, रसजा आत्मजाश्च भावा ४७, ४८, ज्ञानेन्द्रियाणि, तेषा विषयाश्च ४९, कर्मेन्द्रियाणि तेषा व्यापाराश्च ५०, अन्तः-करणद्वयम्, तद्व्यापारविशेषश्च ५१, ५२, इन्द्रियकारणम् ५३ तृतीयमन्त.करणम् ५३, गुणा, गुणकार्याणि च ५४, ५५, गुणसात्म्यजभावाः ५६, देहे भूतगुणा ५६, आकाशगुणाः ५७, वायुगुणाः ५७—६०, प्राणस्य स्थान व्यापारश्च ६०, ६१, अपानस्य स्थान व्यापारश्च ६२, व्यानस्य स्थान व्यापारश्च ६३, ६४, समानस्य स्थान व्यापारश्च ६४, ६५, उदानस्य स्थान व्यापारश्च ६६, नागादिपञ्चवायूना स्थानानि व्यापाराश्च ६७—६९, उदकगुणा· ६९, ७०, पृथिवीगुणाः ७०, ७१, अन्ये देहभेदा· ७१—७४; अङ्गप्रत्यङ्गानि ७५—७८, धातवः ७९—८२, हृदयम् ८३—८५, रन्ध्राणि ८६, ८७, अस्थिराशय ८७—९०, अस्थिसख्या ९०—९२, अस्थिसधय, तेषा भेदाश्च ९२—९४; स्नायु-भेदा· ९४, ९५, स्नायूनामुपयोग· ९६, पेशीसख्या ९७—१००, सिरा-धमनिकासख्या १०१, १०२, सीवनीना सस्थानादय १०२—१०५, धमन्य १०५—११३, मर्माणि ११४, ११५, सहितामानम् ११५, ११६, द्रवमानम् ११६—११९, आधारचक्रम् १२०—१२२, स्वाधिष्ठान-चक्रम् १२२—१२४, मणिपूरचक्रम् १२४—१२६, अना-हतचक्रम् १२६—१२९, विशुद्धिचक्रम १२९—१३१; ललनाचक्रम् २३१—१३३, आज्ञाचक्रम् १३३, १३४, मनश्चक्रम् १३४, १३५, सोमचक्रम् १३६—१३८, चक्रान्तरम् १३९, चक्रफलानि १४०—१४५, अग्निशिखा-स्थानम् १४५, १४६, ब्रह्मग्रन्थिः १४७—१५०, मुख्य-नाड्यः १५१—१५५, सरस्वत्यादिनाडीनामवस्थानानि १५५—

पुटाङ्का

१५९, तासा प्रमाणम् १५९—१६३, पिण्डनिरूपणस्योपसहार १६३, १६४, मुक्ति-भुक्त्युपाय १६४, नादोपासना १६५—१५७

३. नाद-स्थान-श्रुति-स्वर-जाति-कुल-दैवत-र्षि-च्छन्दो-रसप्रकरणम् . ६२—९८

नादोपासना, तत्फल च १, २, नादोत्पत्तिप्रकार ३, ४, पञ्चविधो नाद ५, नादशब्दव्युत्पत्ति ६, व्यववहारे त्रिविधो नाद, एषा मान च ७, नादस्य द्वाविशतिभेदा ८, ९, वीणाद्वयदृष्टान्तेन स्वराणा विशदीकरणम् १०—१६, तयोश्चलवीणाया कर्तव्यम् १७, सारणाना चतुष्टयम् १८—२२, सप्तस्वरा·, स्वरशब्दव्युत्पत्तिश्च २३ २५, श्रुतिकारणाक्षेप २५, २६, तत्परिहार २६, २७, श्रुतिजातिविभाग २७, तासा स्वरेषु व्यवस्थिति २८—३१, तासामवान्तरजातय· ३१—३५, तासा स्वरस्थिति ३५—३८, त्रिप्रकारा· स्वरा. ३९, द्वादश विकृतस्वरा ३९—४६, सप्तस्वराणा मयूराद्युच्चारयितार ४६, ४७, स्वराणा वादीत्यादिचातुर्विध्यम् ४७—५१, स्वराणा कुलानि ५२—५४, स्वराणा वर्णा ५४, ५५, स्वराणा जन्मभूमय ५५, ५६, स्वराणा द्रष्टार ऋषय. ५६, ५७, स्वराणा देवता ५७, ५८, स्वराणा छन्दासि ५८, ५९, स्वराणा रसा· ५९

४. ग्राम-मूर्छना-क्रम-तान-प्रकरणम् . . ९९—१४६

ग्रामलक्षणम् १, तस्य द्वौ भेदौ १, २, षड्जग्रामस्य लक्षणम् २, मध्यमग्रामस्य लक्षणम् ३, गान्धारग्राम ४, ५, त्रयाणा

पुटाङ्का·

प्राधान्यम् ६, ७, ग्रामत्रयदेवता· ७, तेषामृतव, कालविशेषश्च ८, मूर्च्छनानिरूपणम्, तद्भेदाश्च ९—१२, तेषा भेदाना लक्षणानि १२—१५, मूर्च्छनाना चातुर्विध्यम् १६, काकली, काकल्यन्तरश्च १७, मूर्च्छनासख्यापरिज्ञानोपायः १८, षट्-पञ्चाशत्सख्याकाना मूर्च्छनाना प्रत्येक पञ्चविधत्वम् १९—२०, मूर्च्छनाना देवता २०—२२, मूर्छनाना नामान्तराणि २२—२६, ताननिरूपणम् २७—३१, कूटताना· ३२; पूर्ण-कूटताना: ३२—३५, अपूर्णकूटताना: ३५, ३६, षाडवाना कूटतानाना सख्या ३७, ३८, एकस्वरादितानाना नामविशेषा ३९, षाडवसंख्या ४०—४३, पञ्चस्वरा· ४३—४५, चतुस्वरा: ४५, ४६, त्रिस्वरा. ४७, ४८, द्विस्वरा: ४८, ४९, एकस्वरा: ४९, ५०, कूटताना पुनरुक्ता· ५०—५२, अन्ये पुनरुक्ता: ५२—५७, मिलित्वा तेषा सख्या ५८—६०, सख्याना लाघवेन परिज्ञानोपाय· ६०, ६१, प्रस्तार ६२, ६३, खण्डमेरु:, अङ्कनिवेशनप्रकारश्च ६३—६५, उद्दिष्टपरिज्ञानप्रकार· ६६—६८, नष्टपरिज्ञानप्रकार· ६८—७०, षाड्जग्रामिकशुद्धताननामानि ७१—७८, माध्यमग्रामिक-शुद्धताननामानि ७८—८२, षाड्जग्रामिकौडुवताननामानि ८३—८६, माध्यमग्रामिकौडुवताननामानि ८७—९०, तान-नामप्रयोजनम् ९०

५. साधारणं प्रकरणम् १४७—१५०

साधारणलक्षणम् १, स्वरसाधारणभेदा १, २, साधारणसञ्ज्ञोपपादनम् २, ३, काकल्यन्तरयो· प्रयोगनियम· ४—६, षड्जमध्यम-

पुटाङ्का

साधारणलक्षणम् ७, ८, साधारणे ग्रामयोर्नियम· ८, ९, जाति-साधारणलक्षणम् १०

६. वर्णालङ्कारप्रकरणम् १५१—१६८

वर्णलक्षणम १, वर्णभेदा· १—३, अलङ्कार ३, स्थाय्यलङ्कारा· ४—६, परिभाषा ६, ७, मन्द्रतारयोर्लिपिपरिचयः ८, प्रसन्नादि ९, प्रसन्नान्त· ९, प्रसन्नाद्यन्त १०, प्रसन्नमध्य १०, क्रमरेचितः ११, १२, दीप्तान्त, प्रस्तार, प्रसादश्च १३, आरोह्यलङ्कारा १४, १५, विस्तीर्ण· १६, निष्कर्ष· १७, गात्रवर्णः १७, बिन्दु· १८, १९, अभ्युच्चय· १९, हसित २०, प्रेङ्खित· २१, आक्षिप्त· २२, सधिप्रच्छादन· २३, उद्गीतः २४, उद्वाहित. २४, त्रिवर्ण·, २५, पृथग्वेणि· २५, अवरोह्यलङ्काराः २६, सचार्यलङ्कारा २६—२९, मन्द्रादि· ३०, मन्द्रमध्य. ३१, मन्द्रान्त ३१, प्रस्तार ३२, प्रसाद· ३२, ३३, व्यावृत्तः ३३, ३४, स्खलित ३५, परिवर्तक ३६, आक्षेपः ३७, बिन्दु ३७, ३८, उद्वाहित ३९, ऊर्मि ३९, ४०, समः ४० प्रेङ्ख ४१, ४२, निष्कूजित· ४२, श्येन ४३, क्रम· ४४, ४५, उद्घट्टित ४५, रञ्जित ४६, ४७, सनिवृत्तप्रवर्तक ४७, ४८, वेणु ४८, ४९, ललितस्वरः ४९, ५०, हुकार· ५०, ५१, ह्रादमान ५१, अवलोकितः ५२, अलङ्कारोपसहार ५३, लोकप्रसिद्धा सप्तालङ्कारा ५४, ५५, तारमन्द्रप्रसन्न ५६, ५७, मन्द्रतारप्रसन्न ५७, ५८, आवर्तक. ५८, ५९, सप्रदान ५९, ६०, विधूत ६०, ६१, उपलोल· ६१, ६२, उल्लासित· ६२, ६३, अलङ्काराणामानन्त्यम् ६३, अलङ्कारप्रयोजनम् ६४

पुटाङ्काः

७. जातिप्रकरणम् १६९—२७४

शुद्धा जातय· १—३, विकृता जातय ३-७, विकृतसंसर्गजा जातय ८-१६, जातीना ग्रामविभाग १७—२०, स्वरसाधारणप्रयोगे नियम २१—२४, अशाना सख्या २४—२८, ग्रहादीना विभाग· २९—३१, अशलक्षणम् ३२—३४, तारः ३५, ३६, मन्द्र· ३७, ३८, न्यासः ३८—४०, अपन्यास ४१—४६, सन्यासः ४७, विन्यास ४७, ४८, बहुत्वम् ४९, अल्पत्वम् ५०, लङ्घनम् ५१, अन्तरमार्गः ५२ ५३, षाडवः ५४, औडुव ५५—५७, अल्पत्वस्य लोप्यविशेषव्यवस्था ५७—५९, सप्रस्तारा जातय ५९, षाड्जी ६०—६४, आर्षभी ६४—६६, गान्धारी ६७—७०, मध्यमा ७०—७२, पञ्चमी ७३—७५, धैवती ७५—७७, नैषादी ७७, ७८, षड्जकैशिकी ७९, ८०, षड्जोदीच्यवा ८१—८५, षड्जमध्यमा ८५—८८, गान्धारोदीच्यवा ८८—९१, रक्तगान्धारी ९१—९४, कैशिकी ९५—९८, मध्यमोदीच्यवा ९९, १००, कार्मारवी १०१—१०३, गान्धारपञ्चमी १०३—१०५, आन्ध्री १०५—१०७, नन्दयन्ती १०७—१०९, अनुक्ताना तालादिनियम. ११०, मार्गा ११०, गीतय ११०, १११, मार्गेषु कलानियम १११, ११२, सक्षेपेण रागाशनिरूपणम् ११३, जातिस्तुति ११३, जातीनामन्यथा प्रयोगे दोष· ११३, ११४

८. गीतिप्रकरणम् . . . २७५—२८८

कपालोत्पत्तिः १; षाड्जीकपालम् २, ३, आर्षभीकपालम् ३, ४, गान्धारीकपालम् ४, ५, मध्यमाकपालम् ६, पञ्चमीकपालम्

पुटाङ्काः

७, धैवतीकपालम् ८, नैषादीकपालम् ९, कपालगाने फलम् १०, कम्बलोत्पत्तिः ११, १२, कम्बलगाने फलम् १३, ब्रह्मप्रोक्तकपालपदानि १४, गीतिसामान्यलक्षणम् १४—१६, मागधीगीतिः १६—१८, अर्धमागधीगीतिः १८, १९, सभावितागीतिः १९, पृथुलागीतिः १९, २०, तालाश्रयगीतिलक्षणम् २०—२९

अनुबन्धा . . . . २९३—४१६

१ श्रुतिवीणास्वरग्रामबोधिनी
प्र० ३, श्लो० ११—३८ . . . २९३

२ शुद्धस्वरविकृतस्वरपट्टिका
प्र० ३, श्लो० ३९—४६ . . . २९४

३. मूर्च्छनानामबोधिनी (१)
षड्जग्राम प्र० ४, श्लो० ९—१०
मध्यमग्रामः प्र० ४, श्लो० ११, १२
गान्धारग्राम. प्र० ४, श्लो० ९ . . २९५

४. मूर्च्छनानामबोधिनी (२)
षड्जग्राम प्र० ४, श्लो० ९, १०
मध्यमग्राम प्र० ४, श्लो० ११, १२ . २९६

५ मूर्च्छनाभेदाः प० ४, श्लो० १६ . . २९६

६. जात्यष्टादशकविमर्शनी
प्र० ७, श्लो० ९९—१० . . . २९७

पुटाङ्काः

७. स्वरप्रस्तारः प्र० ४, श्लो० ३९ . २९९—३९३

८. श्रुतीना जातिस्वरग्रामप्रदर्शक चक्रम्
प्र० ३, श्लो० ३५—३८. . . ३९४

९. श्लोकानामर्धानुक्रमणिका . ३९५—४१६

शोधनम्

पृ०	२९	प०	७	०मण्डात्तु
,,	१२७	,,	७	नव त्रिशत्
,,	१५७	,,	३	ह्रस्वम्
,,	१६६	,,	९	लक्ष्म
,,	१६७	,,	१	०प्रसन्ना०
,,	२२४	,,	१	षड्ज०
,,	२८८	,,	५	अष्टमं

Anubandhas 8 and 9 are marked 4 and 5 These figures may be deleted

---

ॐ

शिवाभ्या नम

श्री-निःशङ्कशार्ङ्गदेव-प्रणीतः

संगीतरत्नाकरः

चतुरकल्लिनाथ-विरचितया कलानिध्याख्यटीकया सिंहभूपाल-
विरचितया संगीतसुधाकराख्यटीकया च समेतः

प्रथमः स्वरगताध्यायः

तत्रादिमं पदार्थसंग्रहाख्यं प्रकरणम्

ब्रह्मग्रन्थिजमारुतानुगतिना चित्तेन हृत्पङ्कजे
सूरीणामनु रञ्जकः श्रुतिपदं यो ऽयं स्वयं राजते ।
यस्माद् ग्रामविभागवर्णरचनाऽलंकारजातिक्रमो
वन्दे नादतनुं तमुद्धुरजगद्गीतं मुदे शंकरम् ॥ १ ॥

(कलानिधि)

कर्णालम्बितकम्बलाश्वतरयोर्गीतामृतास्वादना-
दान्दोलीकृतमौलिनिर्जरनदीतारङ्गपाटश्रिया ।

नृत्यच्चन्द्रकलाकलापविलसद्ब्रह्माण्डखण्डान्तरं[1]
त तूर्यत्रयपोषरूपवपुष वन्दे भवानीपतिम् ॥ १ ॥
विघ्नौघहारिण सर्वभक्ताभिमतकारिणम् ।
वारणास्यमहं वन्दे मौलावर्धेन्दुधारिणम् ॥ २ ॥
वाणि वीणालसत्पाणि पञ्चाशद्वर्णरूपिणि ।
पादानतसुरश्रेणि निवास कुरु मन्मुखे ॥ ३ ॥
वन्दे वेदार्थतत्त्वज्ञं [2]मुक्तिमार्गप्रवर्तकम् ।
सर्वागमविद नित्य चन्द्रभूषणदेशिकम् ॥ ४ ॥
आस्ते कर्णाटदेश सुविमलयशसा पूरिताश पृथिव्या
कावेरीकृष्णवेणीतरलतरतरङ्गार्द्रदक्षोत्तरास. ।
हृष्ट सश्लिष्य पूर्वापरनिजवपुषा प्राच्यपाश्चात्त्यवेले
पाथोनाथप्रसक्तिप्रबलितनिखिलस्वाङ्गसौभाग्यलक्ष्मी· ॥ ५ ॥
भोग्यास्थिता भोगवतीव नित्य सुपर्वरम्या दिविजस्थलीव ।
पुरीह विद्यानगरी चकास्ति तुङ्गातरङ्गैरभित पवित्रा ॥ ६ ॥
एता शास्ति प्रशस्तप्रतिभटमकुटप्रान्तनिर्यन्नर्य-
द्रत्नज्योतिःप्रवालावनमनचटुलाटोपतापप्रताप· ।
कर्णाटाघाटलक्ष्मीवरणपरिलसत्पौरुषोत्कर्षशाली
प्रौढ· श्रीदेवरायो विजयनृपसुतो यादवाना वरेण्य· ॥ ७ ॥
विश्वभराभाग्यकृतावतारस्तस्यास्ति पुत्त्रो यशसा पवित्र· ।
संगीतसाहित्यकलास्वभिज्ञ. प्रतापवानिम्मडिदेवराय ॥ ८ ॥
सुधर्मेव सभा यस्य समुल्लासिकलाधरा ।
गान्धर्वगुणगम्भीरा विद्याधरविनोदिनी ॥ ९ ॥

[1] ०कलापरिलसद्०
[2] ०मार्गप्रदर्शकम्

वाचा गेयेन नित्यं समुचितकुसुमैस्तोषितार्धाङ्गयोष
कीर्त्या व्याप्तस्त्रिलोकीमभिनवभरताचार्यलक्ष्मप्रपूर्त्या[1] ।
पादाग्रे वीरभूषामणिगणविलुठत्सर्ववाग्गेयकार-
स्तस्यामस्ति प्रशस्तश्रुतिगणचतुर कल्लिनाथार्यवर्य ॥ १० ॥
वल्लभेश्वरदेवो हि यस्य साक्षात्पितामह· ।
असौ कि वर्ण्यते ज्ञानवैराग्यैश्वर्यसपदा ॥ ११ ॥
माता नारायणी यस्य पिता लक्ष्मीधर स्वयम् ।
शाण्डिल्यगोत्रज· सो ऽय साक्षात्संगीतदेवता ॥ १२ ॥
तमाह कल्लिनाथार्य स राजा बहुमानत ।
रत्नाकर व्याकुरुष्व लक्ष्यलक्षणकोविद ॥ १३ ॥
अत· स कल्लिनाथार्यो रत्नाकरनिबन्धनम् ।
कलानिधि निबध्नाति लक्ष्यलक्ष्माविरोधत ॥ १४ ॥

इह चिकीर्षाविषयनिबन्धनप्रतिपाद्यप्रधानाश समासोक्त्या सूचयञ्शिष्टाचारपरिप्राप्त दृष्टादृष्टफल विशिष्टेष्टदेवतानमस्कारमादौ करोति— **ब्रह्मग्रन्थी**त्यादिना । तत्र प्रस्तुतवाच्यशंकरपक्षे—सूरीणा योगिना हृत्पङ्कजे हृदयस्थानस्थिते ऽनाहताख्ये द्वादशदलचक्रे, ब्रह्मग्रन्थिजमारुतानुगतिना, ब्रह्मग्रन्थिर्नाम देहस्य गुदलिङ्गयोर्मध्ये स्थिताच्चतुर्दलादाधाराख्याच्चक्राद्द्व्यङ्गुलान्तरादूर्ध्वं मेहनाद्द्व्यङ्गुलान्तरादध एकाङ्गुल तप्तकाञ्चनप्रभं सूक्ष्माग्निशिखाऽऽश्रयो यद्देहमध्यं नाम चक्रमस्ति तस्मान्नवाङ्गुलान्तरादुपरि चतुरङ्गुलोत्सेधायामो नाभिकंद , तत्र जातो मारुतो नाभीहृदयनासाऽऽस्यस्थानेषु चरञ्शब्दोच्चारणादिकारणं प्राणो नाम वायु·, तस्यानुगतिर्यस्य तेन चित्तेनान्तःकरणेन करणभूतेन, श्रुतिपदमनु, श्रुतीना वेदाना पदमुत्पत्ति-

[1] ०प्रपूर्व्या

स्थानम्, प्रणव इत्यर्थ, तदनु। अत्र 'अनुर्लक्षणे' इत्यनो कर्मप्रवचनीयत्वे 'कर्मप्रवचनीययुक्ते द्वितीया' इति श्रुतिपदमिति द्वितीया। रञ्जक स्वव्यतिरिक्तं स्वात्मन्यन्तर्भावयन्महारजनादिवत्तथोक्त। अथ वा, श्रुतिपदम्, श्रुतयो ऽवान्तरवाक्यानि, तासा पद स्थानम्, उपक्रमादिना लिङ्गेन 'सदेव सोम्येदमग्र आसीत्' इत्यादि 'तत्त्वमसि' इत्यन्त संदर्भो महावाक्यम्। अन्विति, अस्य श्रवणानन्तर शाब्द्यादिप्रतिपत्तिक्रमेण भेदनिरासात्तत्त्वपदार्थयोरैक्याभ्यासे सति। यो ऽयमिति। अत्र यच्छब्देनागमवेद्यत्वमुक्तम्, अयमितीदमा निर्देशेन तु श्रवणानन्तर मनने कृते मानसप्रत्यक्षत्वम्। स्वय राजते स्वेनैव प्रकाशते, साक्षात्कारे सति वृत्त्युपाध्युच्छेदे स्वस्वरूपेण नित्यं प्रकाशत इत्यर्थ। यथोक्त योगयाज्ञवल्क्ये—

'धारयन्मनसा वायु व्याहरन्प्रणवाक्षरम्।
आसने ऽनन्यधीरास्ते रहस्ये विजितेन्द्रिय॥
संप्राप्ते मारुते तस्मिन्सुषुम्णाया वरानने।
मन्त्रमुच्चार्य मनसा हृन्मध्ये धारयेत्सुधी॥
वायुना पूरिते व्योम्नि साङ्गोपाङ्गकलेबरे।
तदा ऽऽत्मा राजते तत्र यथा व्योम्नि विकर्तन॥
यद्यत्पश्यति तत्सर्व पश्येदात्मवदात्मनि।' इति।

ग्रामविभागवर्णरचनाऽलंकारजातिक्रम। ग्रामशब्देन लोका [1]उच्यन्ते, तेषा विभाग, वर्णा ब्राह्मणादय, तेषा रचना, वर्णानामानुलोम्येन प्रातिलोम्येन चोत्पन्ना या जातयस्ता वर्णोपस्कारकत्वेनालंकारजातय उच्यन्ते,

[1] लक्ष्यन्ते

तेषा ग्रामविभागादीना क्रम , यस्माद्भवतीत्यध्याहार , 'यत्र क्रियान्तराभावस्तत्रास्तिर्भवति पर ' इति शाब्दन्यायात् । एतेनेश्वर प्रति जगतस्तटस्थलक्षणत्वं दर्शित यथा जन्मादिसूत्रे 'यतो वै-' इति वाक्यं विषयीकृत्य प्रतिपादितम् 'ब्राह्मणो ऽस्य मुखमासीत्' इत्यादिश्रुतौ च । नादतनु नादविग्रहम् , 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुते । उद्धुरजगद्गीतम् उद्धुरमुद्भटं यथा भवति तथा जगता गीत स्तुत तं शकर मुदे निरतिशयसुखावाप्त्यै वन्दे प्रणमामि । अप्रस्तुतप्रतीयमानस्वरपक्षे तु-- सूरीणा तद्विदा हृत्पङ्कजे मन्द्रस्थाने । ब्रह्मग्रन्थीति पदस्य स एवार्थ । चित्तेन विवक्षमाणात्मप्रेरितेन मनसा । श्रुतिपदम् , श्रुतय षड्जादिस्वराणामभिव्यञ्जिकाश्छन्दोवत्यादय , तासा पदम् । पदमिति जातावेकवचनम् , पदं स्थानानीति । ऊर्ध्वनाडीसंलग्ना यास्तिरश्च्यो नाड्यस्तासु चित्ताकृष्टमारुताहतेरुत्पन्नो नाद पदशब्देन लक्ष्यते, तत्स्थे तदुपचारात् । तदनु तदविच्छेदेन रञ्जक , स्वकारणश्रुते· स्वस्वरूपोत्पादकत्वाच्छ्रोतृप्रीतिजनकत्वाच्च । यो ऽयं शास्त्रप्रसिद्धत्वेनानुभूयमान । स्वय राजत इति, प्रयोगे सहकारिकारणानपेक्ष प्रकाशत इत्यर्थ । एतेनाक्षरसाम्यात्स्वरशब्दनिरुक्तिर्दर्शिता । ग्रामेत्यादि । ग्रामा· षड्जग्रामादय तेषा विभाग , वर्णा स्थाय्यादय तेषा रचना, अलकारा प्रसन्नाद्यादय , जातयः षाड्ज्यादय , एतेषा वक्ष्यमाणलक्षणाना ग्रामविभागादीना क्रमो यस्मात्कारणभूतात्स्वराद्भवति । नादतनु नादात्मकम् । उद्धुरजगद्गीतम् , विशिष्ट म्वरसदर्भो गीतम् , उद्धुरमुद्भट जगद्गीतं यस्मादिति तथोक्तम् , त शंकरं सुखकरं मुदे आनन्दाविर्भावाय वन्दे स्तौमि ॥ १ ॥

(सुधाकर·)

वेणूद्वेलितगीतिरुद्रसलसद्वाद्यो वयस्यैः सम
　　तालीभिः फणिमौलिरङ्गधरणौ नृत्यक्रियाकौतुकी ।

इत्थ भङ्गिविशेषतः प्रकटयन्सगीतमङ्गीकृत-[1]
त्रैलोक्यप्रतिपालन. प्रतिपद पद्मेक्षण' पातु व' ॥ १ ॥
श्रियो निधान जगता श्रिये ऽस्तु श्रियो विशाल' स्तनसंनिवेश' ।
यस्मिन्कराभ्या कलनामविन्दन्मन्ये चतुर्बाहुरभून्मुकुन्द. ॥ २ ॥
पितुर्जयार्थीव दधाति भानु सिन्दूरपूरारुणकुम्भदम्भात् ।
दानाम्बुधारायमुना च मूर्ध्ना गजानन त हृदि भावयाम ॥ ३ ॥
तज्जीवित महेशस्य हिमाद्रेस्तपसा फलम् ।
निदान जगता वन्दे सदेहध्वान्तशान्तये ॥ ४ ॥
भरतादिप्रणीताना ग्रन्थाना दुर्ग्रहत्वत ।
शार्ङ्गदेवोदयात्पूर्व खिला सगीतपद्धतिः ॥ ५ ॥
अभूत्सा शार्ङ्गदेवेन स्फुटमेकपदीकृता ।
सगीतरसपीयूषे नैवात्मभरितोचिता ॥ ६ ॥
वदान्यस्येति मन्वानः करुणापूर्णमानस' ।
[2]एता राजपथीकर्तुं यतते सिहभूपति ॥ ७ ॥
सगीतरत्नाकरनामधेयग्रन्थस्य टीका स्फुटदर्शितार्थाम् ।
श्रीसिहभूपः स्वकुलप्रदीपस्तनोति सगीतसुधाकराख्याम् ॥ ८ ॥
दुर्बोध भरतादिभिर्विरचित शास्त्र चिराभ्यासत'
सगीतागमसारविद्भिरखिलै सार्ध विचार्य स्फुटम् ।
विद्याजातविशारद' सहृदयः श्रीसिहपृथ्वीपति-
र्लोकानुग्रहवाञ्छया विवृणुते सगीतरत्नाकरम् ॥ ९ ॥
ग्रन्थ' शक्यो ऽपूर्व' किचिज्ज्ञात्वा प्रपञ्चयितुम् ।
न तु सुगमे ऽपि ग्रन्थे विवृतावपि योजनामात्रम् ॥ १० ॥
अतिगम्भीरे विषमे कतिपयवेद्ये त्विह ग्रन्थे ।
सम्यग्व्याख्याकुशल'[3] सर्वज्ञ' सिहभूप एवैकः ॥ ११ ॥

[1] ०मङ्गीकृत त्रैलोक्यप्रतिपालक
[2] एना
[3] ०व्याख्याशक्त

प्रागलभ्य दधते न लक्षणविद' सगीतलक्ष्य विना
　लक्ष्यज्ञा अपि शास्त्रबोधविधुरा गोष्ठीष्वपष्ठूक्तय ।
सदृब्धस्फुटलक्ष्यलक्षणविद श्रीसिहपृथ्वीभुजो
　नाय नूतन इत्यनूनधिषणैर्ग्रन्थो ऽवमान्यो बुधै ॥ १२ ॥
प्रस्तौति स्तुतिमस्य निस्तुषतर सार न यः सस्तुव-
　न्नासौ नः स्तुतिमादधाति बधिरो गातुर्यथा स्तावक ।
निश्चित्य स्वचित वदन्नपि मुद धत्ते विदामग्रणी-
　रोष्ठे चूर्णनिवेदन हि शमयेद्वेषे नृणा वैकृतम् ॥ १३ ॥
गर्वेण कः सर्वगुणोत्तरो ऽपि सगीतरत्नाकरमुत्सहेत ।
व्याख्यातुमत्रापि तथा ऽपि कश्चित्प्रेक्षावत. प्रीणयितु प्रयत्नः ॥ १४ ॥

भरतदत्तिलकोहलादिप्रणीतानि सगीतशास्त्राणि भूतलवर्तिभिर्विरलप्रज्ञै-र्दुरवबोधरहस्यानीति मत्वा परमकारुणिक. शिशिरकिरणाभरणचरणपङ्कज-प्रवणमानसः शार्ङ्गदेव. सगीतरत्नाकराख्य सगीतसार लोकोपकाराय चिकीर्षु-र्निष्प्रत्यूहपरिसमाप्तये शिष्यप्रशिष्यद्वारा प्रचयगमनाय च सदाचारानुमितस्मृत्यनु-मितश्रुतिविहित विशिष्टेष्टदेवतानमस्काररूप मङ्गलमाचरन्प्रसङ्गादभिधेयप्रयोजन-सबन्धाश्चैकेनैव श्लोकेन कथयति—**ब्रह्मग्रन्थिजेति** । ब्रह्मपद सकलविघ्नविनाश-निघ्नहृदय परमात्मान स्मारयत्प्रथमनिवेशान्मङ्गलाचरणमपि भविष्यतीति मन्वानो नादस्वरूप मोक्षनिदान प्रथम ब्रह्मपद प्रायुङ्क्त। वन्दे अभिवादये स्तौमि च, 'वदि अभिवादनस्तुत्यो' ' इत्यभिधानात्। नमतिस्तौत्यादिप्रयोगे त्वन्यतरार्थ एव लभ्येत नोभयमिति वन्दतिप्रयोग । अत्र नमस्काराणा मानसिकवाचिक-कायिकत्वेन त्रैविध्य विशेषणानुपादानाल्लभ्यते। अथ वा, प्रथमचरणगतेन चित्तेनेति पदेन सबन्ध कार्य, मानसिकस्यैव नमस्कारस्य श्रद्धाविहितत्वेन मुख्यत्वात्, 'यदेव विद्यया करोति श्रद्धया-'इति श्रुते । ग्रन्थादिनिवेशनेनैव वाचिकनमस्कारस्यार्थतः सिद्धत्वादास्तिकाना श्रद्दधानाना वाचिकनमस्कारस्य कायिकनमस्कारनान्तरीयकत्वात्त्रिविधस्यापि नमस्कारस्य निवेशनसिद्धि' । क वन्दे ? शकरम्, ईश्वरमित्यर्थ । अथ वा, श करोतीति शकरः, निरपेक्षतया सुखदायक ईश्वर एव । अत एव सापेक्षतया सुखदायकाना राजादीना व्युदास ।

ननु परमकारुणिका निरपेक्षा अप्यन्यानानन्दयितु यतन्ते, तन्निरासार्थमाह—उद्भुरेति। उद्भुरेण जगता गीत स्तुतम्। 'गै शब्दे' इत्यस्य शब्दार्थत्वे ऽपीश्वरविषयत्वात्स्तुत्यर्थो लभ्यते। किंविशिष्ट तमीश्वरम्? नादतनुम्, नादस्तनु स्वरूप यस्य तम्, शब्दब्रह्मेत्युक्तत्वात्। यद्वा नादेन कार्येण कारणमाकाशमुपलक्षयेत्; तेनाकाशस्वरूपमित्यर्थ., आकाशो ऽप्येका मूर्तिः परमेश्वरस्य, एतदुपादान च परमेश्वरस्यापि शब्दकारणत्वात्तदनुग्रहस्य ग्रन्थरूपशब्दविस्तरसमाप्तिसाधनत्वाभिव्यक्त्यर्थम्। तमिति यच्छब्दसबन्धार्थम्, 'यत्तदोर्नित्य· सबन्ध' इति वचनात्। त कम्? यस्माद् ग्रामेति। ग्रामशब्देन भूरादिलोकाः, अथ वा नगरशाखानगरग्रामघोषादयो ग्राह्या। विभज्यत इति विभागो द्रव्य धान्यादि। अथ वा ग्रामाणा विभाग. पृथक्त्वेनावस्थापनम्, 'एष सेतुरेष विधरण एषा लोकानामसभेदाय' इति श्रुते। वर्णा ब्राह्मणादयः, रचना द्विपदचतुष्पदषट्पदत्वादि·, अलकाराः कटकमकुटादय, जातयो गोत्वाश्वत्वादय, क्रमो बाल्यादिः सृष्टिसहारौ वा ऋतुक्रमो वा यस्मात्समुत्पन्न.। 'जनिकर्तु· प्रकृतिः' इत्युक्तत्वात्पञ्चम्यैव समुत्पन्न इति लभ्यते। अत्र च ग्रामाश्च विभागश्च वर्णाश्च रचना चालकाराश्च जातयश्चेति द्वद्व कृत्वा ताभि सहित क्रम इति क्रमपदेन सह तत्पुरुष। अथ वा, ग्रामादिजात्यन्ताना क्रमः परिपाटी, सा यस्मादिति सबन्धः। पुनश्च विशिनष्टि—यो ऽय स्वय राजते स्वप्रकाशः। ननु किमिद स्वप्रकाशत्वम्? ज्ञानाविषयत्वे सत्यपरोक्षव्यवहारयोग्यत्वम्। तदुक्त तत्त्वप्रदीपिकायाम्—

'अपरोक्षव्यवहृतेर्योग्यस्यार्थीपदस्य न·।
सभवे स्वप्रकाशस्य लक्षणासभव. कुत॥' इति।

क्व राजते? सूरीणा हृत्पङ्कजे, 'अङ्गुष्ठमात्र· पुरुषो मध्य आत्मनि तिष्ठति' इत्युक्तत्वात्। ननु व्यापकस्य परमात्मन कथ मूर्तधर्मो हृद्यवस्थानम्? अत आह—अनुरञ्जक इति। व्यापकस्यापि परमेश्वरस्य प्राणिना हृत्पङ्कजे ऽभिव्यक्ति·। तदुक्त व्यासेन—'अभिव्यक्तेरित्याश्मरथ्य' इति। केन हृद्यभिव्यज्यते? चित्तेन। कीदृशेन? ब्रह्मग्रन्थिजमारुतानुगतिना। सुषुम्णया सहेडापिङ्गलयो· सबन्धस्थान ब्रह्मग्रन्थि, तस्माज्जातो यो मारुतस्तत्रानुगति सहगमन यस्य तादृशेन। अनु· सहार्थे। यद्वा, अनुगत विद्यते ऽस्मिन्निति मत्वर्थ

इन्प्रत्ययः । मारुते ऽनुगतिना मारुतानुगतिनेति विग्रह.,[1] मन.पवनौ सहचारिणा-विति योगिप्रसिद्धेः । श्रीहर्षेणाप्युक्त नैषधचरिते—

'त्व हृद्गता भैमि बहिर्गता ऽपि प्राणायिता नासिकया ऽऽस्यगत्या ।
न चित्तमाक्रामति तत्र चित्रमेतन्मनो यद्भवदेकवृत्ति ॥' इति ।

यो ऽयमेव विशिष्ट परमेश्वर', त मुदे हर्षाय वन्द इति सबन्धः । पक्षे, गीत वन्दे । गीतमिति रञ्जकः स्वरसदर्भ उच्यते, 'रञ्जक' स्वरसदर्भो गीतमित्यभि-धीयते' इति वक्ष्यमाणत्वात् । गीतस्य च मुख्यत्वेन गीतपदेनैव वाद्यनृत्ते अप्यु-पलक्ष्यास्मिन्ग्रन्थे सगीतमभिधेयमित्यपि सूच्यते । अनभिधेयत्वे तस्य ग्रन्थादौ स्तुत्यत्वेन नमस्कार्यत्वेन चाभिधानस्यासगतत्वापात[2] । अथ वा नादतनु वन्दे । नाद एव तनुः स्वरूप यस्य स्वरसदर्भस्य त स्वरसदर्भ वन्दे । कथभूतम्? उद्धुरजगद्गीतम्, उद्धुरे जगति गीत जात्येलादि यस्मात् । कस्मै? मुदे आनन्दाय । पुन' कथभूतम्? शकरम्, श सुखं करोतीति । अनेन सुख प्रयोजनम्, अभिधेयेन सह सुखस्य जन्यजनकभावः सबन्धो ऽपि दर्शित । त कम्? यस्माद् ग्रामादीनामुत्पत्ति' । ग्रामा' स्वरसमूहाः षड्जग्रामो मध्यमग्रामो गाधारग्राम इति त्रय तेषा विभाग पृथक्त्वम्, वर्णो गानक्रिया स्थाय्यारोह्य-वरोहिसचारिभेदेन चतुर्विध 'गानक्रियोच्यते वर्ण.' इति वक्ष्यमाण' तस्य रचना निष्पादन सौन्दर्य वा, अलकारा विशिष्टवर्णसदर्भा मन्द्राद्यादय., जातयो ऽष्टादश षाड्ज्यादयः सप्त शुद्धा एकादश विकृता षड्जकैशिक्यादय , तासा क्रम परिपाटी यस्माज्जायत इति सबन्ध. । यो ऽय म्वय राजते, अन्यानपेक्षतया ऽऽनन्दयितृत्वात् । स्वरपदस्य निरुक्तिरप्यनेन कथ्यते । कथभूत.? सूरीणा सगीततत्त्व जानतामनुरञ्जको ऽनुरागोत्पादक । क्व राजते? हृत्पङ्कजे । हृत्पङ्कज इत्युपलक्षणम् । तेन स्वरोत्पत्तिस्थानानि हृत्कण्ठमूर्धानो ग्राह्याः । केन? चित्तेन, चित्तस्यापि नादोत्पत्तौ कारणत्वस्य 'आत्मा विवक्षमाणो ऽय मन प्रेरयते' इत्यादिना वक्ष्यमाणत्वात् । ब्रह्मग्रन्थिजेति विशेषण पूर्ववत् ॥ १ ॥

[1] ०गतिनेत्यन्वय
[2] ०तत्वापत्ते

अस्ति स्वस्तिगृहं वंशः श्रीमत्काश्मीरसंभवः ।
ऋषेर्वृषगणाज्जातः कीर्त्तिक्षालितदिङ्मुखः ॥ २ ॥
यज्वभिर्धर्मधीधुर्यैर्वेदसागरपारगैः ।
यो द्विजेन्द्रैरलंचक्रे ब्रह्मभिर्भूगतैरिव ॥ ३ ॥
तत्राभूद्भास्करप्रख्यो भास्करस्तेजसां निधिः ।
अलंकर्तुं दक्षिणाशां यश्चक्रे दक्षिणाऽयनम् ॥ ४ ॥
तस्याभूत्तनय प्रभूतविनयः श्रीसोढलः प्रौढधी-
र्येन श्रीकरणप्रवृद्धविभवं[1] भूवल्लभं भिल्लमम् ।
आराध्याखिललोकशोकशमनी कीर्त्तिः समासादिता
जैत्रे जैत्रपदं न्यधायि महती श्रीसिङ्घणे श्रीरपि ॥ ५ ॥
एकः क्ष्मावलये क्षितीश्वरमिलन्मौलीन्द्रनीलावलि-
[2]प्रोदञ्चद्युतिचित्रिताङ्घ्रिनखरश्रेणिर्नृपालाग्रणीः ।
श्रीमत्सिङ्घणदेव एव विजयी यस्य प्रतापानलो
विश्वव्याप्यपि दन्दहीति हृदयान्येव द्विषामुद्धुरः ॥ ६ ॥
तं प्रसाद्य सुधीधुर्यो गुणिनं गुणरागिणम् ।
गुणग्रामेण यो विप्रानुपकारैरतीतृपत् ॥ ७ ॥
ददौ न किं न किं जज्ञौ न दधौ का च संपदम् ।
कं धर्मं विदधौ नैष न बभौ कैर्गुणैरयम् ॥ ८ ॥
तस्माद्दुग्धाम्बुधेर्जातः शार्ङ्गदेवः सुधाकरः ।
उपर्युपरि सर्वान्यः सदौदार्यस्फुरत्करः ॥ ९ ॥

[1] ०प्रबुद्धविभव.
[2] प्रोदञ्चद्रुचि०

कृतगुरुपदसेवः प्रीणिताशेषदेवः
　कलितसकलशास्त्रः पूजिताशेषपात्रः ।
जगति विततकीर्त्तिर्मन्मथोदारमूर्तिः
　प्रचुरतरविवेकः शार्ङ्गदेवो ऽयमेकः ॥ १० ॥
नानास्थानेषु संभ्रान्ता परिश्रान्ता सरस्वती ।
सहवासप्रिया शश्वद्विश्राम्यति तदालये ॥ ११ ॥
स विनोदैकरसिको भाग्यवैदग्ध्यभाजनम् ।
धनदानेन विप्राणामार्तिं संहृत्य शाश्वतीम्[1] ॥ १२ ॥
जिज्ञासूनां च विद्याभिर्गदार्तानां[2] रसायनैः ।
अधुना ऽखिललोकानां तापत्रयजिहीर्षया ॥ १३ ॥
शाश्वताय च धर्माय कीर्त्यै निःश्रेयसाप्तये[3] ।
आविष्करोति संगीतरत्नाकरमुदारधीः ॥ १४ ॥

(क०) अथ ग्रन्थकारः शार्ङ्गदेव स्वदेशवंशवृत्तप्रशसापूर्वक ग्रन्थस्य प्रयोजनविषयौ निर्दिशति—**अस्ति स्वस्तिगृहमित्यारभ्य संगीतरत्नाकर-मुदारधीरित्यन्तेन** ग्रन्थसंदर्भेण ॥ २—१४ ॥

(सु०) एव मङ्गलाचरण विधायाभिधेय च सप्रयोजनमुक्त्वा ग्रन्थस्य कर्ता स्वय ग्रन्थे वैशिष्ट्यप्रतिपादनाय स्ववश कथयति—अस्तीति । अस्तीति वर्तमानप्रयोगेण वशस्याकल्पावस्थायित्व सूचयति । स्वस्तीत्यव्यय कल्याण-वाचकम्, कल्याणस्य गृहमाश्रयः । श्रीमान्यः काश्मीरदेशस्तस्मात्सभवो यस्य । वृषगणनाम्न ऋषेर्जातः, वृषगणगोत्रजात इत्यर्थः ॥ वशस्य धार्मिकत्व कथयति—

[1] ०मार्ती सहृत्य शाश्वती
[2] ०र्गदिना च
[3] निःश्रेयसाय च

सदाशिवः शिवा ब्रह्मा भरतः कश्यपो मुनिः ।
मतङ्गो याष्टिको दुर्गा शक्तिः शार्दूलकोहलौ ॥ १५ ॥
विशाखिलो दत्तिलश्च कम्बलो ऽश्वतरस्तथा ।
वायुर्विश्वावसू रम्भा ऽर्जुनो नारदतुम्बुरू ॥ १६ ॥

यज्वभिरिति । यज्वभिर्याज्ञिकैरलकृतः । यस्मिन्वश एवविधाः समुत्पन्ना इत्यर्थ. ॥ तस्मिन्वशे समुत्पन्न विशिष्ट मूलपुरुष कथयति—तत्रेति । सूर्यसदृशो भास्करनामा तेजसा निधिर्ब्रह्मवर्चसाश्रय., पक्षे कान्त्याश्रयः, दक्षिणाऽऽयन काश्मीरदेशाद्दक्षिणा दिश प्रत्यागमनम् , अथ वा दक्षिणाया देयद्रव्यस्यायन पात्रप्रापण चक्रे, दक्षिणाना प्रवीणानामाशा वाञ्छामलकर्तुम् । सूर्यपक्षे दक्षिणाऽयन प्रसिद्धमेव ॥ ग्रन्थस्य कर्ता स्वपितर कथयति—तस्येति । भिल्लम भिल्लमनामान राजानम् । जैत्रे जैत्र-नामनि नगरे ॥ स्वस्वामिन सिङ्घणभूप वर्णयति—एक इति । यस्य प्रतापा-नलो विश्वव्याप्यपि द्विषा हृदयान्येव दहतीति कारणे सत्यपि कार्यानुदयाद्विशेषो-क्तिरलकारः ॥ सिङ्घणदेवप्रसादप्रभाव कथयति—तं प्रसाद्येति । त सिङ्घण गुणग्रामेण गुणसमूहेन प्रसाद्य प्रसन्न कृत्वा । गुणरागिणमिति साभिप्रायविशे-षणत्वात्परिकरालकारः । उपकारैरुपकारसाधनैर्द्रव्यवस्त्रान्नादिभि' ॥ कि न ददौ ? सर्वमेव ददावित्यर्थः । एव न कि जज्ञावित्यादिषु ॥ य एवंविधः सोढलनामा तस्मा-त्क्षीरसमुद्राच्छार्ङ्गदेवश्चन्द्र उत्पन्न इति सबन्ध । उपर्युपरीति । उपरिशब्द-स्याम्रेडितत्वात्सर्वानिति द्वितीया ॥ ग्रन्थे वैशिष्ट्यप्रतिपादनार्थमात्मान वर्णयति — कृतेति ॥ स्ववैदुष्य प्रकटयति—नानेति । सहवास' काश्मीरदेशे सरस्वत्यव-स्थानाच्छार्ङ्गदेवस्यापि काश्मीरदेश उत्पन्नत्वात् ॥ स इति । स शार्ङ्गदेव. सगीतरत्नाकरमाविष्करोति रचयतीति सबन्ध । नि श्रेयसाप्तये मोक्षप्राप्तये, मद्रकादीना प्रकरणाख्याना गीतानाम् 'शिवस्तुतौ प्रयोज्यानि मोक्षाय विदधे विधिः' इति मोक्षहेतुत्वस्य वक्ष्यमाणत्वात् ॥ २—१४ ॥

(क०) इह शास्त्रे प्रेक्षावत्प्रवृत्तये सदाशिवाद्यनेकप्रामाणिकपरिग्रहं दर्शयित्वा तन्मतसारसंग्रहत्वेन स्वकीयस्य ग्रन्थस्यातिशयितत्वं द्योतयति—

आञ्जनेयो मातृगुप्तो रावणो नन्दिकेश्वरः ।
स्वातिर्गणो बिन्दुराजः क्षेत्रराजश्च राहलः ॥ १७ ॥
रुद्रटो नान्यभूपालो भोजभूवल्लभस्तथा ।
परमर्दी च सोमेशो जगदेकमहीपतिः ॥ १८ ॥
व्याख्यातारो भारतीये लोल्लटोद्भटशङ्कुकाः ।
भट्टाभिनवगुप्तश्च श्रीमत्कीर्त्तिधरः परः ॥ १९ ॥
अन्ये च बहवः पूर्वे ये संगीतविशारदाः ।
अगाधबोधमन्थेन तेषां मतपयोनिधिम् ॥ २० ॥
निर्मथ्य श्रीशार्ङ्गदेवः सारोद्धारमिम व्यधात् ।
गीतं वाद्यं तथा नृत्तं त्रयं संगीतमुच्यते ॥ २१ ॥

सदाशिवः शिवेत्यादिना सारोद्धारमिमं व्यधादित्यन्तेन । सारोद्धारो नवनीत तमिममिति व्यस्तरूपणम्, सारस्योद्धारो यस्मिन्कर्मणीति क्रिया-विशेषणं वा ॥ १५—२०- ॥

(सु०) ननु सदाशिवभरतादिप्रणीतेषु सगीतग्रन्थेषु सत्सु [1]किमनेनाफल-निर्माणक्लेशेनेत्यत आह—सदाशिव इति । एतेषा मतपयोनिधि निर्मथ्य सारोद्धार-मिम व्यधादकार्षीत् । अतश्च ते विततता दुर्ग्रहा बहवश्च ग्रन्था अचिरजीविभिर्मनु-ष्यैरालोडयितुमशक्या इत्यल्पप्रयासेनैव सकलसगीतरहस्यावबोधसिद्धेर्नास्य प्रया-सस्य वैफल्यमिति, एतानि च शास्त्राण्यालोच्य कृतत्वेनास्य समूलत्वात्प्रेक्षा-वद्भि प्रमाणत्वेनोपादेयो ऽयमित्यप्यनेन कथयति ॥ १५—२०- ॥

(क०) ननु, 'आविष्करोति सगीतरत्नाकरमुदारधी·' इति प्रति-ज्ञाया संगीतशब्देन लोकप्रसिद्धया गीतस्यैव ग्रन्थप्रतिपाद्यत्वं प्रतीयते न तु

[1] किमनेनाधुनिकनिर्मा०

मार्गो देशीति तद् द्वेधा तत्र मार्गः स उच्यते ।
यो मार्गितो विरिञ्च्याद्यैः[1] प्रयुक्तो भरतादिभिः ॥ २२ ॥
देवस्य पुरतः शंभोर्नियताभ्युदयप्रदः ।
देशे देशे जनानां यद्रुच्या हृदयरञ्जकम् ॥ २३ ॥

वाद्यनृत्तयोरित्याशङ्का परिजिहीर्षु सगीतशब्दार्थमाह—**गीतं वाद्यमिति** । यदि गीतमेव प्रतिपाद्येत तदा केवल गीतशब्द प्रयुञ्जीत न तु समुपसर्गयुक्तम् । ननु गीतस्यैव सम्यक्त्वद्योतनार्थ समुपसर्ग इति चेन्न, 'रञ्जक स्वरसंदर्भो गीतमित्यभिधीयते' इति विशिष्टवचनादनुपसृष्टस्यैव तस्य गीतस्य सम्यक्त्वसिद्धे । समित्युपसर्गस्तु गीतशब्देन सह प्रयुज्यमानो गीते स्वेनावेयातिशयाभावाद्गीतस्यान्ययोगं द्योतयञ्शब्दत्वसामान्येन वाद्यस्य तदुभयाभिव्यञ्जकत्वेन[2] नृत्तस्य च गीतेन सबन्ध विशिनष्टि । तस्माद्यत्र सगीतशब्दस्य प्रयोगस्तत्र तौर्यत्रिक विवक्षितमिति मन्तव्यम् । क्वचिद्गीतमात्रे संगीतशब्दप्रयोगस्त्ववयवे ऽवयव्युपचारात्खण्डपटे पटव्यवहारवत् ॥ -२१ ॥

(सु०) सगीतग्रन्थो विरच्यत इत्युक्तम् । तत्र किमिद सगीतमित्यपेक्षायामाह—**गीतमिति** । नन्वेव समुदिताना सगीतत्व एकैकस्यासगीतत्वापत्तिः, नैवम्, गीतवाद्यनृत्तान्यतमत्वस्य सगीतशब्दप्रवृत्तिनिमित्तत्वात् ॥ -२१ ॥

(क०) तस्य सगीतस्य मार्गदेशीभेदेन द्वैविध्यं प्रतिज्ञाय तयोर्निरुक्तिपूर्वक लक्षणमाह—**मार्गो देशीत्यादिना** । मार्गितत्वान्मार्ग. । मार्गितत्वं च विरिञ्चयाद्यैर्ब्रह्मादिभि 'नाट्यसज्ञमिदं वेद सेतिहास करोम्य-

[1] विरिञ्चाद्यै
[2] ० व्यञ्जयत्वेन

गीतं च वादनं नृत्तं तद्देशीत्यभिधीयते ।
नृत्तं वाद्यानुगं प्रोक्तं वाद्यं गीतानुवर्ति च ॥ २४ ॥
अतो गीतं प्रधानत्वादत्रादावभिधीयते ।
सामवेदादिदं गीतं संजग्राह पितामह. ॥ २५ ॥

हम्' इति प्रतिज्ञाय चतुर्षु वेदेष्वन्विष्य कृतत्वात् । मार्गित इति 'मार्ग अन्वेषणे' इत्यस्माद्धातो कर्मणि निष्ठाया रूपम् । मार्ग इति तु तस्मादेव धातो कर्मणि घञन्तम् । देशीति, देशशब्देन तत्रत्या जना लक्ष्यन्ते, तैर्यथेच्छ क्रियमाणाया गीतादिक्रियायामाचार्यकृता संज्ञा । संगीतपदाभिधेयत्वेन नाट्य प्रत्यङ्गत्वेन च त्रयाणामप्यविशेषेण प्रतिपादने प्राथम्यप्रसक्तौ, तत्र 'गीतवाद्यप्रमाणेन कुर्याच्चाङ्गविचेष्टितम्' इति 'गीत चतुर्विधाद्वाद्याज्जायते चोपरज्यते, गीयते च' इति गीतस्य स्वेतरद्वयापेक्षितत्वेन प्राधान्य प्रसाध्य प्राथम्य प्रतिजानीते—**नृत्तं वाद्यानुगमिति** ॥ २२—२४- ॥

(सु०) तस्य सगीतस्य मार्गतादेशीत्वाभ्या द्वैविध्यमुक्त्वा मार्गस्य लक्षण कथयति—**यो मार्गित** इति । मार्गितो ऽन्वेषितो दृष्ट. । अनेन मार्गशब्दव्युत्पत्तिरपि सूचिता । देशीलक्षण कथयति—**देश** इति । गीतस्य पूर्वनिरूपणे कारणमाह —**नृत्तमिति** ॥ २२—२४- ॥

(क०) गीतस्य सामवेदसंग्रहरूपत्वेन वैदिकत्वादुपादेयत्व दर्शयति—**सामवेदादिदमिति** । तत्संग्रहरूपत्व च गीतस्यापि सप्तस्वरात्मकत्वात् । सामनि हि क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्याख्या सप्त स्वरा , इह तु त एव यथायोगं षड्जादिव्यपदेशभाज इति । ब्रह्मणा ऽपि वेदादुद्धृत्य संग्रहणे सार्ववर्णिकत्वं प्रयोजनमिति भाव ॥ -२५ ॥

गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः ।
गोपीपतिरनन्तो ऽपि वंशध्वनिवशं गतः[1] ॥ २६ ॥
सामगीतिरतो ब्रह्मा वीणाऽऽसक्ता सरस्वती ।
किमन्ये यक्षगन्धर्वदेवदानवमानवाः[2] ॥ २७ ॥
अज्ञातविषयास्वादो बालः पर्यङ्किकागतः ।
रुदन्गीतामृतं पीत्वा हर्षोत्कर्षं प्रपद्यते ॥ २८ ॥
वनेचरस्तृणाहारश्चित्रं मृगशिशुः पशुः ।
लुब्धो लुब्धकसंगीते गीते यच्छति जीवितम् ॥ २९ ॥
तस्य गीतस्य माहाऽऽत्म्यं के प्रशंसितुमीशते ।
धर्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥ ३० ॥

(सु०) गीतस्य समूलत्वमाह—सामवेदादिति । सजग्राह सग्रहेणोक्तवान् ॥ -२९ ॥

(क०) एतच्च न केवल वैदिकमित्युपादेयम् , कि त्वासर्वज्ञपार्वतीपत्याधीविकलपशु विगलितवेद्यान्तरतया ऽऽनन्दाविर्भावकत्वेन हृद्यत्वाच्चेत्याह—**गीतेनेत्या**दिना ॥ २६—२९ ॥

(सु०) गीतप्रयोजनमाह—**गीतेनेति** ॥ गीत स्तौति—**अज्ञातेति** । लुब्धो ऽनुरक्तः । लुब्धको व्याध ॥ २६—२९ ॥

(क०) प्रतिनियतसाधनानामपि धर्मार्थकाममोक्षाणामिदमेकमेव रमणीयं साधनं यतस्तस्मादस्य माहाऽऽत्म्यं वर्णयितुं न केचन शक्ता इत्याह—

[1] ०वशवद
[2] ०किन्नराः

तत्र स्वरगताध्याये प्रथमे प्रतिपाद्यते ।
शरीरं नादसंभूतिः स्थानानि श्रुतयस्तथा ॥ ३१ ॥
ततः शुद्धाः स्वराः सप्त विकृता द्वादशाप्यमी ।
कुलानि जातयो वर्णा द्वीपान्यार्षं च दैवतम् ॥ ३२ ॥

तस्येति । गीतस्य धर्मसाधनत्वं तावदश्वमेधप्रकरणे 'ब्राह्मणौ वीणागाथिनौ गायत　　ब्राह्मणो ऽन्यो गायेत्' इति श्रुतेर्देवार्चनादिषु गीतादेस्तदङ्गत्वेन परिग्रहाच्च सिद्धम् । अर्थसाधनत्वं लोकतो दृष्टम् । कामसाधनत्वं तु 'तस्माद्गायन्तं स्त्रिय. कामयन्ते' इति वेदतो लोकतश्च सिद्धम् । मोक्षसाधनत्वं च—

'वीणावादनतत्त्वज्ञ श्रुतिजातिविशारद ।
तालज्ञश्चाप्रयासेन मोक्षमार्ग स गच्छति ॥'

इति याज्ञवल्क्यस्मृते·, प्रकरणाख्यमद्रकादिगीतेषु 'शिवस्तुतौ प्रयोज्यानि मोक्षाय विदधे विधि·' इत्युक्तत्वाच्च ॥ ३० ॥

(सु०) धर्मार्थेति । परमेश्वराराधनार्थं गीयमान गीत धर्महेतु·, यथोक्तलक्षणाना जात्यादीना सम्यक्प्रयोगस्य 'अपि ब्रह्महण पापाज्जातयः प्रपुनन्त्यमू·' इत्यादिना धर्महेतुत्वस्य वक्ष्यमाणत्वात् । गीतोपजीविनामर्थसाधनम् । शृङ्गारस्योद्दीपनविभावरूपत्वात्कामसाधनम् । मद्रकादीना मोक्षसाधनत्व च वक्ष्यते ॥ ३० ॥

(क०) सप्ताध्याय्या रत्नाकरे प्रत्यध्यायं वस्तूनि संजिघृक्षन्नादौ स्वरगताध्याये शरीरादीन्पदार्थान्संगृह्य प्रतिपादयितुं प्रतिजानीते—**तत्र स्वरगताध्याय** इत्यादिना । एतावान्वस्तुसंग्रह· प्रतिपाद्यत इति योजना ।

छन्दांसि विनियोगाश्च स्वराणां श्रुतिजातयः ।
ग्रामाश्च मूर्च्छनास्तानाः शुद्धाः [1]कूटाश्च संख्यया ॥ ३३ ॥
प्रस्तारः खण्डमेरुश्च नष्टोद्दिष्टप्रबोधकः ।
स्वरसाधारणं जातिसाधारणमतः परम् ॥ ३४ ॥
काकल्यन्तरयोः सम्यक्प्रयोगो वर्णलक्षणम् ।
त्रिषष्टिरप्यलंकारास्त्रयोदशविधं ततः ॥ ३५ ॥
जातिलक्ष्म ग्रहांशादि कपालानि च कम्बलम् ।
नानाविधा गीतयश्चेत्येतावान्वस्तुसंग्रहः ॥ ३६ ॥

स्वरगताध्याय इति । स्वराननुगताः स्वरगता श्रुतिग्रामम्मूर्च्छनातान-वर्णालकारजातिगीत्यादयो विधेया, तेषामध्याये । अधीतिरेवाध्याय इति भावे घञन्त । अधीयते ऽनेनाभिप्रेतो ऽर्थो ऽस्मिन्वेत्यध्याय इति 'अकर्तरि च-' इति करणाधिकरणयोर्वा । यद्वा, अधीत्यधिकारे, अयनमाय, आयो ऽर्थावगति, अर्थावगतिमधिकृत्य प्रवृत्तो ग्रन्थो ऽध्याय । अथ वा, ईयते गम्यत इत्यायो ऽर्थ, तमधिकृत्य प्रवृत्तो ग्रन्थो ऽध्यायः । ननु, पूर्वत्र गीतस्य प्रतिपादने प्राथम्यं प्रतिज्ञातम्, इदानीं प्रथमे स्वरगताध्याय इत्यधिकृत्य शरीरादिप्रतिपादनस्य प्राथम्यमुच्यते, अतः प्रतिज्ञाप्रतिपादनयोर्भिन्नविषयत्वाद्वैयधिकरण्यमिति चेन्नैष दोष, स्वरगते शरीरादेः परपरया गीतं प्रत्युपकारकत्वात्स्वरगतप्रतिपादनं प्रकारान्तरेण गीतप्रतिपादनमेवेत्यविरोधात् । तत्र शरीरादित्रिंशत्पदार्थाना मध्ये केषाचित्कार्यकारणभावादिसंगतिवशादुद्देशक्रमो विवक्षितः, केषा-चित्तदभावेनाविवक्षितः । उत्तरत्रायमर्थः प्रकाश्यते ॥ ३१— ३६ ॥

[1] कूटा स्वसंख्यया

अथ रागविवेकाख्ये ऽध्याये वक्ष्यामहे क्रमात् ।
ग्रामरागांश्चोपरागान्रागान्भाषा विभाषिकाः ॥ ३७ ॥
ततो ऽप्यन्तरभाषाश्च रागाङ्गाण्यखिलान्यपि ।
भाषाऽङ्गाण्यप्युपाङ्गानि क्रियाऽङ्गाणि च तत्त्वतः ॥ ३८ ॥
ततः प्रकीर्णकाध्याये तृतीये कथयिष्यते ।
वाग्गेयकारो गान्धर्वः स्वरादिर्गायनस्तथा[1] ॥ ३९ ॥
गायनी गुणदोषाश्च तयोः शब्दभिदास्तथा ।
गुणदोषाश्च शब्दस्य शारीरं तद्गुणास्तथा ॥ ४० ॥
तद्दोषा गमकः स्थाया आलप्तिर्बृन्दलक्षणम् ।

(सु०) स्वरगताध्यायवस्तुसग्रह कथयति—तत्रेति । शरीर नादोत्पत्त्याश्रय । नादसभूतिर्नादोत्पत्तिप्रकारः । स्थानानि हृदयादीनि ॥ त्रयोदशविध जातिलक्ष्म—ग्रह , अश., तारः, मन्द्रः, न्यासः, अपन्यासः, सन्यासः, विन्यासः, बहुत्वम्, अल्पता, अन्तरमार्गः, षाडवम्, औडुवित चेति । अन्यत्सुगमम् ॥ ३१—३६ ॥

(क०) ततो द्वितीये ऽध्याये ग्रामरागादयो दशविधरागाः प्रतिपाद्यन्त इत्याह—**अथेति** । **रागविवेकाख्य** इति । रागाणा शुद्धकैशिकमध्यमादीना विवेको विवेचनमसंकीर्णतया स्वरूपनिरूपणमस्मिन्निति स तथोक्तः ॥ ३७, ३८ ॥

(सु०) द्वितीयाध्यायवस्तुसंग्रह कथयति—**अथ रागेति** । अखिलान्यपीति । प्राक्प्रसिद्धान्यधुना प्रसिद्धानि चेत्यर्थः ॥ ३७, ३८ ॥

(क०) तृतीये वाग्गेयकारादयो द्वादश पदार्था लक्ष्यन्त इत्याह—

[1] •र्गायकस्तथा.

ततः प्रबन्धाध्याये तु धातवो ऽङ्गानि जातयः ॥ ४१ ॥
प्रबन्धानां द्विधा सूडः शुद्धश्छायालगस्तथा ।
आलिक्रमप्रबन्धाश्च सूडस्था आलिसंश्रयाः ॥ ४२ ॥
विप्रकीर्णास्ततश्छायालगसूडसमाश्रिताः ।
गीतस्था गुणदोषाश्च वक्ष्यन्ते शार्ङ्गसूरिणा ॥ ४३ ॥
तालाध्याये पञ्चमे तु मार्गताला कलास्तथा ।
पाता मार्गाश्च चत्वारस्तथा मार्गकलाऽष्टकम् ॥ ४४ ॥
गुरुलघ्वादिमानं चैककलत्वादयो भिदाः ।
पादभागास्तथा मात्रास्ताले पातकलाविधिः ॥ ४५ ॥

ततः प्रकीर्णकेति । प्रकीर्णाः शास्त्रेषु तत्र तत्र विक्षिप्ताः पदार्था अत्रैकत्र समुच्चित्याधिक्रियन्त इति प्रकीर्णक ॥ ३९—४०- ॥

(सु०) तृतीयाध्यायवस्तुसग्रह कथयति—**तत इति** । तयोर्गायनीगायनयोः । शब्दभिदाः शब्दभेदाः खाहुलादयः । तद्गुणाः शारीरगुणाः । तद्दोषाः शारीरदोषाः । गमक स्वरस्य कम्पः । स्थाया गीतस्यावयवाः ॥ ३९—४०- ॥

(क०) चतुर्थे धातुप्रभृतीनि द्वादश वस्तूनि विस्तार्यन्त इत्याह—**ततः प्रबन्धाध्याय** इति । प्रबन्धानामेलादीनामध्याये ॥ ४१—४३ ॥

(सु०) चतुर्थाध्यायवस्तुसग्रह कथयति—**तत प्रबन्धेति** । धातवः प्रबन्धावयवा उद्ग्राहादयश्चत्वारः । अङ्गानि स्वरादीनि षट् । जातयो मेदिन्यादयः पञ्च । शुद्धः सूड एलादिः । छायालगः सूडो ध्रुवमण्ठादिः ॥ ४१—४३ ॥

(क०) पञ्चमे मार्गतालादय एकविशतिरर्थाः प्रपञ्च्यन्त इत्याह—**तालाध्याय** इति ॥ ४४—४७- ॥

अङ्गुलीनां च नियमो भेदा युग्मादयस्तथा ।
परिवर्तो लयस्तेषां यतयो गीतकानि च ॥ ४६ ॥
छन्दकादीनि गीतानि तालाङ्गनिचयस्तथा ।
गीताङ्गानि च वक्ष्यन्ते देशीतालाश्च तत्त्वतः ॥ ४७ ॥
निःशङ्कशार्ङ्गदेवेन तालानां प्रत्ययास्तथा ।
षष्ठे नानाविधं वाद्यमध्याये कथयिष्यते ॥ ४८ ॥
सप्तमे नर्तनं नानारसभावाः क्रमेण च ॥

(सु०) पञ्चमाध्यायपदार्थसग्रहमाचष्टे—**तालाध्याय** इति । मार्गताला-श्चचत्पुटादय' । कला निःशब्दक्रिया' । पाता' सशब्दक्रियाः । मार्गाश्चत्वारो ध्रुवादयः । कलाऽष्टक ध्रुवकादि । परिवर्त' पादभागादेरावृत्तिः । लयस्तालक्रिया-ऽन्तरालवर्ती कालः । यतिर्लयप्रवृत्तिनियमः । गीतानि मद्रकादीनि सप्त । देशीताला विशत्युत्तर शतमादितालादयः । प्रतीयन्ते यैस्तालसख्यास्वरूपादय इति प्रत्यया प्रस्तारनष्टोद्दिष्टादयः ॥ ४४—४७- ॥

(क०) षष्ठे ततादिचतुर्विधवाद्यानामवान्तरभेदेनानेकप्रकारं वाद्यं निगद्यत इत्याह—**षष्ठे नानाविधमिति** ॥ सप्तमे प्रतिपाद्यानाह—**सप्तम** इति । नर्तनमिति नाट्यनृत्यनृत्ताना गात्रविक्षेपरूपाणा सामान्यवचनम् । **नानारसभावा** इति । शृङ्गारादयो नव रसा । विभावादय पञ्चविधा भावा. । **क्रमेणेति** । उद्देशक्रमेणेत्यर्थ ॥ -४८, ४८- ॥

(सु०) षष्ठसप्तमाध्याययोर्वस्तुसग्रह कथयति—षष्ठ इति ॥ -४८, ४८- ॥

इति प्रथमे स्वरगताध्याये पदार्थसंग्रहाख्यमादिम प्रकरणम् ॥ १ ॥

अथ द्वितीयं पिण्डोत्पत्तिप्रकरणम्

गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते ।
तद्गानुगतं नृत्तं नादाधीनमतस्त्रयम्[1] ॥ १ ॥
नादेन व्यज्यते वर्णः पदं वर्णात्पदाद्वचः ।
वचसो व्यवहारो ऽयं नादाधीनमतो जगत् ॥ २ ॥
आहतो ऽनाहतश्चेति द्विधा[2] नादो निगद्यते ।
सो ऽयं प्रकाशते पिण्डे तस्मात्पिण्डो ऽभिधीयते ॥ ३ ॥

(क०) ननु गीतनिदानत्वेन स्वरगते नादस्य प्रथमं प्रतिपाद्यत्वमस्तु, कि शरीरनिरूपणेनेत्याशङ्क्य, नादमात्रस्य शरीरमन्तरेण प्रकाशाभावादिति परिहरञ्शरीर निरूपयितुमाह—**गीतं नादात्मकमिति** । अयमर्थ —न केवल गीतादित्रयस्य नादाधीनत्वम्, वाङ्मूलस्य सर्वलोकव्यवहारस्यापि नादाधीनत्वात्तदाधार शरीरमादौ सुतरा निरूपणीयमेवेति ॥ १—३ ॥

(सु०) एव पदार्थसग्रहमुक्त्वा नादाभिव्यक्तेः स्थान शरीर कथयितु नादं स्तौति—गीतमिति । नादात्मक नाद आत्मा स्वरूप यस्य । वाद्य वीणादि नादाभिव्यक्त्यैव प्रशस्यते रमणीयतामुपैति । नृत्त तद्द्वयानुगतम्, 'अङ्गेनालम्बयेद्गीतम्' इत्युक्तत्वात् । अतः, त्रय गीतनृत्तवाद्यरूप नादाधीन नादापेक्षमित्यर्थः ॥ न केवल गीतनृत्तवाद्यमेव नादापेक्षम्, अपि तु सर्व जगदित्याह—नादेनेति । नादेन ध्वनिना वर्णः ककारादिर्व्यज्यते । को ऽय ध्वनिः ? यो ऽय वर्णविशेषमप्रतिपद्यमानस्य दूरात्कर्णपथमवतरति मन्दत्वतीव्रत्वादिभेद च वर्णेष्वासञ्जयति स ध्वनिरित्युच्यते । वर्णात्पद घट इत्यादि । पदाद्वचो वाक्य पदसमु-

[1] ०मिद त्रयम् .
[2] द्वेधा

अस्ति ब्रह्म चिदानन्दं स्वयंज्योतिर्निरञ्जनम् ।
ईश्वरं लिङ्गमित्युक्तमद्वितीयमजं विभु ॥ ४ ॥
निर्विकारं निराकारं सर्वेश्वरमनश्वरम् ।
सर्वशक्ति च सर्वज्ञं तदंशा जीवसंज्ञकाः ॥ ५ ॥

दायः । वचसो वाक्याच्छाब्दो ऽय व्यवहारः । अतः सर्व जगदपि नादाधीन-मित्यर्थः । मतङ्गेनापि बृहद्देश्यामुक्तम्—

'न नादेन विना गीत न नादेन विना स्वरा. ।
न नादेन विना नृत्त तस्मान्नादात्मक जगत् ॥
नादरूप स्मृतो ब्रह्मा नादरूपो जनार्दन ।
नादरूपा परा शक्तिर्नादरूपो महेश्वर ॥
यदुक्त ब्रह्मण. स्थान ब्रह्मग्रन्थिश्च य स्मृत' ।
तन्म०ये सस्थित प्राण. प्राणाद्वह्निसमुद्भव [1] ॥
वह्निमारुतसयोगान्नादः समुपजायते ।
नादादुत्पद्यते बिन्दुस्तत सर्व[2] च वाङ्मयम् ॥' इति ।

नादद्वैविध्य कथयति—**आहत** इति । द्विविधो ऽपि नादः पिण्डे प्रकाशते प्रकटीभवति ॥ १—३ ॥

(क०) तच्च शरीर जीवकर्मायत्तम् । स च जीवो जिज्ञास्यमान स्वाशि ब्रह्मापेक्षत इति तस्मिञ्जिज्ञासिते तत्स्वरूप निरूपयति—**अस्ति ब्रह्मेति** । चिदानन्दं ज्ञानसुखस्वरूपम् । स्वयज्योति स्वय प्रकाशमानम् । निरञ्जनं निर्लेपम् । ईश्वरं स्वतन्त्रम् । प्रपञ्चलयनाल्लिङ्गम् । अद्वितीयं स्वसदृशवस्त्वन्तररहितम् । अजं जन्मरहितम् । विभु व्यापकम् । निर्विकारम्, जायते ऽस्ति वर्धते विपरिणमते ऽपक्षीयते विनश्यतीति षड् भाव-

[1] ०समुद्गम
[2] ०र्नादात्सर्व

अनाद्यविद्योपहिता यथा ऽग्नेर्विस्फुलिङ्गकाः ।
दार्वाद्युपाधिसंभिन्नास्ते कर्मभिरनादिभिः ॥ ६ ॥

विकारा, तै रहितम् । निराकारमाकारशून्यम् । सर्वेश्वरं सकलजगत्कर्तृ । अनश्वरं नाशरहितम् । सर्वशक्ति इच्छाज्ञानक्रियाभोगशक्तियुक्तम् । सर्वज्ञम् अतीतानागतवर्तमानसकलपदार्थवेदितृ । इत्युपनिषदुक्तं ब्रह्मास्ति । ब्रह्म-स्वरूपमुक्त्वा तत्तादात्म्येन जीवास्तेषा देहसंबन्धं च निरूपयति—**तदंशा** इति । तस्य ब्रह्मणो ऽंशा मात्रा ॥ ४, ५ ॥

(सु०) इति देहाभिधान प्रतिज्ञाय तन्मूलकारण कथयति—**अस्तीति** । सर्वदा सर्वत्रापि सत्, नित्य व्यापक चेत्यर्थः । ब्रह्म बृहत्त्वाद् बृहणत्वाद्वा । चिद्विज्ञानरूपम्, आनन्द सुखस्वरूपम्, 'विज्ञानमानन्द ब्रह्म' इति श्रुतेः । स्वयज्योतिः स्वप्रकाशम्, 'तमेव भान्तमनु भाति विश्व तस्य भासा सर्वमिद विभाति' इति श्रुतेः । निरञ्जनमविद्यालेपशून्यम्, अविद्याया जीवाश्रयत्वात् । ब्रह्माश्रयाविद्यापक्षे ऽपि स्वाश्रयाव्यामोहकत्व निरञ्जनपदेनोच्यते । ईश्वर कर्तुम-कर्तुमन्यथा कर्तु वा शक्तम् । लिङ्ग कारणम् । अद्वितीयं सजातीयविजातीयस्व-गतभेदशून्यम् । अजमकारणकम् । विभु व्यापक समर्थ वा । निर्विकार जायते ऽस्ति वर्धते विपरिणमते ऽपक्षीयते विनश्यतीति यास्कोदितसर्वविकारशून्यम् । निराकार मूर्त्यनवच्छिन्नम् । सर्वेश्वर सर्वेषा ब्रह्मादीनामपि शासकम् । अनश्वरमविनाशि । सर्वशक्ति सर्वा सर्वस्य प्रपञ्चस्य कारण या सा शक्तिर्माया-ऽऽख्या विद्यते ऽस्मिन्निति । सर्वज्ञ सर्वविषयसाक्षात्कारवत् । तदशास्तदभिन्ना, यथा ऽग्नेर्विस्फुलिङ्गा अग्नित्वेनाग्नेरभिन्ना, अथ वा 'अशो नानाव्यपदेशात्' इति सूत्रोक्तत्वाज्जीवपरमात्मनोरशाशित्वपक्षमेव स्वीकृत्योक्तम् ॥ ४—५- ॥

(क०) अनाद्यविद्योपहिता । अनाद्यविद्या मूलाविद्या, अधिष्ठा-नस्य याथाऽऽत्म्याज्ञानमिति यावत् । तया ऽविद्ययोपहिता अवच्छिन्ना जीवसज्ञका भवन्ति । सच्चिदानन्दविभुस्वभावस्य वस्तुनो ऽविद्योपाधिव-

सुखदुःखप्रदैः पुण्यपापरूपैर्नियन्त्रिताः ।
तत्तज्जातियुतं देहमायुर्भोगं च कर्मजम् ॥ ७ ॥
प्रतिजन्म प्रपद्यन्ते तेषामस्त्यपरं पुनः ।
सूक्ष्मं लिङ्गशरीरं तदा मोक्षादक्षयं मतम् ॥ ८ ॥
सूक्ष्मभूतेन्द्रियप्राणावस्थाऽऽत्मकमिदं विदुः ।
जीवानामुपभोगाय जगदेतत्सृजत्यजः ॥ ९ ॥
स आत्मा परमात्मा च विश्रान्त्यै संहरत्यथ ।
तदेतत्सृष्टिसंहारं प्रवाहानादि संमतम् ॥ १० ॥

शादसत्त्वासर्वज्ञत्वदु खित्वपरिच्छिन्नत्वादिधर्मारोपे जीवव्यपदेश आविद्यिक इत्यर्थ । तत्र दृष्टान्तमाह—**यथा ऽग्नेरिति** । अशा इति शेषः । तेजोरूपस्याग्नेरशा दारुतृणमण्याद्युपाध्यवच्छिन्ना[1] यथा स्फुलिङ्गा इति व्यपदिश्यन्ते तद्वदिति । **ते कर्मभिरिति** । ते जीवा । क्रमेण सुखदु खप्रदैः पुण्यपापरूपै कर्मभिः । पुण्यकर्मणा सुखप्रदत्वं तावत् 'एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते' इति श्रुतेः । पापकर्मणा दु.खप्रदत्वं च 'एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' इति श्रुतेः । **अनादिभिरिति** । कर्तृत्वाद्यभिमानिन आत्मनो जीवत्वोपाधेरविद्याया अनादित्वाज्जीवकर्तृकाणा कर्मणामपि 'तदाकृत्युपरक्ताना व्यक्तीनामेकयोनिता' इत्यादिन्यायेन प्रवाहरूपविवक्षया ऽनादित्वम् । नियन्त्रिता बद्धा सन्त । तत्तज्जातियुतं मनुष्यत्वादिजातियुक्तं देहमायु कर्मजं भोगं च प्रतिजन्म जन्मनि जन्मनि प्रपद्यन्ते प्राप्नुवन्ति । कर्मभिर्नियन्त्रिता इत्यनेनैव जीवाना देहादिप्राप्तौ देहादीनामप्यविशेषेण कर्मजत्वे सिद्धे,

[1] ०तृणपर्णा०

भोगस्य पुन· कर्मजमिति विशेषणमिह जन्मनि क्रियमाणानि दृष्टफलकानि कृष्यादिकर्माणि प्रति जीवाना कर्तृत्वमपि नियतमेवेति वक्तुम् । **तेषामस्तीति** । तेषा स्थूलशरीरावच्छिन्नाना जीवानाम् अपर स्थूलशरीरादन्यत्सूक्ष्ममव्यक्तं लिङ्गशरीरमस्ति, 'अङ्गुष्ठमात्रः पुरुष' इत्यादिश्रुते. सिद्धमित्यर्थ. । तच्च आ मोक्षाच्चरमस्वरूपसाक्षात्कारपर्यन्तम् अक्षय स्वाविद्यावासनाऽनुच्छेदादविनाशि मत शास्त्रसिद्धम् । इद च लिङ्गशरीर सूक्ष्मभूतेन्द्रियप्राणावस्थाऽऽत्मकम्, भूतानि पृथिव्यादीनि, इन्द्रियाणि चक्षुरादीनि, प्राणा प्राणादय· पञ्च वायव., सूक्ष्माणामव्यक्तरूपाणामेतेषामन्तरिन्द्रियेण मनसा सघातत्वेनावस्था ऽवस्थानमात्मा स्वरूपं यस्य तत्तथोक्तम् । केचित् 'न कदाचिदनीदृश जगत्' इति जगत एव प्रवाहरूपेण नित्यत्वमङ्गीकुर्वन्ति, तन्मतनिरासार्थं जगत्सृष्टिसहारयोः सप्रयोजनमात्मकर्तृकत्वमाह—जीवानामिति । जीवानामुक्तदेहद्वयाभिमानिनामुपभोगाय सुखदु·खानुभवाय जगद्भूतभौतिकात्मकम् । अज· परमात्मा । स आत्मेत्यन्वय· । परत्वमप्यात्मनो निकृष्टजीवापेक्षयेश्वरत्वमापन्नमित्यर्थ । स आत्मेति पूर्वोक्तं ब्रह्म परामृश्यते । चकारो भिन्नक्रम· । संहरति चेत्यन्वय । अथ सृष्टस्य जगतः स्थित्यनन्तरम् । विश्रान्त्यै, जीवानामित्यनुषञ्जनीयम्, सृष्टिसहारयोरुक्तरीत्या जीवार्थत्वात् । जीवानादित्वद्योतनाय तयो प्रवाहानादित्वमाह—**तदेतदिति** । सृष्टिश्च सहारश्च सृष्टिसंहारमिति द्वद्वैकवद्भावे नपुसकत्वम् । प्रवाहानादीति । व्यक्तिविवक्षया सादित्व सतानरूपेणानादित्वमित्यर्थ ॥ ६—१० ॥

(सु०) ननु विषमो दृष्टान्तः, स्फुलिङ्गाना स्थूलत्वसूक्ष्मत्वादिविरुद्धधर्मससर्गेण भिन्नत्वात्, अत आह—**दार्वादीति** । आदिशब्देनाबिन्धनस्य वैद्युतस्याग्नेरुदकोपाधिग्रहणम् । अतश्चौपाधिकः स्फुलिङ्गादौ भेदो न तात्त्विक इत्यर्थः । तेषा जीवाना कर्मनिबद्धत्व कथयति—**ते कर्मभिरिति** । ननु ब्रह्मा-

ते जीवा नात्मनो भिन्ना भिन्नं वा नात्मनो जगत् ।
शक्त्या सृजन्नभिन्नो ऽसौ सुवर्णं कुण्डलादिव ॥ ११ ॥
सृजत्यविद्ययेत्यन्ये यथा रज्जुर्भुजंगमम् ।

भिन्नाना जीवाना कथ कर्मबन्ध इत्यत आह—अनादिभिरिति । ते जीवा· प्रतिजन्म तत्तज्जातियुत मनुष्यत्वगोत्वादिजातियुक्त देहमायुरुपभोग च कर्म-व्यापारज तत्तज्जात्यनुरूप प्रपद्यन्ते । ननु जीवाना स्थूलदेहनिबद्धत्वे कथमनेक-जन्मप्राप्ति स्थूलदेहस्य विनाशोपलब्धेरित्यत्राह—तेषामस्त्यपरमिति । आ मोक्षात्, मोक्ष मर्यादीकृत्य । किविध लिङ्गशरीरमित्यपेक्षायामाह—सूक्ष्मेति । पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, एव षोडशकलमित्यर्थः । ननु परमेश्वरस्य जगतः सृष्टिसहारयो· कि प्रयोजनम्? अत आह—जीवानामिति । अनादित्वाच्च तयोर्नाय पर्यनुयोग इत्याह—तदेतदिति । सृष्टिसहारयो· समाहारः सृष्टिसहार प्रवाहानादित्वेन समतम् ॥ ६—१० ॥

(क०) अंशाशिभावेनात्मनो जीवाना चाभेदमभिदधत्कार्यकारण-भावेनात्मनो जगतश्चाभेदं भेदाभेदमतानुसारेण सदृष्टान्तमाह—**ते जीवा** इति । असावात्मा शक्त्या स्वगतक्रियाशक्त्या जगत्सृजंस्तस्मादभिन्न· । विभक्तिविपरिणामेन जगत्पदस्यानुषङ्ग· कर्तव्य· । यथा सुवर्णकुण्डलयोस्ता-दात्म्यं तद्वदित्यर्थ. । यथा ऽऽहु —

'कार्यरूपेण नानात्वमभेद कारणात्मना ।
हेमात्मना यथा ऽभेद कुण्डलाद्यात्मना भिदा ॥' इति ।

मुख्यवेदान्तिमतमवलम्ब्याह—**सृजतीति** । अन्ये वेदान्तिनः । अविद्यया ऽधिष्ठानाज्ञानेन । तत्र दृष्टान्त —यथा रज्जुर्भुजंगममिति । एतेन प्रपञ्च-स्यातत्त्वतो ऽन्यथाभावाद् ब्रह्मविवर्तत्वं दर्शितम् ॥ ११, ११- ॥

[1] 'तेजोवदात्मनो भिन्नाभिन्नया वा ऽऽत्मनो जगत् ।'

आत्मनः पूर्वमाकाशस्ततो वायुस्ततो ऽनलः ॥ १२ ॥
अनलाज्जलमेतस्मात्पृथिवी समजायत ।
महाभूतान्यमून्येषा विराजो ब्रह्मणस्तनुः ॥ १३ ॥

(सु०) स परमेश्वरो जगतो भिन्नो ऽभिन्नो वेत्यपेक्षायामाह—तेजोवदिति। आत्मन. शक्त्या जगत्सृजन्भिन्नो न भवति। असौ परमेश्वरः। कथभूतया शक्त्या? तेजोवत् आत्मनो भिन्नाभिन्नया। यथा तेज· सूर्याद्भिन्नमित्युच्यते 'सूर्यस्य तेजः' इति, अभिन्नमपि व्यपदिश्यते 'सूर्यस्तेजः' इति। दृष्टान्तान्तरमाह—सुवर्णमिति। कुण्डलात्सुवर्णत्वेनाभिन्न सुवर्ण कुण्डलत्वेन च भिन्नम्। वेदान्तिना मतेन प्रपञ्चस्याविद्यिकत्व कथयति—सृजतीति। यथा रज्जुः स्वाज्ञानात् 'भुजगो ऽयम्' इति कल्पित भुजंग सृजति, तथा परमेश्वरो ऽप्यधिष्ठानभूतस्य स्वस्याज्ञानाद्दियदादिप्रपञ्चमित्यर्थः ॥ ११, ११- ॥

(क०) भूतादिसृष्टिक्रमेण भौतिकं पिण्डं सप्रभेदं निरूपयति—आत्मनः पूर्वमित्यादिना। आत्मन· कारणभूतात्, पूर्वं वाय्वादिभ्यः प्रथमम्, आकाश उत्पन्न इत्यर्थ । तत इति तच्छब्देनाकाश परामृश्यते। तस्मादाकाशात्कारणभूताद्वायुरुत्पन्न इत्यर्थः। ततो ऽनल इत्यत्रापि वायोरनल ममजायतेत्यर्थ·। तथा च श्रुतिः 'आत्मन आकाशः संभूतः, आकाशाद्वायु' इत्यादि.। अमून्याकाशादीनि महाभूतानि। विराजो ब्रह्मणो महाभूतोपहितस्य ब्रह्मण एषा तनुरिति संबन्धः। एषेति पुरोवर्तितया निर्देशो भूतसंघातस्य सकललोकप्रत्यक्षत्वेन। विराज इति, आत्मा महाभूतानि सृष्ट्वा तान्यनुप्रविश्य तदभिमानित्वेन विराडित्युच्यते, तस्य। अमून्येषा तनुरिति 'उद्दिश्यमानप्रतिनिर्दिश्यमानयोरैक्यं प्रतिपादयन्ति सर्वनामानि पर्यायेण तत्तल्लिङ्गभाञ्जि भवन्ति' इति भिन्नलिङ्गतोपपत्ति ॥ -१२, १३ ॥

ब्रह्म ब्रह्माणमसृजत्तस्मै वेदान्प्रदाय च ।
भौतिकं वेदशब्देभ्यः सर्जयामास तेन तत् ॥ १४ ॥
तदाज्ञया ऽसृजद् ब्रह्मा मनसैव प्रजापतीन् ।
तेभ्यस्तु रैतसी सृष्टिः शरीराणां निरूप्यते ॥ १५ ॥
स्वेदोद्भेदजराय्वण्डहेतुभेदाच्चतुर्विधम् ।
देहं यूकाऽऽदिनः स्वेदादुद्भेदात्तु लताऽऽदिनः ॥ १६ ॥
जरायोर्मानुषादीनामण्डात्त विहगादिन ।

(सु०) सृष्टिक्रम कथयति—आत्मन इति । पञ्चमहाभूतात्मिका विराड्-ब्रह्मणस्तनुरित्याह—महाभूतानीति ॥ -१२, १३ ॥

(क०) **ब्रह्म ब्रह्माण**मिति । ब्रह्म विराड्रूपं ब्रह्माण चतुर्मुखम-सृजत् । पुनस्तद्ब्रह्म तस्मै चतुर्मुखाय वेदान् ऋग्वेदादीन्प्रदाय तेन प्रयोज्येन कर्त्रा स्वयं प्रयोजकम्, वेदशब्देभ्य, वेद्येते अनेन धर्माधर्माविति वेद, तस्मिञ्शब्दा आकृत्यादिवाचका, तेभ्य कल्पान्तरातीतपदार्थस्मारकत्वेन निमित्तभूतेभ्य, भौतिकं पञ्चीकृतपञ्चमहाभूतात्मकं देहेन्द्रियादि सर्जयामास, भौतिकस्य सृष्टि कारितवदित्यर्थ. ॥ १४ ॥

(सु०) ननु हिरण्यगर्भ एव जगत' कर्तेति लोकप्रसिद्धि', कथमीश्वर' कर्तेत्युच्यते? अत आह—ब्रह्मेति । ब्रह्मेश्वरो ब्रह्माण हिरण्यगर्भमसृजत्, तस्मै च वेदान्प्रदाय भौतिक प्रपञ्च सर्जयामास सृजन्त ब्रह्माण प्रेरयामास । वेद-शब्देभ्य इति ल्यब्लोपे पञ्चमी । ततश्च वेदशब्दान्स्मारयित्वा ऽसर्जयत्, 'यो ब्रह्माण विदधाति पूर्व यो वै वेदाश्च प्रहिणोति तस्मै' इति श्रुतेः । ततश्च कर्तृत्व हिरण्यगर्भस्य, प्रयोजककर्तृत्व परमेश्वरस्येत्यर्थः ॥ १४ ॥

(क०) साक्षात्कर्तुश्चतुर्मुखाद्भौतिकसृष्टेः क्रममाह—**तदाज्ञये**ति । तस्य विराज आज्ञया । तेभ्यः प्रजापतिभ्यो रैतसी रेतोविकाररूपा ।

तत्र नादोपयोगित्वान्मानुषं देहमुच्यते ॥ १७ ॥
क्षेत्रज्ञः स्थित आकाश आकाशाद्वायुमागतः ।
वायोर्धूमं ततश्चाभ्रमभ्रान्मेघे ऽवतिष्ठते ॥ १८ ॥

रेत शब्देन शोणितमप्युपलक्ष्यते । स्वेदोद्भेदेति । स्पष्टो ऽर्थ । यूकाऽऽदिन इत्यादौ यूका ऽऽदिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहि ॥ १५—१६- ॥

(सु०) ब्रह्मा किमसृजदित्यपेक्षायामाह—तदाज्ञयेति । प्रजापतीन् दक्षादीन् । तेभ्य किमुत्पन्नमित्यपेक्षायामाह—तेभ्यस्त्विति । रेतस. समुत्पन्ना रैतसी । शरीराणा चातुर्विध्य कथयति—स्वेदोद्भेदेति । कि कस्मादुत्पन्नमित्यपेक्षायामाह—यूकाऽऽदिन इति ॥ १५, १६- ॥

(क०) उक्तचतुर्विधदेहमध्ये त्रिविधेषु यूकाऽऽदिदेहेषु लताऽऽदेरचेतनत्वात्, यूकाऽऽदेरतिसूक्ष्मत्वात्, विहगादे. संपूर्णधातुनाड्याद्यभावात्, जरायुजेष्वपि पश्वादिदेहस्य धातुनाड्यादिसंपूर्णतासद्भावे ऽपि तिर्यक्त्वेनोच्चारणाशक्तेश्च, पारिशेष्यान्मानुषं देहमेव नादोपयोगि, ततस्तस्यैवोत्पत्तिर्निरूप्यत इत्याह—तत्रेति ॥ -१७ ॥

(सु०) तेषु देहेषु मानुषदेहस्यैव विशेषतो निरूपणे कारणमाह—तत्रेति ॥ -१७ ॥

(क०) तस्य मानुषशरीरस्य रैतस्या सृष्टौ जीवस्याकाशादिपरंपरया गर्भसक्रमणमाह—क्षेत्रज्ञ इत्यादिना गर्भाशयगतं भवेदित्यन्तेन । क्षेत्रं शरीरम्, तज्जानाति अहमिति वा ममेदमिति वा वेत्तीति क्षेत्रज्ञो जीव, यदुक्तं भगवता—

'इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहु· क्षेत्रज्ञ इति तद्विदः ॥'

आहुत्या ऽऽप्यायितो ग्रस्तरसो ग्रीष्मे च भानुभिः ।
भानुर्मेघे घनरसं निधत्ते तं बलाहकः ॥ १९ ॥
यदा वर्षति वर्षेण सह जीवस्तदा भुवः ।
वनस्पत्योषधीर्जाताः संक्रामत्यविलक्षितः ॥ २० ॥
ताभ्यो ऽन्नं जातमन्नं तत्पुरुषैः शुक्रतां गतम् ।
शुद्धार्तवाया योषाया निषिक्तं स्मरमन्दिरे ॥ २१ ॥
सहार्तवेन शुद्धं चेद्गर्भाशयगतं भवेत् ।

इति । धूमज्योतिर्मरुता संघातो ऽभ्रम्, जलवत्तदेव मेघ । **आहुत्येति** । यजमानैर्मन्त्रपूर्वक देवतोद्देशेनाग्नौ प्रक्षिप्यमाण समिदन्नाज्यादि द्रव्यमाहुति, तया ऽऽप्यायित संतर्पित·, ग्रीष्मे भानुभि किरणैर्ग्रस्तरसो भूमेरात्तसारो भानु सूर्य । घनरसं जलम् । भुवो जाता वनस्पत्योषधीरित्यन्वय । अचाक्षुषत्वादविलक्षित । ताभ्य ओषधीभ्य । अन्नम्, अद्यत इत्यन्नमोदनादि । पुरुषैरन्न भुक्तं तदोदनादि । शुद्धार्तवाया, आर्तवं शोणितम् 'लाक्षारसशशास्राभं धौतं यच्च विरज्यते' इत्युक्तलक्षणम्, शुद्धमार्तव यस्यास्तस्या । **शुद्धं चेदिति** । शुक्रमपि 'शक्तं शुक्र गुरु स्निग्धं मधुरं बहुल बहु । घृतमाक्षिकतैलाभ सद् गर्भाय' इत्युपक्रम्य 'शुद्ध शुद्धार्तवम्' इत्युक्तत्वाच्छुद्धम् । **जीवकर्मेति** । तच्च शुक्रमाशयगतत्वमात्रेण गर्भ नारभते, कि तु जीवकर्मप्रेरितं जीवस्योत्पत्स्यमानदेहाभिमानिन कर्मभि प्रारब्धकर्मभि प्रेरित देहभावानुकूलक्रियया योजितं सदेव गर्भमारभते । अत्र गर्भशब्देन देहोपादानमाशयं गत. शुक्रशोणितसघात उच्यते ॥ १८—२२ ॥

(सु०) उत्पत्तिप्रकार कथयति—क्षेत्रज्ञ इति । क्षेत्रज्ञ आत्मा । अभ्रमित्यवर्षुक मेघशकलमुच्यते, मेघ इति वर्षुको मेघः । ननु मेघे कथमुदकप्राप्तिरित्यत

जीवकर्मप्रेरितं तद् गर्भमारभते तदा ॥ २२ ॥
द्रवत्वं प्रथमे मासि कललाख्यं प्रजायते ।
द्वितीये तु घन पिण्डः [1]पेशीषद्घनमर्बुदम् ॥ २३ ॥
पुंस्त्रीनपुंसकानां स्युः प्रागवस्थाः क्रमादिमाः ।
तृतीये त्वङ्कुरा· पञ्च कराङ्घ्रिशिरसो मताः ॥ २४ ॥

आह—आहुत्येति । आहुत्या यागादौ विहितया ऽऽप्यायितस्तर्पितः, सतुष्ट इति यावत्, भानुभि· किरणैर्ग्रस्तरस. स्वीकृतोदको भानु· सूर्यो मेघे घनरसमुदक निधत्ते । मेघवृष्टेनोदकेन सह जीवस्यौषध्यादिप्रवेशमाह—तं बलाहक इति । जीवस्यौषधीभ्यो ऽन्नशुक्रादिद्वारा गर्भप्रवेशमाह—ताभ्य इति ॥ १८—२२ ॥

(क०) एवमुक्तप्रकारेणाशयगतस्य गर्भस्य प्रथममासत आरभ्य नवममासपर्यन्तं प्रतिमासमवस्थाभेदान्दर्शयति—द्रवत्वमित्यादिना । कललाख्यं कललमित्याख्या यस्य तत्तथोक्तम् । कललमित्यगृहीतकाठिन्यस्य शुक्रशोणितसंघातस्य द्रवीभाव उच्यते । द्वितीये त्विति । घन पिण्डो जनिष्यमाणस्य पुंस प्रागवस्था, पेशी जनिष्यमाणाया· स्त्रिया. प्रागवस्था, ईषद्घनमर्बुदं जनिष्यमाणस्य नपुंसकस्य प्रागवस्था, इति क्रम· । घनः काठिन्ययुक्त·, पेशी चतुरश्रा मासप्राया, ईषद्घनं घनपेश्युभयसाधारणत्वात्तथोक्तम्, अर्बुद शाल्मलीमुकुलाकारम्, यथा ऽऽहु·—

'चतुरश्रा स्मृता पेशी वृत्त· पिण्डो घनः स्मृत· ।
शाल्मलीमुकुलाकारमर्बुद भिषजो विदु· ॥' इति ।

तृतीये त्विति । पूर्वोक्तघनपिण्डादे, कराङ्घ्रिशिरस, करौ चाङ्घ्री च शिरश्च कराङ्घ्रिशिर·, प्राण्यङ्गत्वाद् द्वंद्वैकवद्भाव., तस्य कराङ्घ्रिशिरस ।

[1] पेशी च घन०.

अङ्गप्रत्यङ्गभागाश्च सूक्ष्माः स्युर्युगपत्तदा ।
विहाय श्मश्रुदन्तादीञ्जन्मानन्तरसंभवान्[1] ॥ २५ ॥
एषा प्रकृतिरन्या तु विकृतिः संमता सताम् ।
चतुर्थे व्यक्तता तेषां [2]भावानामपि जायते ॥ २६ ॥
पुंसां शौर्यादयो भावा भीरुत्वाद्यास्तु योषिताम् ।
नपुंसकानां संकीर्णा भवन्तीति प्रचक्षते ॥ २७ ॥

अङ्कुरा इति । अङ्कुरा जायमाना एव कराङ्घ्रिशिरो भवन्तीति भाव्यवयवविवक्षया ऽय व्यपदेश· सूत्रशाटकन्यायेन । युगपदङ्कुरावस्थायामेव । अङ्गप्रत्यङ्गभागा इति । शिरोऽङ्कुरे ग्रीवानयननासिकाकर्णादिभागा, कराङ्कुरयोरसकूर्परमणिबन्धाङ्गुल्यादिभागा, अङ्घ्र्यङ्कुरयोरूरुजानुजङ्घागुल्फाङ्गुल्यादिभागा । सूक्ष्मा अव्यक्तरूपा ॥ **एषा प्रकृतिरिति** । जन्मानन्तरसंभवाञ्श्मश्रुदन्तादीन्विहायाङ्कुराद्यवस्थायामेव सूक्ष्मरूपाङ्गप्रत्यङ्गभागोत्पत्ति प्रकृति, जरायुजाना साधारण स्वभाव इति यावत् । **अन्या तु विकृतिरिति** । अन्या जन्मानन्तरभाविना श्मश्रुदन्तादीनामङ्गादिसमानकालमेवोत्पत्तिरङ्गादिषु केषाचिदनुत्पत्ति· स्थानव्यत्यासेनोत्पत्तिरङ्गुल्यादिसख्याया न्यूनाधिकभावश्च । **चतुर्थ** इति । तेषामङ्गप्रत्यङ्गभागाना व्यक्तता ऽभिव्यक्तता पृथगात्मता । भावानामपि शौर्यादीनामात्मधर्माणा लीनाना व्यक्तता ॥ २३—२७ ॥

(सु०) प्रतिमास गर्भस्यावस्थाविशेषमाह—द्रवत्वमिति । पुस्त्रीनपुसकाना क्रमात्प्रागवस्था आह—द्वितीय इति । पिण्डस्य पेशीसाम्य पुरुषावस्था, कठिनत्व स्त्र्यवस्था, अर्बुदत्वमकठिनत्व नपुसकावस्था ॥ श्मश्रुदन्तादीत्यादिशब्देन

[1] श्मश्रुदन्तादि जन्मानन्तरसभवात्
[2] भावानामुपजायते

मातृजं चास्य हृदयं विषयानभिकाङ्क्षति ।
अतो मातुर्मनोऽभीष्टं कुर्याद्गर्भसमृद्धये ॥ २८ ॥
तां च द्विहृदयां नारीमाहुर्दौहृदिनीं बुधाः ।
अदानाद्दोहदानां स्युर्गर्भस्य व्यङ्गताऽऽदयः ॥ २९ ॥
मातुर्यद्विषयालाभस्तदार्तो जायते सुतः ।
गर्भः स्यादर्थवान्भोगी दोहदाद्राजदर्शने ॥ ३० ॥
अलंकारेषु ललितो धर्मिष्ठस्तापसाश्रमे ।
देवतादर्शने भक्तो हिस्रो भुजगदर्शने ॥ ३१ ॥
गोधाऽशने तु निद्रालुर्बली गोमांसभक्षणे ।
माहिषे शुकरक्ताक्षं लोमशं सूयते सुतम् ॥ ३२ ॥

स्त्रीणा स्तनादि ज्ञातव्यम्, जन्मानन्तरसभवादिति हेतूक्ते ॥ चतुर्थे भावाः प्रकटीभवन्तीत्युक्तम्, तानेव भावान्विभज्य कथयति—पुंसामिति ॥२३ —२७॥

(क०) **मातृजं चेति** । अस्य गर्भस्य मातृज मातुर्जातं हृदयम्, चकारान्मातुर्हृदय च, तदुभय यतो विषयानभिकाङ्क्षति, अत इति सबन्ध । अयमर्थ —मातृहृदयसंबद्धस्य गर्भहृदयस्यैव विषयाभिलाषित्वात्तदा मातुरभीष्टमवश्य कर्तव्य गर्भसमृद्धिकामेनेति ॥ **दौहृदिनीमिति** ।. द्वयोर्हृदययो· समाहारो द्विहृदयम्, तस्य भावो दौहृदमिति पृषोदरादित्वात्साधु , तत्सबन्धाद्गर्भो ऽपि दौहृदमित्युच्यते , तद्दौहृदमस्या अस्तीति दौहृदिनी, ताम् । तदभीष्टाकरणे दोषमाह—**अदानादिति** । दोहदानाम्, दोहदं गर्भिणीमनोरथ·, तद्विषया अपि दोहदानि, तेषाम् ॥ तत्तद्दोहदवशादुत्पत्स्यमानस्योत्कर्षापकर्षावाह—**गर्भ· स्यादित्यादिना** । गर्भिण्या राजदर्शने

प्रबुद्धं पञ्चमे चित्तं मांसशोणितपुष्टता ।
षष्ठे ऽस्थिस्नायुनखरकेशरोमविविक्तता ॥ ३३ ॥
बलवर्णौ चोपचितौ सप्तमे त्वङ्गपूर्णता ।
पाल्यन्तरितहस्ताभ्यां श्रोत्ररन्ध्रे पिधाय सः ॥ ३४ ॥
उद्विग्नो गर्भसंवासादास्ते गर्भाशयान्वित ।
स्मरन्पूर्वानुभूताः स नानाजातीश्च यातना ॥ ३५ ॥

दोहदादभिलाषाद्गर्भ उत्पत्स्यमानो ऽर्थवान्भोगी च भवति । एवमुत्तरत्रापि द्रष्टव्यम् ॥ २८—३२ ॥

(सु०) मातृजमिति । मातृज मातृसबन्धि हृदयमस्याभीष्टान्विषयानभिकाङ्क्षति । अथ वा, अस्य गर्भस्य मात्रवयवेषु निष्पन्न मातृज हृदयमिति सबन्ध कर्तव्यः ॥ दौहृदिनीपद निर्वक्ति—ता चेति। दोहदादाने दोषमाह—अदानादिति। व्यङ्गता काणत्वान्धत्वपङ्गुत्वादि । आदिशब्देन दुर्बलत्व निरुत्साहत्वमित्यादि ज्ञातव्यम् ॥ दोहदविशेषेण गर्भे फलविशेषमाह—गर्भ स्यादिति ॥ माहिष इति । माहिषमासे दोहदिनी नारी शुकवद्रक्ताक्षमालोहितलोचन रोमश च सुतमपत्य सूते ॥ २८—३२ ॥

(क०) **पञ्चम** इति । प्रबुद्धम्, पूर्व लीनमन्त करणं तदा स्पन्दोन्मुखं भवति । **षष्ठ** इति । स्नायव सूक्ष्मसिरा, केशा शिरोजा, रोमाण्यङ्गरुहाणि, बलवर्णौ, बलं सत्त्वम्, वर्णो गौरताऽऽदि । **सप्तमे** त्विति । पाल्यन्तरितहस्ताभ्याम् । पालिरूरु, 'पालि स्त्र्यश्रयङ्कपङ्क्तिषु' इत्यभिधानात्, पालिभ्यामूरुभ्यामन्तरितावाच्छादितौ हस्तौ, ताभ्याम् । श्रोत्ररन्ध्रे पिधायेत्यनेनाधोमुखतया संकुचद्गात्रत्वमुक्तम् ॥ उद्विग्नो भीतः । गर्भाशयान्वितो जरायुग्रस्तदेहः । अभ्यासतत्पर इति । अभ्यासो नामात्र

मोक्षोपायमभिध्यायन्वर्तते ऽभ्यासतत्परः ।
अष्टमे त्वक्स्मृती[1] स्यातामोजश्चैतच्च हृद्भवम् ॥ ३६ ॥
शुद्धमापीतरक्तं च निमित्तं जीविते मतम् ।
पुनरम्बां पुनर्गर्भं चञ्चलं तत्प्रधावति ॥ ३७ ॥
अतो जातो ऽष्टमे मासि न जीवत्योजसोज्झित. ।
किंचित्कालमवस्थानं संस्कारात्खण्डिताङ्गवत् ॥ ३८ ॥
समयः प्रसवस्य स्यान्मासेषु नवमादिषु ।
मातू रसवहां नाडीमनुबद्धा पराऽभिधा ॥ ३९ ॥

संसारजिहासया पौन पुन्येनात्मचिन्तनम् ॥ **अष्टम** इति । त्वक्स्मृती स्यातामिति । यद्यपि त्वक्स्मृती सप्तमे ऽपि स्त , तथा ऽप्यत्र त्वच सान्द्रत्वं स्मृतेश्च विकल्पविषयत्वं भवतीत्यर्थ । ओजश्च स्यादित्यूह । ओज. शुक्लसार । एतदोजश्च हृद्भव हृन्निवासं शुद्ध दुष्टवाताद्यनुपहतम् आपीतरक्तमीषत्पीतरक्तवर्ण जीविते प्राणधारणे निमित्तं कारणं मतमित्यन्वयार्थ । तदोजश्चञ्चलमेकत्रानवस्थित सदम्बा गर्भ च मुहुर्धावति । तदुक्तं वाग्भटाचार्येण— 'ओजो ऽष्टमे संचरति मातापुत्त्रौ मुहु क्रमात्' इति । यतो ऽष्टमे ऽनवस्थितमोजो ऽत इत्यर्थ । अतो ऽष्टमे मासि जातो न जीवतीति न मासासाकल्यार्थ , अपि तु यदौजो गर्भ विहायाम्बा संक्रामेत्तदा जात ओजसोज्झितत्वान्न जीवतीत्यर्थ । यदा पुनरोजो ऽम्बा विहाय गर्भ संक्रामेत्तदा तु प्रसवे ऽम्बा न जीवति , यदा पुनरोजसः प्रधावनसमय एव प्रसवस्तदा तस्यैकत्राप्यनवस्थानादुभावपि न जीवत इति भाव । ननु लोके क्वचिदोजसोज्झितस्यापि गर्भस्य जन्मानन्तर किंचित्काल जीवतो ऽवस्थान दृश्यते, तत्कथमजीवनमित्याशङ्क्य सदृष्टान्तमुपपत्तिमाह— **किंचित्कालमिति** । संस्कारादोज·सचारसंस्कारात् । खण्डिताङ्गवत् , खण्डितं च

[1] त्वक्श्रुती

नाभिस्थनाडी गर्भस्य मात्राहाररसावहा ।
कृताञ्जलिर्ललाटेऽसौ मातृपृष्ठमभि स्थितः ॥ ४० ॥
अध्यास्ते संकुचद्गात्रो गर्भं दक्षिणपार्श्वगः ।
वामपार्श्वस्थिता नारी क्लीबं मध्यस्थितं मतम् ॥ ४१ ॥
क्रियते ऽधःशिराः सूतिमारुतैः प्रबलैस्ततः ।
निःसार्यते रुजद्गात्रो यन्त्रच्छिद्रेण बालकः ॥ ४२ ॥
जातमात्रस्य तस्याथ प्रवृत्तिः स्तन्यगोचरा ।
प्राग्जन्मबोधसंस्कारादिति जीवस्य नित्यता ॥ ४३ ॥

तदङ्गमिति कर्मधारय । खण्डितमङ्ग यथोत्तरक्षणे प्राणसंचारसंस्काराच्चेष्टमान दृश्यते तद्वदित्यर्थ ॥ **नवमादिष्विति** । क्वचिन्नवमे मासे प्रसव स्यात्क्वचिद्दशमे क्वचिदेकादशे ऽपीति दर्शयितुमादिशब्दग्रहणम् ॥ ३३—४१ ॥

(सु०) पञ्चमे मासि चित्त प्रबुद्धम्, ज्ञानवान्भवतीत्यर्थ । विविक्तता पृथक्त्वे सति प्रकटत्वम् ॥ उपचितौ वृद्धि प्राप्तौ । **पाल्यन्तरितेति** । पाली कर्णपाली, तया ऽन्तरिताभ्या व्यवहिताभ्या पाणिभ्या श्रोत्ररन्ध्रे पिधाय । उद्विग्नो वैराग्यमापन्न । गर्भशयो गर्भे ध्यानातिशय आत्मानुसधानम्, तेनान्वित । यातना पीडाः । मोक्षोपाय मोक्षसाधनमभिध्यायश्चिन्तयन् । अभ्यासतत्पर आत्मानुसधाननिष्ठः । अष्टममासावस्था कथयति—**अष्टम** इति । श्रुतिर्बहिःस्थस्य शब्दस्याकर्णन न तु श्रवणेन्द्रियम्, तस्याकाशस्वरूपत्वान्नित्यत्वेनानुत्पत्ते. । ओजो धातुविशेषः ॥ शुद्धमकलुषम् । ओजो जीविते निमित्तमित्युक्तम्, तदेव विशदयति—**पुनरम्बामिति** ॥ गर्भस्य कथ पुष्टिरित्यत आह—मातुरिति । नाडीमनुबद्धा तद्विमिश्रा । मातृपृष्ठमभि लक्षीकृत्य । दक्षिणपार्श्वग इति पुलिङ्गनिर्देशात्पुमानिति गम्यते ॥ ३३—४१ ॥

(क०) सूतिमारुतैरपानाख्यमारुतै । यन्त्रच्छिद्रेण योनिरन्ध्रेण ॥ तस्य जातस्य ॥ **मृदव** इति । मृदवो मृदुत्वयुक्ता । **ह्रीहेति** । जीवा-

भावाः स्युः षड्विधास्तस्य मातृजाः पितृजास्तथा ।
रसजा आत्मजाः सत्त्वसंभवाः सात्म्यजास्तथा ॥ ४४ ॥
मृदवः शोणितं मेदो मज्जा प्लीहा यकृद् गुदम् ।
हृन्नाभीत्येवमाद्यास्तु भावा मातृभवा मताः ॥ ४५ ॥
श्मश्रुलोमकचाः स्नायुसिराधमनयो नखाः ।
दशनाः शुक्रमित्याद्याः स्थिराः पितृसमुद्भवाः ॥ ४६ ॥
शरीरोपचयो वर्णो वृद्धिः सुप्तिर्बलं स्थितिः[1] ।
अलोलुपत्वमुत्साह इत्यादीन्रसजान्विदुः ॥ ४७ ॥

धिष्ठानभूतवामपार्श्वस्थितमासविशेषवाचक प्लीहन्शब्द । यकृदिति दक्षिण-पार्श्वस्थितस्तादृशो मासविशेष । स्नायुसिराधमनय , स्नायव सूक्ष्मनाड्य., सिरास्ततो ऽपि स्थूला , धमनय एरण्डकाण्डवत्स्थूला । स्थिरा. कठिना ॥ ४२—४६ ॥

(सु०) प्रसूतिप्रकार कथयति—क्रियत इति । सूतिमारुतैः प्रसूति-साधनैर्वायुभि । रुजद्गात्र पीडितदेहः । यन्त्रच्छिद्रेण, यन्त्राकारेण सूक्ष्मेण योनिरन्ध्रेणेत्यर्थ ॥ जातमात्रस्य स्तन्यपानादिप्रवृत्त्या जीवस्य नित्यत्व कथयति—जातमात्रस्येति ॥ भावभेदान्कथयति—भावा स्युरिति । रसो ऽन्नरस । सत्त्व-मन्तःकरणविशेषः । सात्म्य चिरपरिचयसस्कारविशेष ॥ मातृजान्भावान्क-थयति—मृदव इति । मृदवो मार्दवयुक्ताः प्रदेशा । प्लीहा यकृच्च हृदयस्थितौ मासखण्डविशेषौ । हृच्च नाभिश्च हृन्नाभीति समाहारद्वद्व । 'द्वद्वश्च प्राणितूर्य-सेनाऽङ्गानाम्' इत्येकवद्भाव ॥ ४२—४६ ॥

(क०) शरीरोपचय इत्यादिर्ग्रन्थविस्तरकातरा इत्यन्तो ग्रन्थो निगदव्याख्यात ॥ ४७—७४ ॥

[1] धृति

इच्छा द्वेषः सुखं दुःखं धर्माधर्मौ च भावना ।
प्रयत्नो ज्ञानमायुश्चेन्द्रियाणीत्यात्मजा मताः ॥ ४८ ॥
ज्ञानेन्द्रियाणि श्रवणं स्पर्शनं दर्शनं तथा ।
रसनं घ्राणमित्याहुः पञ्च तेषां तु गोचराः ॥ ४९ ॥
शब्दः स्पर्शस्तथा रूपं रसो गन्ध इति क्रमात् ।
वाक्पाङ्घ्रिगुदोपस्थानाहु कर्मेन्द्रियाणि तु ॥ ५० ॥
वचनादानगमनविसर्गरतयः क्रमात् ।
क्रियास्तेषां मनो बुद्धिरित्यन्तःकरणद्वयम् ॥ ५१ ॥
सुखं दुःखं च विषयौ विज्ञेयौ मनसः क्रिया ।
स्मृतिभ्रान्तिविकल्पाद्या [1]धियो ऽध्यवसितिर्मता ॥ ५२ ॥
ब्रह्मयोनीनीन्द्रियाणि भौतिकान्यपरे जगुः ।
सत्त्वाख्यमन्तःकरणं गुणभेदात्त्रिधा मतम् ॥ ५३ ॥

(सु०) रसजानात्मजाश्च कथयति—**शरीरेति** । उपचयः पीनत्वम् । वृद्धि प्रमाणाधिक्यम् ॥ ४७, ४८ ॥ ज्ञानेन्द्रियाणि तद्विषयाश्च विभजते—**ज्ञानेन्द्रियाणीति** । स्पर्शन त्वगिन्द्रियम् । दर्शन चक्षुः । रसन जिह्वा ॥ ४९ ॥ कर्मेन्द्रियाणि तद्व्यापाराश्च कथयति— **वाक्करेति** ॥ ५० ॥ वेदान्तिना मतमाश्रित्यान्तःकरणद्वय कथयति—**मनो बुद्धिरिति** । वाचस्पत्ये 'बुद्धिमनसोश्च करणयोरहमिति प्रख्यानप्रतिभासालम्बनत्व योगः' इत्युक्तम् ॥ ५१ ॥ बुद्धिमनसोर्विवेकार्थं व्यापारविशेष कथयति—**सुखमिति** । ततश्च सुखदुःखोपलब्धिसाधन मनः, स्मृतिभ्रान्तिविकल्पादिसाधन बुद्धिरिति विवेकः । व्यवसितिर्व्यापार ॥ ५२ ॥ मतभेदेनेन्द्रियकारण निरूपयति—**ब्रह्मेति** । वेदान्तिनस्तु ब्रह्मकारणकानीन्द्रियाणीत्याहुः, सर्वस्यापि प्रपञ्चस्य ब्रह्मविवर्तत्वात् । अथ वा ब्रह्मयोनीन्यभौतिकानीति साख्या मन्यन्ते । अपरे वैशेषिका भौतिकानि

[1] धियो व्यवसिति०

सत्त्वं रजस्तम इति गुणाः सत्त्वात्तु सात्त्विकात् ।
आस्तिक्यशुद्धधर्मैकरुचिप्रभृतयो मता ॥ ५४ ॥
सत्त्वात्तु राजसाद्भावाः कामक्रोधमदादयः ।
निद्राऽऽलस्यप्रमादार्तिवञ्चनाद्यास्तु तामसात् ॥ ५५ ॥
प्रसन्नेन्द्रियताऽऽरोग्यानालस्याद्यास्तु सात्म्यजाः ।
देहो भूतात्मकस्तस्मादादत्ते तद्गुणानिमान् ॥ ५६ ॥
शब्दं श्रोत्रं सुषिरतां वैविक्त्यं सूक्ष्मबोद्धृताम् ।
बिलं च गगनाद्वायोः स्पर्शं च स्पर्शनेन्द्रियम् ॥ ५७ ॥
उत्क्षेपणमवक्षेपाकुञ्चने गमनं तथा ।
प्रसारणमितीमानि पञ्च कर्माणि रूक्षताम् ॥ ५८ ॥

पृथिव्यादिभूतोत्पन्नानीत्याहुः । तृतीयमन्त करण कथयति—**सत्त्वाख्यमिति** । सत्त्वाख्य स्वभावाख्यमित्यर्थ । गुणभेदात्सत्त्वरजस्तमोभेदात् ॥ ५३ ॥ गुणान्विभज्य कथयति—**सत्त्वमिति** । सात्त्विकान्तःकरणकार्य कथयति—**सत्त्वादिति** । आस्तिक्यमस्ति परलोक इति श्रद्धा । शुद्धो निर्मलो यो धर्मस्तत्रैका रुचिः प्रीतिः । प्रभृतिशब्देनाधर्मान्निवृत्तिरुच्यते ॥ ५४ ॥ राजसान्त'करणकार्य कथयति—**सत्त्वादिति** । राजसाद्रजोगुणप्रधानात् सत्त्वात्सत्त्वाख्यादन्तःकरणात् । तामसान्तःकरणकार्य कथयति—**निद्रेति** । निद्रा, इन्द्रियाणा बाह्यविषयव्यापारोपरम सुप्तिः सुषुप्तिर्वा । आलस्यमिष्टसाधनेष्वपि व्यापारेष्वप्रवृत्ति । प्रमादो निरवधानत्वम् । वञ्चन प्रतारणम् ॥ ५५ ॥ सात्म्यजान्भावान्कथयति—**प्रसन्नेति** । आरोग्य नीरोगत्वम् । देहे भूतगुणान्विभजते—**देह इति** । भूतात्मकः पञ्चमहाभूतारब्ध । यद्यपि देहस्यैकैकभूतारब्धत्वमेव, तथाऽप्युपष्टम्भकत्वमन्येषा भूताना विद्यत एव ॥ ५६ ॥ सुषिरता सच्छिद्रत्वम् । वैविक्त्य विविक्तस्य भावो देहस्वभावप्रापकत्वेन पृथगवस्थानम् । सूक्ष्मबोद्धृता दुर्बोधस्याप्यर्थस्यानायासेन परिज्ञानम् । बिल स्थूल छिद्र सुषिर त्वल्पमिति विवेकः । शरीरे वायुगुणान्कथयति—**वायोरिति** । स्पर्शो गुणः । स्पर्शनेन्द्रिय त्वगिन्द्रि-

प्राणापानौ तथा व्यानसमानोदानसंज्ञकान् ।
नागं कूर्मं च कृकरं देवदत्तं धनंजयम् ॥ ५९ ॥
दशेति वायुविकृतीस्तथा गृह्णाति लाघवम् ।
तेषां मुख्यतमः प्राणो नाभिकंदादधः स्थितः ॥ ६० ॥
चरत्यास्ये नासिकयोर्नाभौ हृदयपङ्कजे ।
शब्दोच्चारणनिःश्वासोच्छ्वासकासादिकारणम् ॥ ६१ ॥
अपानस्तु गुदे मेढ्रे कटीजङ्घोदरेषु च ।
नाभिकंदे वङ्क्षणयोरूरुजानुनि तिष्ठति ॥ ६२ ॥
अस्य मूत्रपुरीषादिविसर्गः कर्म कीर्तितः ।
व्यानो ऽक्षिश्रोत्रगुल्फेषु कट्यां घ्राणे च तिष्ठति ॥ ६३ ॥
प्राणापानधृतित्यागग्रहणाद्यस्य कर्म च ।
समानो व्याप्य निखिलं शरीरं वह्निना सह ॥ ६४ ॥

यम् ॥ ५७ ॥ उत्क्षेपणमूर्ध्वाकाशदेशेन सह सयोगजनक कर्म । अवक्षेपो ऽधराकाशदेशेन सह सयोगजनक कर्म । आकुञ्चन स्वाभिमुखानयनम् । गमन दिग्विशेषानवच्छिन्नाकाशदेशसयोगजनक कर्म । प्रसारण परतो नयनम् । रूक्षता स्निग्धत्वाभाव ॥ ५८ ॥ प्राणापानादयो दश वायुविकारा' । लाघव गुरुत्वाभाव । एतान्गुणान्वायोर्गृह्णाति शरीरमिति सबन्ध ॥ ५९, ५९- ॥ मुख्यस्य प्राणस्य स्थान व्यापार च कथयति—तेषामिति । मुख्यतम' प्रधानभूत., अन्येषामपानादीना तदनुयायित्वात् । नाभिकदादध आधारप्रदेशे चरति विचरति ॥ -६०, ६१ ॥ अपानस्य स्थान कर्म च कथयति— अपानस्त्विति । कटीजङ्घोदरेष्विल्यत्र पञ्चस्वित्यध्याहार्यम्, अन्यथा 'द्वद्वश्च प्राणितूर्यसेनाऽङ्गानाम्' इत्येकवद्भावप्राप्ते । सख्योपादाने तु नैकवद्भाव प्राप्नोति, 'कथ चेदृश दन्तोष्ठाः सख्यावाचीह भेदकः' इति विचारचिन्तामणावुक्तत्वात् ॥ ६२ ॥ मूत्रपुरीषादीति । अत्रादिशब्देन वीर्यदूषिकाऽऽदिग्रहणम् । व्यानस्य स्थान कर्म च कथयति—व्यान इति ॥ ६३ ॥ प्राणापानयोः पवनयोर्धृतिर्धारणम्, कुम्भनमिति यावत् । त्यागो

द्विसप्ततिसहस्रेषु नाडीरन्ध्रेषु संचरन् ।
भुक्तपीतरसान्सम्यगानयन्देहपुष्टिकृत् ॥ ६५ ॥
उदानः पादयोरास्ते हस्तयोरङ्गसंधिषु ।
कर्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्तितम् ॥ ६६ ॥
त्वगादिधातूनाश्रित्य पञ्च नागादय स्थिताः ।
उद्गारादि निमेषादि क्षुतप्रभृति च क्रमात् ॥ ६७ ॥
तन्द्राप्रभृति शोफादि तेषां कर्म प्रकीर्तितम् ।
अग्नेस्तु लोचनं रूपं पित्तं पाकं प्रकाशताम् ॥ ६८ ॥
अमर्षं तैक्ष्ण्यमूष्माणमोजस्तेजश्च शूरताम् ।
मेधावितां तथा ऽऽदत्ते जलात्तु रसनं रसम् ॥ ६९ ॥
शैत्यं स्नेहं द्रवं स्वेदं मूत्रादि मृदुतामपि ।
भूमेर्घ्राणेन्द्रियं गन्धं स्थैर्यं धैर्यं च गौरवम् ॥ ७० ॥

बहिर्निःसारणम् । ग्रहणमन्त प्रवेशनम् । आदिशब्देन योगशास्त्रप्रसिद्ध नकुल-कर्मादि । समान इति । वह्निनोदर्येण भुक्तपीतपाकहेतुना सह सचरन् भुक्त-पीतरसान्नाडीरन्ध्रेष्वानयन्देहपुष्टि करोतीति सबन्ध ॥ ६४, ६५ ॥ उदानस्य स्थानं कर्म च कथयति—उदान इति । देहस्योन्नयनमूर्ध्वनयनम् । उत्क्रमण मरणम् । आदिशब्देन हिक्काऽऽदि ॥ ६६ ॥ नागादीना पञ्चाना वायूना स्थान कर्म च कथयति—त्वगादीति । त्वचि नागस्यावस्थानम्, शोणिते कूर्मस्य, मासे कृकरस्य, मेदसि देवदत्तस्य, अस्थि धनजयस्य ॥ ६७ ॥ तन्द्रा ऽऽलस्यम् । प्रभृतिशब्देन जृम्भणादि । शरीरे तेजोगुणान्कथयति—अग्नेस्त्विति । लोचन चक्षुरिन्द्रियम् । पित्त दोषविशेष । पाको ऽन्नरसपचनम् । प्रकाशता तेज-स्विता ॥ ६८ ॥ अमर्ष कोप । तैक्ष्ण्यमसहनत्वम् । ऊष्मा स्वेदोत्पादकस्ताप-विशेषः । ओज पूर्वोक्तम् । शूरता निर्भयत्वम् । मेधाविता ऽनुभूतस्यावि-स्मृति । उदकगुणान्कथयति—जलात्त्विति । रसन रसनेन्द्रियम् ॥ ६९ ॥ स्नेहः स्निग्ध इति व्यवहारकारणभूतो वाग्विशेषगुण । पृथ्वीगुणान्कथयति —

श्मश्रुकेशनखं दन्तानस्थ्याद्यन्यच्च कर्कशम् ।
वातादिधातुप्रकृतिर्व्योमादिप्रकृतिस्तथा ॥ ७१ ॥
सप्तधा सात्त्विको यश्च ब्रह्मेन्द्रयमविग्रहः ।
वारुणश्चाथ कौबेर आर्षो गान्धर्वविग्रहः ॥ ७२ ॥
राजसः षड्विधो यश्च पैशाचो राक्षसस्तथा ।
आसुरः शाकुनः सार्पः प्रेतदेहस्तथा परः ॥ ७३ ॥
तामसस्त्रिविधो यश्च पशुमत्स्याङ्घ्रिपाकृतिः ।
तेषां लक्ष्माणि न ब्रूमो ग्रन्थविस्तरकातराः ॥ ७४ ॥
पिण्डस्याहुः षडङ्गानि शिरः पादौ करौ तथा ।
मध्यं चेत्यथ वक्ष्यन्ते प्रत्यङ्गान्यखिलान्यपि ॥ ७५ ॥
त्वचः सप्त कलाः सप्त स्नायुश्लेष्मजरायुभिः ।
छन्नाः कोशाग्निभिः पक्वास्ता धातूनन्तरा ऽन्तरा ॥ ७६ ॥

भूमेरिति । स्थैर्यमत्वरत्वम् । धैर्यमापद्यप्यव्यामूढता । गौरव पतनासमवायिकारणभूतो गुणः ॥ ७० ॥ अन्यानपि देहभेदान्कथयति—वातादीति । वातादयो वातपित्तश्लेष्माण । व्योमपवनतेजोऽम्बुभूमयो व्योमादय ॥ ७१ ॥ सप्तधा सप्तप्रकार सात्त्विको देहो ब्रह्मादीनाम्, षड्विधो राजसो देहः पिशाचादीनाम्, त्रिविधस्तामसो देह पश्वादीनामिति । तेषा लक्षण किमिति नोक्तमित्यत आह—तेषामिति ॥ ७२–७४ ॥

(क०) जातस्य मातृजादीन्षड्विधान्भावान्भौतिकस्य देहस्य तत्तद्भूतगुणोपादान चोक्त्वा तस्य देहस्याङ्गप्रत्यङ्गधातुधमनीचक्रादिप्रपञ्चमाह—**पिण्डस्याहुरित्यादिना** । प्रत्यङ्गानि त्वक्कलाऽऽदीनि । वक्ष्यन्ते, समनन्तरमेवेत्यर्थ ॥ **त्वचः सप्तेति** । पच्यमानादसृजो जायमाना भासिन्यादय. सप्त त्वचः । यथोक्तमायुर्वेदे—

सीमभूताश्च धातूनां काष्ठसारोपमा मताः ।
आद्या मांसधरा मांसे सिरा धमनयस्तथा ॥ ७७ ॥
स्नायुस्रोतांसि रोहन्ति पङ्के पङ्कजकंदवत् ।
असृङ्मेदःश्लेष्मशकृत्पित्तशुक्रधराः पराः ॥ ७८ ॥

'इति भूतमयो देहस्तत्र सप्त त्वचो ऽसृज ।
पच्यमानात्प्रजायन्ते क्षीरात्सतानिका इव ॥
भासिनी लोहिनी श्वेता ताम्रा त्वग्वेदिनी तथा ।
स्याद्रोहिणी मासधरा सप्तमी परिकीर्तिता ॥'

इति । **कलाः सप्तेति** । रसक्लेदो धातुसारविशेष पूर्वोत्तरधात्वन्तरालस्थः स्नायुश्लेष्मजरायुच्छन्न कोशाग्निपक्व काष्ठसारोपमः सूक्ष्मरूपत्वात्कलेत्युच्यते । तथा चोक्तम्—

'धात्वाशयान्तरक्लेदो विपक्व स्वं स्वमूष्मणा ।
श्लेष्मस्नाय्वपराच्छन्न कलाऽऽख्यः काष्ठसारवत् ॥'

इति । स्नाय्वादिच्छन्नत्वादिकं विशेषण त्वक्कलोभयसाधारणं वेदितव्यम् । तास्त्वच कलाश्च धातूनन्तरा ऽन्तरा त्वगादिसप्तधातूना मध्ये मध्ये सीमभूतास्तेषामेव धातूनामसकीर्णताऽऽपादका इत्यर्थः ॥ **आद्येति** । आद्या-त्वक्कला च मासधरा नाम, परा षट् त्वच कलाश्चासृगादिधरा ॥ ७५—७८ ॥

(सु०) देहे ऽङ्गप्रत्यङ्गानि विभजते—**पिण्डस्येति** ॥ धातूनन्तरा ऽन्तरा सप्ताना धातूना मध्ये मध्य इत्यर्थः ॥ काष्ठसारोपमा कठिना ऽऽद्या मासधरा त्वक्, अन्यास्त्वकठिना इत्यर्थः । सिराऽऽदयः कुत्रोत्पद्यन्त इत्यत आह—मास इति । धमनयः सिराविशेषाः ॥ स्नायुस्तन्तुसनिभो मासबन्धनविशेष । अन्यास्त्वचः कलाश्च कि धारयन्तीत्यत आह—**असृगिति** ॥ ७५—७८ ॥

त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्रानि धातवः ।
सप्त स्युस्तत्र चोक्ता त्वग्रक्तं जाठरवह्निना ॥ ७९ ॥
पक्वाद्भवेदन्नरसादेवं रक्तादिभिः परे ।
स्वस्वकोशाग्निना पक्वैर्जन्यन्ते धातवः क्रमात् ॥ ८० ॥
रक्तश्लेष्मामपित्तानां पक्वस्य मरुतस्तथा ।
मूत्रस्य चाश्रयाः सप्त क्रमादाशयसंज्ञकाः ॥ ८१ ॥
गर्भाशयो ऽष्टमः स्त्रीणां पित्तपक्वाशयान्तरे ।
प्रसन्नाभ्यां कफासृग्भ्यां हृदयं पङ्कजाकृति ॥ ८२ ॥
सुषिरं स्यादधोवक्त्रं यकृत्प्लीहान्तरस्थितम् ।
एतच्च चेतनस्थानं तदस्मिंस्तमसा ऽऽवृते ॥ ८३ ॥
निमीलति स्वपित्यात्मा जागर्ति विकसत्यपि ।
द्वेधा स्वप्नसुषुप्तिभ्यां स्वापो बाह्येन्द्रियाणि चेत् ॥ ८४ ॥

(क०) धातूनुद्दिश्य तेषामुत्पत्ति दर्शयति—**त्वगसृगि**त्यादिना । तत्र चोक्ता त्वगिति । चकारो भिन्नक्रम , त्वक्चेति । अयमर्थ —अत्र धातुत्वेन परिगणिता बाह्या त्वगपि धातुसीमभूतत्वग्लक्षणेनैवोक्तलक्षणेति ॥ ७९–८२- ॥

(सु०) धातून्विभजते—**त्वगि**ति ॥ रक्तादीनामुत्पत्तिप्रकारमाह—**रक्ते**ति। आमो ऽपक्वो रस. ॥ स्त्रीणामधिकमाशय कथयति—**गर्भाशय** इति । हृदयस्योत्पत्तिप्रकारं सस्थानविशेष स्थान च कथयति—**प्रसन्नाभ्या**मिति ॥७९–८२-॥

(क०) **एतच्च चेतनस्थानमि**ति । एतत्पङ्कजाकृत्यधोवक्त्रं सुषिर हृत्पङ्कजमित्यर्थ· । अत्र चशब्दश्चेतनाभिव्यक्तिहेतुभूतस्थानान्तरसमुच्चयार्थ । स्थानान्तराणि तु 'प्राणो ब्रह्म क ब्रह्म ख ब्रह्म' इत्यादिश्रुत्युक्तानि प्राणा-

लीयन्ते हृदि जागर्ति चित्तं स्वप्नस्तदोच्यते ।
मनश्चेल्लीयते प्राणे सुषुप्तिः स्यात्तदा ऽऽत्मनः ॥ ८५ ॥
स्वमपीतः परात्मानं स्वपित्यात्मेत्यतो मतः ।

दीनि । चेतनस्थानं चेतनस्य कूटस्थब्रह्मण स्थानमभिव्यक्तिस्थानम् । अत्र चेतनशब्दो न जीवपर । कुत ? श्रुतिविरोधात्, 'अथ यदिदं ब्रह्मपुरम्' इत्यादि श्रुतिर्हि 'पुण्डरीकसंनिवेशम्' इत्यत्र पुण्डरीकस्य ब्रह्मस्थानत्वमाह । तथा हि भामत्या दहराधिकरणे 'अथ यदिदमस्मिन्ब्रह्मपुरं दहरं सूक्ष्म-गुहाप्रायं पुण्डरीकसंनिवेशं वेश्म दहरम्' इत्युपक्रम्य 'इमा सर्वा प्रजा अहरहर्ब्रह्म गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इति श्रुतिमुदाहृत्य स्वापकाले ऽपि सर्व एवायं विद्वानविद्वाश्च जीवलोको हृत्पुण्डरीकाश्रय दहराकाशाख्य ब्रह्मलोकं प्राप्तो ऽप्यनाद्यविद्यातम पटलपिहितदृष्टितया ब्रह्मभूयमापन्नो ऽहमस्मीति न वेद' इत्यादिना महता संदर्भेण दहरशब्द-स्याकाशजीवपरत्वदूषणपूर्वकं ब्रह्मपरत्वप्रतिपादनादत्रापि हृत्पङ्कजाधिष्ठातृत्वेन चेतनं ब्रह्मैवेत्यवगन्तव्यम् । **तदस्मिन्नित्यादि** । अस्मिश्चेतने ब्रह्मणि तमसा ऽनाद्यविद्यया ऽऽवृते पिहिते सति, तद्धृदयपङ्कज यदा निमीलति मुकुली-भवति तदा ऽऽत्मा जीव स्वपिति निद्राति, तत्पङ्कज यदा विकसति तदा जीवो जागर्त्यहमिति बुध्यते । अपिश्चार्थे । एतदुक्त भवति— आत्मन स्वरूपाज्ञानेन जीवभावे ऽप्यनादिविश्वतैजसप्राज्ञव्यपदेशहेतवो जीवस्य जाग्रत्स्वप्नसुषुप्त्यवस्था भवन्तीति । द्वेधेति । स्वापो निद्रा, तद्विशेषौ स्वप्नसुषुप्ती ॥ -८३—८५- ॥

(सु०) हृदयमेव स्वप्नजागरणयो कारणमित्याह—एतच्चेति । चेतन-स्यात्मनः स्थानम् । अस्मिन्निमीलति सत्यात्मा स्वपिति, विकसति सति जागर्ति । स्वापस्य द्वैविध्य कथयित्वा त लक्षयति—द्वेधेति । चित्त मनः, जागर्ति स्वाप्नि-

श्रवणे नयने नासे वदनं गुदशेफसी ॥ ८६ ॥
बहिर्मलवहानि स्युर्नव स्रोतांसि देहिनाम् ।
स्त्रीणां त्रीण्यधिकानि स्युः स्तनयोर्द्वे भगे ऽसृजः ॥ ८७ ॥
अस्थिस्नायुसिरामांसस्थानि जालानि षोडश ।
षट् कूर्चाः करयोरङ्घ्रयोः कंधरायां च मेहने ॥ ८८ ॥
पार्श्वयोः पृष्ठवंशस्य चतस्रो मांसरज्जवः ।
सीवन्यः पञ्च शिरसि द्वे जिह्वालिङ्गयोर्मते ॥ ८९ ॥
चतुर्दशाष्टादश वा [1]संमता अस्थिराशय ।
अस्थ्ना शरीरे संख्या स्यात्षष्टियुक्तं शतत्रयम् ॥ ९० ॥
वलयानि कपालानि रुचकास्तरुणानि च ।
नलकानीति तान्याहुः पञ्चधा ऽस्थीनि सूरयः ॥ ९१ ॥
त्रीण्येवास्थिशतान्यत्र धन्वन्तरिरभाषत ।

कान्पदार्थान्पश्यति । स्वपितिशब्द निर्वक्ति—स्वमपीत इति । 'स्व ह्यपीतो भवति, तस्मादेनं स्वपितीत्याचक्षते' इति श्रुतेः ॥ -८३–८५- ॥

(क०) **श्रवणे नयने** इत्यादिरस्मद्विरचिते ऽध्यात्मविवेके वीक्ष्यता बुधैरित्यन्त स्पष्टार्थ ॥ -८६–११९ ॥

(सु०) बहिर्मलवहानि रन्ध्राणि कथयति—**श्रवणे** इति ॥ -८६–८७ ॥ जलानि षोडश षट् कूर्चान्रज्जूश्चतस्र सप्त सीवनीश्च कथयति—**अस्थी-**त्यादिना ॥ ८८, ८९ ॥ [2]मतभेदेनास्थिराशीन्कथयति—**चतुर्दशेति** ॥ ८९- ॥ अस्थीनि सख्याति—**अस्थ्नामिति** ॥ -९० ॥ आकारविशेषेण पञ्चधा ऽस्थी-न्याह—**वलयानीति** ॥ ९१ ॥ मतभेदेनास्थ्नामन्यथा सख्या ख्यापयति—

[1] सीमन्ता
[2] नामभेदेन

द्वे शते त्वस्थिसंधीनां स्यातामत्र दशोत्तरे ॥ ९२ ॥
कोरकाः प्रतरास्तुन्ना सीवन्यः स्युरुलूखलाः ।
सामुद्गा मण्डला शङ्खावर्ता वायसतुण्डकाः ॥ ९३ ॥
इत्यष्टधा समुद्दिष्टा मुनीन्द्रैरस्थिसंधय ।
पेशीस्नायुसिरासंधिसहस्रद्वितयं मतम् ॥ ९४ ॥
नव स्नायुशतानि स्युश्चतुर्धा स्नायवो मताः ।
प्रतानवत्य सुषिराः कण्डराः पृथुलास्तथा ॥ ९५ ॥
बन्धनैर्बहुभिर्बद्धा भूरिभारक्षमा भवेत् ।
नौरम्भसि यथा स्नायुशतबद्धा तनुस्तथा ॥ ९६ ॥
पञ्च पेशीशतान्याहुः शरीरस्थानि सूरय ।
अधिका विंशतिः स्त्रीणां तत्र स्युः स्तनयोर्दश ॥ ९७ ॥
यौवने ताः प्रवर्धन्ते दश योनौ तु तत्र च ।
द्वे अन्तः प्रसृते बाह्ये द्वे तिस्रो गर्भमार्गगाः ॥ ९८ ॥
शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्ता ऽत्र तृतीयके ।
आवर्ते गर्भशय्या ऽस्ति पित्तपक्वाशयान्तरे ॥ ९९ ॥
रोहिताभिधमत्स्यस्य सदृशी तत्र पेशिका ।
शुक्रार्तवप्रवेशिन्यस्तिस्रः प्रच्छादिका मताः ॥ १०० ॥
सिराधमनिकानां तु लक्षाणि नवविंशतिः ।
सार्धानि स्युर्नवशती षट्पञ्चाशद्युता तथा ॥ १०१ ॥

त्रीणीति ॥ ९१ - ॥ अस्थिसधीन्सख्याति—द्वे शते इति ॥ -९२ ॥ आकार-विशेषेणास्थिसधीनामष्टविधत्व कथयति—कोरका इति ॥ ९३, ९३- ॥ पेशी-स्नायुसिरासधीन्सख्याय स्नायुभेदान्कथयति—पेशीति ॥ -९४, ९५ ॥ स्नायू-नामुपयोग कथयति—बन्धनैरिति ॥ ९६ ॥ पुस्त्रीभेदेन पेशीः सख्याति —पञ्चेति ॥ ९७–१०० ॥ सिराधमनिका सख्याति—सिरेति ॥ १०१,

दश मूलसिरा ओजोवाहिन्यो हृदयाश्रयाः ।
द्व्यङ्गुलं चाङ्गुलदलं यवं यवदलं तथा ॥ १०२ ॥
गत्वा द्रुमदलस्येव सीवन्यः प्रतता यदा ।
भिद्यन्ते तास्तदा सप्त शतानि परिसंख्यया ॥ १०३ ॥
तासु जिह्वास्थिते द्वे द्वे वाग्रसज्ञानकारणे ।
घ्राणे गन्धवहे द्वे द्वे मेषोन्मेषकृतौ दृशोः ॥ १०४ ॥
श्रोत्रयोः शब्दवाहिन्यौ तासु द्वे शार्ङ्गिणोदिते ।
धमन्यो रसवाहिन्यश्चतुर्विंशतिरीरिताः ॥ १०५ ॥
कुल्याभिरिव केदारास्ताभिर्देहो ऽभिवर्धते ।
एताः प्रतिष्ठिता नाभ्यां चक्रनाभावरा इव ॥ १०६ ॥
ऊर्ध्वं दश दशाधस्ताच्चतस्रस्तिर्यगायताः ।
ऊर्ध्वगा हृदयं प्राप्ताः प्रतायन्ते पृथक्त्रिधा ॥ १०७ ॥
वातं पित्तं कफं रक्तं रसं द्वे द्वे विमुञ्चतः ।
शब्दं रूपं रसं गन्धं द्वे द्वे तत्रावगच्छतः ॥ १०८ ॥
द्वे द्वे च भाषणं घोषं स्वापं बोधं च रोदनम् ।
कुर्वाते द्वे नरे शुक्रं स्तन्यं तु स्रवतः स्त्रियाम् ॥ १०९ ॥

१०१- ॥ सीवनीना दृष्टान्तेन सस्थानविशेष दर्शयित्वा सख्या स्थान विभाग च कथयति—द्व्यङ्गुलमिति । गन्धवहे गन्धज्ञानकारणे ॥ -१०२–१०४- ॥ रसवाहिनीर्धमनीः सख्याय तासा प्रयोजनमाह—धमन्य इति ॥ -१०५, १०५- ॥ तासा स्थान सस्थान च कथयति—एता इति ॥ -१०६, १०६- ॥ ऊर्ध्वायता दश, अधआयता दश, तिर्यगायताश्चतस्र इत्युक्तम् ; तत्रोर्ध्वायताना व्यापारभेदेन त्रैविध्य कथयति—ऊर्ध्वगा इति ॥ -१०७–१०९ ॥ अधोगताना त्रैविध्य

अधोगता अपि त्रेधा पृथक्पक्वाशयस्थिताः ।
प्रवर्तयन्ति तत्राद्या दश वातादि पूर्ववत् ॥ ११० ॥
अन्नं भुक्तं धमन्यौ द्वे वहतो ऽम्बुसमाश्रयात् ।
तोयं मूत्रं बलं द्वे द्वे नारीणामार्तवं त्विमे ॥ १११ ॥
विमुञ्चतो द्वे स्रोतांसि द्वे स्थूलान्त्रान्विते शकृत् ।
स्वेदं समर्पयन्त्यष्टौ तिरश्च्यो बहुधा मताः ॥ ११२ ॥
रोमकूपेषु सन्त्यासां मुखानि स्वेदमुक्तये ।
प्रवेशयन्ति चाभ्यङ्गलेपादिप्रभवान्रसान् ॥ ११३ ॥
जीवस्थानानि मर्माणि शतं सप्तोत्तरं विदुः ।
सार्धकोटित्रयं रोम्णां श्मश्रुकेशास्त्रिलक्षकाः ॥ ११४ ॥
स्रोतःसिराश्मश्रुकेशैः सह रोम्णां तु कोटयः ।
चतुःपञ्चाशदाख्याता सप्तषष्ट्या च सार्धया ॥ ११५ ॥
लक्षाणां संहितामानं जलादेरधुनोच्यते ।
दशाञ्जलि जलं ज्ञेयं रसस्याञ्जलयो नव ॥ ११६ ॥
रक्तस्याष्टौ पुरीषस्य सप्त स्युः श्लेष्मणस्तु षट् ।
पित्तस्य पञ्च चत्वारो मूत्रस्याञ्जलयस्त्रयः ॥ ११७ ॥
वसाया मेदसो द्वौ तु मज्ज्ञ एको ऽञ्जलिर्मतः[1] ।
अर्धाञ्जलिः शिरोमज्जा श्लेष्मसारो बलं तथा ॥ ११८ ॥

कथयति—**अधोगता** इति ॥ १०९- ॥ तासा व्यापार कथयति—**प्रवर्तयन्तीति** । बल वीर्यम् ॥ -११०—१११- ॥ तिरश्चीना विशेष कथयति—**तिरश्च्य** इति ॥ -११२, ११३ ॥ मर्माणि परिसख्याति—**जीवस्थानानीति** ॥ ११४, ११४- ॥ सहिताना मान कथयति—**सप्तषष्ट्येति** । सहिता रोमादिसधिः ।

[1] मज्जा त्वञ्जलिसमित .

इति प्रत्यङ्गसंक्षेपो विस्तरस्त्विह तत्त्वतः ।
अस्मद्विरचिते ऽध्यात्मविवेके वीक्ष्यतां बुधैः ॥ ११९ ॥
गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम् ।
परमः सहजस्तद्वदानन्दो वीरपूर्वकः ॥ १२० ॥
योगानन्दश्च तत्र स्यादैशानादिदले फलम् ।
अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे ॥ १२१ ॥
आब्रह्मरन्ध्रमृजुतां नीतेयममृतप्रदा ।

द्रवमान प्रतिज्ञाय कथयति—जलादेरिति । रसस्यान्नरसस्य । [1]मज्ज्ञो मज्जाख्य-धातो । विस्तरस्त्वध्यात्मविवेके वीक्ष्यतामित्यनेन सो ऽपि मत्कृतो ग्रन्थो ऽस्तीति कर्ता स्वातिशय प्रतिपादयति ॥ ११६–११९ ॥

(क०) **गुदलिङ्गान्तर** इति । गुदलिङ्गयोर्मध्ये स्थितस्याधार-चक्रस्यैशानादिदलचतुष्टये जन्मकाले जीवस्थित्या परमानन्दादय फलानि । आधारपङ्कजे तस्मिन्नेवाधारचक्रे । कुण्डलिनीत्यन्वर्थतया सर्परूपिणी ब्रह्म-शक्तिः, ब्रह्मणो ऽसङ्गोदासीनस्य परमात्मन कर्तृत्वाद्युपहिताकारकारिण्य-विद्याशक्ति । सैव मूर्तिमती कुटिलाकारतया कुण्डलिनीत्युच्यते । आ-ब्रह्मरन्ध्रम्, ब्रह्मरन्ध्रं नाम सुषुम्णाया अग्र शिरसि सहस्रदलचक्रमध्यगम्, तत्पर्यन्तम् । ऋजुता नीतेति । गुरूपदिष्टप्रकारेण यमनियमादिक्रमेण वायोरिडापिङ्गलयो संचारं निरुध्य तेन वायुना सवह्निना ब्रह्मग्रन्थौ सुषुम्णामूलरन्ध्राच्छादिनीं कुण्डलिनीफणामपसार्य तत्र प्रवेशितेन तेन ब्रह्म-विष्णुरुद्रग्रन्थीना क्रमाद्भेदे सति कुण्डलिनी चात्मवक्रता विहाय यदा ऋजुता प्राप्यते । अमृतप्रदेति । तदा कुण्डलिनी स्वार्जवाद्ब्रह्मरन्ध्रवि-

[1] मज्जा तदाख्यो धातु.

स्वाधिष्ठानं लिङ्गमूले षट्पत्रं चक्रमस्य च ॥ १२२ ॥
पूर्वादिषु दलेष्वाहुः फलान्येतान्यनुक्रमात् ।
प्रश्रयः क्रूरता गर्वनाशो मूर्च्छा ततः परम् ॥ १२३ ॥
अवज्ञा स्यादविश्वासः कामशक्तेरिदं गृहम् ।

निर्गतेन स्ववालाग्रेण सुधाऽऽधारं सहस्रदलचक्रं विभिद्य ततो ऽमृतं द्रावयतीति तथोक्ता ॥ १२०–१२१- ॥

(सु०) एवमङ्गप्रत्यङ्गान्युक्त्वा चक्राणि वक्तुमुपक्रमते—**गुदलिङ्गान्तर** इति । गुदलिङ्गयोरन्तरे मध्य आधारसञ्ज्ञकं चक्र चतुर्दलपद्माकारमास्ते ॥ तस्य चतुर्णा दलाना फल कथयति—**परम** इति । ऐशानदले परमानन्दः, आग्नेयदले सहजानन्दः, नैर्ऋतदले वीरानन्दः, वायव्यदले योगानन्दः । ततश्चाधारकमलस्य विदिक्स्थितान्येव चत्वारि दलानीति लभ्यते ॥ अस्तीति । कुण्डलिनीसञ्ज्ञिका ब्रह्मशक्तिः, ब्रह्मप्राप्तिकारणत्वात्, आधारपङ्कजे विद्यते । सेयमाब्रह्मरन्ध्र ब्रह्मरन्ध्रपर्यन्तमृजुता नीता सत्यमृतप्रदा मोक्षप्रदा ॥१२०–१२१-॥

(क०) **स्वाधिष्ठानमिति** । आधारचक्रादूर्ध्वं लिङ्गमूले स्वाधिष्ठानाख्य षड्दलं द्वितीयं चक्रम् । तस्य पूर्वादिदलेषु क्रमात्प्रश्रयादीनि फलान्याह—**अस्य चेति** । अवज्ञा स्यादिति । धर्मपरो ऽयं निर्देश ॥-१२२–१२३-॥

(सु०) स्वाधिष्ठानसञ्ज्ञित चक्र कथयति—**स्वाधिष्ठानमिति** । षट्पत्र षड्दलकमलाकारम् । एतस्य षण्णा दलाना फलानि कथयति—**अस्य चेति** । प्रश्रयो विनयः पूर्वदिगवस्थितस्य दलस्य फलम् । तत्रावस्थित आत्मा प्रश्रयवान्भवतीत्यर्थः । क्रूरता दुष्टकर्माभिनिवेशः । गर्व आत्मोत्कर्षभावनम्, तस्य नाशः । मूर्च्छा मोहाधिक्यम् । अवज्ञा ऽवगणना । अविश्वासः सर्वत्र सशङ्कत्वमनाश्वासो वा । इदं स्वाधिष्ठानचक्र कामोत्पादिकाया शक्तेर्गृहमाश्रयः ॥ -१२२–१२३- ॥

नाभौ दशदलं चक्रं मणिपूरकसंज्ञितम् ॥ १२४ ॥
सुषुप्तिरत्र तृष्णा स्यादीर्ष्या पिशुनता तथा ।
लज्जा भयं घृणा मोहः कषायो ऽथ विषादिता ॥ १२५ ॥
क्रमात्पूर्वादिपत्रे तु स्याद्भानुभवनं च तत् ।
हृदये ऽनाहतं चक्रं शिवस्य प्रणवाकृतेः ॥ १२६ ॥
पूजास्थानं तदिच्छन्ति दलैर्द्वादशभिर्युतम् ।
लौल्यप्रणाशः प्रकटो वितर्को ऽप्यनुतापिता ॥ १२७ ॥
आशा प्रकाशश्चिन्ता च समीहा समता ततः ।
क्रमेण दम्भो वैकल्यं विवेको ऽहंकृतिस्तथा ॥ १२८ ॥
फलान्येतानि पूर्वादिदलस्थस्यात्मनो जगु ।

(क०) तत ऊर्ध्वं नाभिहृदयकण्ठघण्टिकाभ्रूमध्यललाटकेशमूल-ब्रह्मरन्ध्रेष्वष्टसु स्थानेषु क्रमेण मणिपूरकानाहतविशुद्धिललनाऽऽज्ञामन सोम-सहस्रपत्राख्यानामष्टाना चक्राणा तच्चक्रगतदलसंख्यया प्रागाद्यारम्भक्रमेण प्रतिदलं पृथक्फलान्याह—**नाभौ दशदलमित्यादिना** ॥-१२४–१२८-॥

(सु०) मणिपूरकचक्र कथयति—**नाभाविति**। एतस्य पूर्वादिदलाना फलानि कथयति—**सुषुप्तिरिति**। सुषुप्तिर्बाह्येन्द्रियाणा मनसश्चोपरमावस्था। तृष्णा ऽभिलाषः। ईर्ष्या परगुणासहनम्। पिशुनता विद्यमानाविद्यमानपरदोषसूचनम्। लज्जाभये प्रसिद्धे। घृणा परदु खप्रहाणेच्छा। मोहो जाग्रदवस्थायामपि विषया-परिज्ञानम्। कषाय कलुषाशयत्वम्। विषादः सचिन्त दु खम्। तन्मणिपूरक चक्र भानोः सूर्याख्यस्य प्राणस्य भवन स्थानम् ॥ १२५, १२६- ॥ अनाहत चक्र कथयति—**हृदय इति**। शिवस्य प्रणवाकृतेरोकाराकृते पूजास्थानमिति, तत्र स्थित परमेश्वर ध्यात्वा मनसा पूजयेदित्यर्थः। आत्मनः पूर्वादिद्वा-दशदलेष्ववस्थानेन फलानि कथयति—**लौल्येति**। लोलस्य भावो लौल्यम्,

कण्ठे ऽस्ति भारतीस्थानं विशुद्धिः षोडशच्छदम् ॥ १२९ ॥
तत्र प्रणव उद्गीथो हुंफड् वषडथ स्वधा ।
स्वाहा नमो ऽमृतं सप्त स्वराः षड्जादयो विषम् ॥ १३० ॥
इति पूर्वादिपत्रस्थे फलान्यात्मनि षोडश ।
ललनाऽऽख्यं घण्टिकायां चक्रं द्वादशपत्रकम् ॥ १३१ ॥
मदो मानस्ततः स्नेहः शोकः खेदश्च लुब्धता ।
अरतिः संभ्रमश्चोर्मिः श्रद्धातोषोपरोधिताः ॥ १३२ ॥
फलानि ललनाचक्रे स्युः पूर्वादिदलेष्विति ।

तस्य प्रणाशो निश्चलत्वम् । प्रकट इति प्रकटत्वेन वितर्कस्य विशेषणम् । वितर्क उभयोर्मध्ये ऽन्यतरोपादेयताविचारः । अनुतापिता पश्चात्तापवत्त्वम् । आशेष्टप्राप्तेरभिलाषः । प्रकाश आकारगुप्तेरभावः । चिन्ता विचारमात्रम् । समीहा ऽनिष्टनिवृत्तीच्छा । समतोत्कर्षापकर्षशून्यतया सर्वेषा भावनम् । दम्भो लोकोपसग्रहार्थमश्रद्धया कर्मानुष्ठानम् । वैकल्यमनवस्थत्वम् । विवेकः सम्यग्विचार्य कार्यकरणम् । अहकृतिरशक्ये ऽपि कार्ये चिकीर्षाऽध्यवसायः ॥-१२६–१२८-॥

(क०) उद्गीथ इति साम्नो द्वितीयो भाग , साम्नो हि पञ्च भागा —प्रस्ताव प्रथम·, उद्गीथो द्वितीय , प्रतिहारस्तृतीय , उपद्रवश्चतुर्थ , निधन· पञ्चम इति । प्रणव इत्युद्गीथस्यादौ प्रयोज्य ओंकार । घण्टिकाया जिह्वामूले । ऊर्मयो ऽशनायापिपासाशोकमोहजरामरणानि षडूर्मय· ॥ -१२९–१३२- ॥

(सु०) विशुद्धिसंज्ञक चक्र कथयति—कण्ठ इति । भारतीस्थानम् , भारत्याः सरस्वत्या स्थानमाश्रयः । तत्र भाविता वाग्देवता वाग्वैभव ददातीत्यर्थः । एतस्य चक्रस्य पूर्वादिपत्रावस्थितावात्मन· षोडश फलानि कथयति— तत्रेति । प्रणव ओंकार· । पूर्वपत्रे प्रणवानुसंधानेनात्मा श्रेयः प्राप्नोति । उद्गीथः

भ्रूमध्ये त्रिदलं चक्रमाज्ञासंज्ञं फलानि तु ॥ १३३ ॥
आविर्भावाः सत्त्वरजस्तमसां क्रमतो मताः ।
ततो ऽप्यस्ति मनश्चक्रं षड्दलं तत्फलानि तु ॥ १३४ ॥
स्वप्नो रसोपभोगश्च घ्राणं रूपोपलम्भनम् ।
स्पर्शनं शब्दबोधश्च पूर्वादिषु दलेष्विति ॥ १३५ ॥

सामभक्तिविशेष । द्वितीयपत्रे स्थितमुद्गीथमुद्गीथोपासनाया चिन्तयेदित्यर्थ । हुफडिति हवि'प्रदाने ऽव्ययम् । वषडित्यपि । स्वधेति पित्रुद्देशेन हवि प्रदाने ऽव्ययम् । स्वाहेति देवतोद्देशेन । नम इति नमस्कारे ऽव्ययम् । एतानि तत्तद्दलेषु चिन्तनीयानीत्यर्थः । अमृत पीयूषम् । तद्दले स्थित आत्मा पीयूषाप्लुत इव सुखितो भवतीत्यर्थ' । सप्त स्वरा षड्जादय. षड्जर्षभगाधारमध्यमपञ्चमधैवतनिषादाः । तेषा तानि तानि दलान्युपासनस्थानानि । विषममृतवद्व्याख्येयम् । विषदलस्थ आत्मा दु'खितो भवतीत्यर्थः ॥ ललनाऽऽख्य चक्र कथयति—**ललनाऽऽख्यमिति** । घण्टिका ऽवटुः । एतस्य पत्रफलानि कथयति—मद इति । मदो मत्तता । मान उत्कर्षभावनया कार्याकार्यानवेक्षणम् । स्नेह' स्निग्धता । शोको विज्ञातकारणक दुःखम् । खेदो ऽविज्ञातकारणक दु'खम् । लुब्धता ऽभिलाषाधिक्यम् । अरति. सुखसाधनेष्वप्युद्वेग । सम्भ्रम आवेग' । ऊर्मय षडागमशास्त्रप्रसिद्धाः—

'बुभुक्षा च पिपासा च शोकमोहौ जरामृती ।
ऊर्मयः षडिति प्राणबुद्धिदेहेषु सस्थिताः ॥'

इति । श्रद्धा ऽऽस्तिक्यबुद्धिः । तोषः प्रसिद्ध. । उपरोधिता दाक्षिण्यम् ॥ -१२९–१३२- ॥

(क०) ध्यानाश्रु, ध्यानाज्जातमश्रु ध्यानाश्रु ॥ -१३३–१४४- ॥

(सु०) त्रिदलमाज्ञाचक्र कथयति—**भ्रूमध्य** इति । तस्य फलानि कथयति—**आविर्भावा** इति । प्रथमदले सत्त्वाविर्भावः, द्वितीयदले रजआविर्भावः,

ततो ऽपि षोडशदलं सोमचक्रमितीरितम् ।
दलेषु षोडशस्वस्य कला· षोडश संस्थिताः ॥ १३६ ॥
कृपा क्षमा ऽऽर्जव धैर्यं वैराग्यं धृतिसंमदौ ।
हास्यं रोमाञ्चनिचयो ध्यानाश्रु स्थिरता ततः ॥ १३७ ॥
गाम्भीर्यमुद्यमो ऽच्छत्वमौदार्यैकाग्रते क्रमात् ।
फलान्युद्यन्ति जीवस्य पूर्वादिदलगामिनः ॥ १३८ ॥
चक्रं सहस्रपत्रं तु ब्रह्मरन्ध्रे सुधाधरम् ।
तत्सुधासारधाराभिरभिवर्धयते तनुम् ॥ १३९ ॥
अनाहतदले पूर्वे ऽष्टमे चैकादशे तथा ।
द्वादशे च स्थितो जीवो गीतादे· सिद्धिमृच्छति ॥ १४० ॥
चतुर्थषष्ठदशमैर्दलैर्गीतादि नश्यति ।
विशुद्धेरष्टमादीनि दलान्यष्टौ श्रितानि तु ॥ १४१ ॥

तृतीयदले तमआविर्भाव , मन सज्ञक षड्दल चक्र कथयति—तत इति । मनश्चक्र मनःसज्ञ चक्रम् । मनःसज्ञा तु तत्र मनसो ऽवस्थानात् । फलान्याह—तत्फलानीति । स्वप्नः सुप्त्यवस्था । रसोपभोगो ऽन्नरसस्योपभोग· । घ्राण गन्धज्ञानम् । रूपोपलम्भन दर्शनम् । स्पर्शन त्वगिन्द्रियकरणक ज्ञानम् । शब्दबोधः श्रवणम् । सोमाख्य चक्र कथयति—तत इति । ततो ऽप्युपरिप्रदेशे । अस्य पूर्वादिदलावस्थानेन जीवस्य फलानि कथयति—कृपेति । कृपा परानुग्रहापेक्षा । क्षमा कोपकारणे सत्यप्यकोप. । आर्जवमवक्रबुद्धित्वम् । धैर्यमस्खलितचेतस्त्वम् । वैराग्य ससारासारताबुद्धिः । धृतिर्धारणम् । समदो हर्षः । हास्यादीनि गाम्भीर्यान्तानि प्रसिद्धानि । उद्यम उद्योगः । अच्छत्वमकलुषमनस्त्वम् । औदार्य स्वभावेन दानशूरता । एकाग्रतैकतानत्वम् ॥ चक्रान्तर कथयति—चक्रमिति । सुधाधरममृतधारकम् । तद्व्यापार कथयति—तदिति । एतेषा चक्राणा तत्तद्दलावस्थाने जीवस्य फलानि कथयन्प्रकृतोपयोगमाह—अनाहतेति । अनाहतचक्रस्य दले पत्रे पूर्वे पूर्वदिक्स्थिते प्रथमे वा ऽष्टमादिषु

दद्युर्गीतादिसंसिद्धिं षोडशं तद्विनाशकम् ।
दशमैकादशे पत्रे ललनायां तु सिद्धिदे ॥ १४२ ॥
नाशकं प्रथमं तुर्यं पञ्चमं च दलं विदुः ।
ब्रह्मरन्ध्रस्थितो जीवः सुधया संप्लुतो यथा ॥ १४३ ॥
तुष्टो गीतादिकार्याणि सप्रकर्षाणि साधयेत् ।
एषां शेषेषु पत्रेषु चक्रेष्वन्येषु च स्थितः ॥ १४४ ॥
जीवो गीतादिसंसिद्धिं न कदाचिदवाप्नुयात् ।
आधाराद् द्व्यङ्गुलादूर्ध्वं मेहनाद् द्व्यङ्गुलादधः ॥ १४५ ॥
एकाङ्गुलं देहमध्यं तप्तजाम्बूनदप्रभम् ।
तत्रास्ते ऽग्निशिखा तन्वी चक्रात्तस्मान्नवाङ्गुले ॥ १४६ ॥

च सस्थितो जीवो गीतादेः सिद्धिमृच्छति गीतनृत्तवाद्याना सिद्धिमाप्नोति, अथ वा तान्यभिलषति । चतुर्थषष्ठदशमदलेषु स्थिते जीवे गीतादि नश्यति । विशुद्धे-रिति । विशुद्धिसञ्ज्ञकस्य चक्रस्याष्टमादिष्वष्टसु दलेषु सस्थिते जीवे गीतादि सिध्यति । षोडशदलावस्थिते नश्यति । ललनाऽऽख्यचक्रस्य दलविशेषावस्थाने जीवस्य गीतादिसिद्ध्यसिद्धी कथयति—दशमेति । दशम चैकादश चेति द्वे पत्रे गीतादिसिद्धिदायके भवत. । प्रथमादीनि तु गीतादिनाशकानीति विदुर्यो-गशास्त्रविद' । ब्रह्मरन्ध्रावस्थानेन जीवस्य गीतादिसिद्धि कथयति—ब्रह्मरन्ध्रेति । ब्रह्मरन्ध्रे तिष्ठञ्जीवो ऽमृतप्लुत इव निर्वृति प्राप्तः सस्तुष्टो निरभिलाषो गीतादि साधयेन्निष्पादयेत् । एव गीतादेः साधकानि नाशकानि च दलानि कथयित्वा साधारणानि कथयति—एषामिति । एषामनाहतविशुद्धिललनाऽऽख्याना चक्राणा शेषेषु साधकनाशकेभ्यो ऽन्येषु पत्रेषु, अन्येषु चक्रेषु विशुद्ध्यादेरन्येषु मणि-पूरकादिचक्रेषु च स्थितो जीवो गीतादिसिद्धावुदासीन इत्यर्थ. ॥ १३३–१४४- ॥

(क०) देहविधारकनाडीसंदोहमूलभूतस्य ब्रह्मग्रन्थे स्थानं स्वरूपं चाह—**आधाराद् द्व्यङ्गुलादिति** । आधारादाधारचक्रादवधिभूतात् ।

देहस्य कंदो ऽस्त्युत्सेधायामाभ्यां चतुरङ्गुलः ।
ब्रह्मग्रन्थिरिति प्रोक्तं तस्य नाम पुरातनैः ॥ १४७ ॥
तन्मध्ये नाभिचक्रं तु द्वादशारमवस्थितम् ।
लूतेव तन्तुजालस्था तत्र जीवो भ्रमत्ययम् ॥ १४८ ॥
सुषुम्णया ब्रह्मरन्ध्रमारोहत्यवरोहति ।
जीवः प्राणसमारूढो रज्ज्वां कोह्लाटिको यथा ॥ १४९ ॥
सुषुम्णां परितो नाड्यः कंदादा ब्रह्मरन्ध्रतः ।
[1]कंदीकृत्य स्थिताः कंदं शाखाभिस्तन्वते तनुम् ॥ १५० ॥

देहमध्यमिति । देहस्योर्ध्वाधोभागयोर्मध्ये स्थितत्वाद्देहमध्यम् । **चक्रात्तस्मादिति** । देहमध्यचक्रादवधे । **ब्रह्मग्रन्थिरिति** । ब्रह्माधिष्ठितत्वाद्ब्रह्मग्रन्थिः । तन्मध्ये ब्रह्मग्रन्थिमध्ये । नाभिचक्र द्वादशारं द्वादशाराणि यस्य तत्तथोक्तम् । आतानवितानात्मकनाडीसंघातरूपत्वान्नाभिचक्रस्य तन्तुजाल दृष्टान्त । कंदीकृत्य, अकंदं कदं कृत्वा । अभूततद्भावे च्वि· । ताश्च नाड्य· स्वशाखाभि· कदीकृतं कंदं तनु देहाकारं तन्वते ॥ -१४५–१५० ॥

(सु०) अग्निशिखास्थान कथयति—**आधारादिति** । आधारचक्राद् द्वयङ्गुलमात्रमूर्ध्वप्रदेशे मेहनाल्लिङ्गस्थानाद् द्वयङ्गुलमात्रमध·प्रदेश एकाङ्गुलिप्रमाणं सुवर्णवर्ण देहमध्यं देहस्य मध्यप्रदेश· । तत्र तन्वी कृशा ऽग्निशिखा ऽऽस्ते । तस्माच्चक्राद्देहमध्यादाधाराद्वा नवाङ्गुले नवाङगुलप्रमाणे । ब्रह्मग्रन्थि कथयति—**देहस्येति** । हेहस्य शरीरस्य कदो विस्तारकारणम् । उत्सेधो दीर्घोच्छ्रायः । नाभिस्थितश्चतुरङ्गुलप्रमाणक । तस्य नाम ब्रह्मग्रन्थिरिति । **तन्मध्य इति** । तस्य ब्रह्मग्रन्थेर्मध्ये नाभिचक्राख्य चक्र द्वादशदलमस्ति । लूतोर्णनाभः, तद्वज्जीवस्तत्र भ्रमति । **सुषुम्णयेति** । आ ऽऽधारादाब्रह्मरन्ध्रमायता

[1] क्रोडीकृत्य.

ताश्च भूरितरास्तासु मुख्याः प्रोक्ताश्चतुर्दश ।
सुषुम्णेडा पिङ्गला च कुहूरथ सरस्वती ॥ १५१ ॥
गांधारी हस्तिजिह्वा च वारुणी च यशस्विनी ।
विश्वोदरा शङ्खिनी च ततः पूषा पयस्विनी ॥ १५२ ॥
अलम्बुसेति तत्राद्यास्तिस्रो मुख्यतमा मताः ।
सुषुम्णा तिसृषु श्रेष्ठा वैष्णवी मुक्तिमार्गगा ॥ १५३ ॥
कंदमध्ये स्थिता तस्या इडा सव्ये ऽथ दक्षिणे ।
पिङ्गलेडापिङ्गलयोश्चरतश्चन्द्रभास्करौ ॥ १५४ ॥
क्रमात्कालगतेर्हेतू सुषुम्णा कालशोषिणी ।

नाडी सुषुम्णा । तया तस्य सकाशाद्ब्रह्मरन्ध्रपर्यन्तमारोहति ब्रह्मरन्ध्राच्चावरोहति । प्राणसमारूढ प्राणपवनेनोपश्लिष्ट । कोह्लाटिको विषमनर्तक । सुषुम्णा परितः सर्वत सुषुम्णाया कद ब्रह्मग्रन्थि क्रोडीकृत्य व्याप्य स्थिता नाडयस्तनु शरीर तन्वते विस्तारयन्ति ॥ -१४९–१५० ॥

(क०) **कालगतेरिति** । अत्र कालशब्देन जीवस्य पिण्डावस्थानिमित्तभूतास्तपनपरिस्पन्दक्षणा उच्यन्ते, त एवायुरिति यावत्, तस्य गतेः क्षयस्येत्यर्थ । **कालशोषिणीति** । इह कालशब्देन मृत्युरुच्यते, तस्य शोषिणी प्रतिबन्धिनी ॥ १५१–१५५ ॥

(सु०) तासु नाडीषु मुख्याश्चतुर्दशेति कथयति—**ताश्चेति** १५०- ॥ तासा नामानि कथयति—**सुषुम्णेति** । चतुर्दशाना मध्ये सुषुम्णेडापिङ्गलाना तिसृणा नाडीना मुख्यत्व तासु च सुषुम्णाया मुख्यत्वमाह—**तत्राद्या** इति । सुषुम्णाया मुख्यत्वे कारणमाह—**वैष्णवीति** । वैष्णवी विष्णुदेवताका । अथ वा, वैष्णवी या मायाशक्तिस्तद्रूपिणी । मुक्तिमार्गगा मोक्षप्रदायिनी । अथ वा, मुक्तिमार्गो मुक्तेरुपाय आत्मा, तत्सबन्धिनी, आत्मनो ऽधिष्ठानभूतेत्यर्थ. ॥

सरस्वती कुहूश्चास्ते सुषुम्णायास्तु पार्श्वयोः ॥ १५५ ॥
इडायाः पृष्ठपूर्वस्थे गांधारीहस्तिजिह्विके ।
क्रमात्पूषायशस्विन्यौ पिङ्गलापृष्ठपूर्वयोः ॥ १५६ ॥
विश्वोदरा मध्यदेशे स्यात्कुहूहस्तिजिह्वयोः ।
मध्ये कुहूयशस्विन्योर्वारुणी संस्थिता मता ॥ १५७ ॥
पूषासरस्वतीमध्यमधिशेते पयस्विनी ।
गांधारिकासरस्वत्योर्मध्ये वसति शङ्खिनी ॥ १५८ ॥
अलम्बुसा कंदमध्ये तत्रेडापिङ्गले क्रमात् ।
सव्यदक्षिणनासाऽन्तं कुहूरामेहनं पुरः ॥ १५९ ॥

कदस्य ब्रह्मग्रन्थेर्मध्ये स्थिता । इडापिङ्गले तस्या वामदक्षिणतः स्थिते इत्यर्थः। तयोः प्रचरत' प्राणपवनस्य सज्ञाविशेषमाह—**इडापिङ्गलयोरिति** । वामनाडयनुसारी प्राणपवनश्चन्द्रः, दक्षिणनाडयनुसारी तु भास्कर इत्युच्यते । कथं प्राणपवनस्य चन्द्रत्व भास्करत्व चेत्यत आह—**कालगतेर्हेतू** इति । यथा चन्द्रसूर्यौ कालज्ञानकारणे तथा तावपीत्यर्थ. ॥ १५१–१५५ ॥

(क०) **सर्वगा तु वारुणीति** । अत्र वारुणीति नाडी तु सर्वगा सकलशरीरव्यापिनी ॥ लोकरञ्जनं भवभञ्जनमिति द्वे गेयविशेषणे ॥ -१५५–१६७- ॥

(सु०) सरस्वत्यादीना नाडीनामवस्थानमाह—**सरस्वतीति** । सरस्वती सुषुम्णाया दक्षिणपार्श्वे तिष्ठति, कुहूर्वामपार्श्वे, गाधारीडायाः पश्चात्प्रदेशे, हस्तिजिह्विका पूर्वप्रदेशे, पूषा पिङ्गलायाः पृष्ठप्रदेशे, यशस्विनी पूर्वप्रदेशे; विश्वोदरा कुहूहस्तिजिह्वयोर्मध्ये, वारुणी कुहूयशस्विन्योर्मध्ये । पयस्विनी पूषासरस्वत्योर्मध्यमधिशेते । 'अधिशीङ्स्थाऽऽसा कर्म' इति कर्मत्वम् । शङ्खिनी गाधारिकासरस्वत्योर्मध्ये तिष्ठति, अलम्बुसा पूर्वोक्तस्य कदस्य मध्ये । एतासा नाड़ीना प्रमाण कथयति—**तत्रेति** । इडा सव्यनासापर्यन्तम्, पिङ्गला दक्षिण-

सरस्वत्यूर्ध्वमाजिह्वं गांधार्या पृष्ठतः स्थिता ।
आवामनेत्रमासव्यपादाङ्गुष्ठं तु संस्थिता ॥ १६० ॥
हस्तिजिह्वा सर्वगा तु वारुण्यथ यशस्विनी ।
आ ऽङ्गुष्ठाद्दक्षिणाङ्घ्रिस्था देहे विश्वोदरा ऽखिले ॥ १६१ ॥
शङ्खिनी सव्यकर्णान्तं पूषा त्वा याम्यनेत्रतः ।
पयस्विनी तु वितता दक्षिणश्रवणावधि ॥ १६२ ॥
अलम्बुसा पायुमूलमवष्टभ्य व्यवस्थिता ।
एवंविधे तु देहे ऽस्मिन्मलसंचयसंवृते ॥ १६३ ॥
प्रसाधयन्ति धीमन्तो भुक्तिं मुक्तिमुपायतः ।
तत्र स्यात्सगुणाद्ध्यानाद्भुक्तिर्मुक्तिस्तु निर्गुणात् ॥ १६४ ॥
ध्यानमेकाग्रचित्तैकसाध्यं न सुकरं नृणाम् ।
तस्मादत्र सुखोपायं श्रीमन्नादमनाहतम् ॥ १६५ ॥
गुरूपदिष्टमार्गेण मुनयः समुपासते ।

नासापर्यन्तम्, कुहूर्मेहनपर्यन्तम्, सरस्वत्यूर्ध्वं जिह्वापर्यन्तम्, गाधारी पृष्ठप्रदेशपर्यन्तम्, हस्तिजिह्वा वामनेत्रादारभ्य वामपादाङ्गुष्ठपर्यन्तम्, वारुणी सर्वप्रदेशे । यशस्विन्यङ्गुष्ठादारभ्य दक्षिणाङ्घ्रौ तिष्ठति, अखिले देहे विश्वोदरा । शङ्खिनी सव्यकर्णपर्यन्तम् । पूषा ऽऽ दक्षिणनेत्रतः । पयस्विनी दक्षिणकर्णपर्यन्तम् । अलम्बुसा पायुमूल गुदमूलमवष्टभ्य स्थिता । पिण्डनिरूपणमुपसहरति—एवंविध इति । भुक्तिर्मुक्तिश्च देह उपायात्सिध्यत इत्युक्तम्, तयोरुपाय कथयति—तत्रेति । पूर्व सगुणोपासनोक्तिस्तु निर्गुणोपासना प्रति तस्या हेतुत्व सूचयितुम् । तथोक्त वेदान्तकल्पतरौ—

'निर्विशेष पर ब्रह्म साक्षात्कर्तुमनीश्वरा ।
ये मन्दास्ते ऽनुकम्प्यन्ते सविशेषनिरूपणै ॥' इति ।

सगुणनिर्गुणब्रह्मोपासनास्वसमर्था नादमुपासत इत्याह—ध्यानमिति । न सुकरम्,

सो ऽपि रक्तिविहीनत्वान्न मनोरञ्जको नृणाम् ॥ १६६ ॥
तस्मादाहतनादस्य श्रुत्यादिद्वारतो ऽखिलम् ।
गेयं वितन्वतो लोकरञ्जनं भवभञ्जनम् ॥ १६७ ॥
उत्पत्तिमभिधास्यामस्तथा श्रुत्यादिहेतुताम् ।

अथ तृतीयं नादस्थानश्रुतिस्वरजातिकुल-दैवतर्षिच्छन्दोरसप्रकरणम्

चैतन्यं सर्वभूतानां विवृत्तं जगदात्मना ।
नादब्रह्म तदानन्दमद्वितीयमुपास्महे ॥ १ ॥

सुखेन कर्तुमशक्यम् । अनाहतो ऽपि नादो न जनमनोहर इत्याह—**सो ऽपीति** । पूर्वप्रकृतमुपसहरन्नुत्तरत्राभिधेय प्रतिजानीते—**तस्मादिति** । श्रुत्यादीत्यादिशब्देन स्वरग्राममूर्च्छनातानकूटतानादयो गृह्यन्ते, तद्द्वारतो ऽखिल गेय गानक्रियायोग्य जात्यादि वितन्वतो विस्तारयत आहतनादस्योत्पत्ति श्रुत्यादिहेतुत्व च वक्ष्याम इति सबन्ध । लोकरञ्जन भवभञ्जनमिति गेयस्य विशेषणद्वय भुक्तिमुक्तिप्रदत्व सूचयति, अन्यथा सगुणनिर्गुणब्रह्मोपासनाऽनुकल्पत्व नादोपासनाया नावकल्पेतेत्यर्थ· ॥ -१५५–१६७- ॥

इति प्रथमे स्वरगताध्याये द्वितीयं पिण्डोत्पत्तिप्रकरणम् ॥ २ ॥

(क०) शरीरं निरूप्य शारीरनादादिप्रकरणमारभमाण श्रुत्यादिप्रपञ्चनिदानस्य नादस्य चैतन्यादिसाधर्म्येण ब्रह्मत्वं रूपयित्वा तस्य परदेवतात्वमनुसंधायोपास्ते—**चैतन्यमिति** । सर्वभूताना सकलप्राणिना चैतन्यम् ।

नादोपासनया देवा ब्रह्मविष्णुमहेश्वराः ।
भवन्त्युपासिता नूनं यस्मादेते तदात्मकाः ॥ २ ॥

नादो हि स्फोटात्मना समस्तपदार्थप्रकाशकत्वसाधर्म्येण चैतन्यारोपविषयत्वाच्चैतन्यम् । जगदात्मना परिदृश्यमानचराचरप्रपञ्चाकारेण विवृत्तमतत्त्वतोऽन्यथाभूतम्, नादे श्रुतिवर्णादिसकलशब्दप्रपञ्चप्रतिभाससाधर्म्येण नामरूपोल्लिखितस्य जगतोऽप्यधिष्ठानत्वारोपात् । आनन्दमभिव्यञ्जकेऽस्मिन्नभिव्यङ्ग्यानन्दरूपारोपात् । अद्वितीयं स्वकार्यस्वरादिप्रपञ्चकारणत्वरूपेण ब्रह्मसाधर्म्येणैकत्वारोपात् । तदिति सर्वलोकप्रसिद्धम् । नादब्रह्म, नाद एव ब्रह्मेत्यभेदप्राधान्य आरोपविषयभूतनादानपह्नवे चैतन्याद्यवयवयुक्तत्वेन समस्तवस्तुविषय सावयवरूपकम् । उपास्महे इति 'अस्मदो द्वयोश्च' इति बहुवचनोपपत्ति । अयमभिसंधि —परावाक्पर्यायस्य ब्रह्मशक्तेर्नादस्य ब्रह्मणोऽत्यन्तप्रत्यासन्नत्वात्तदुपासनाया कृताया ब्रह्मप्राप्तिर्मणिप्रभाप्रवृत्तस्य मणिलाभवद्भवेदिति । तथा चोक्तम्—

'अतो गीतप्रपञ्चस्य श्रुत्यादेस्तत्त्वदर्शनात् ।
अपि स्यात्सच्चिदानन्दरूपिण परमात्मन· ॥
प्राप्तिः प्रभाप्रवृत्तस्य मणिलाभो यथा भवेत् ।
प्रत्यासन्नतया ऽत्यन्तम्'

इति, 'वीणावादन— ' इत्यादि च । ननूपासनस्य सगुणेषु प्रसिद्धदेवताऽन्तरेषु सत्स्वपि किमचेतनस्य नादस्य ब्रह्मत्वरूपेणोपासनमित्यत आह—**नादोपासनयेति** । तत्रोपपत्तिमाह—यस्मादेते तदात्मका इति । अत्र तदिति नादब्रह्म परामृश्यते । तस्मादभिन्ना यतो ऽत इत्यर्थ. ॥ १, २ ॥

आत्मा विवक्षमाणो ऽयं मनः प्रेरयते मनः ।
देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ॥ ३ ॥
ब्रह्मग्रन्थिस्थितः सो ऽथ क्रमादूर्ध्वपथे चरन् ।
नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयति ध्वनिम् ॥ ४ ॥
नादो ऽतिसूक्ष्म सूक्ष्मश्च पुष्टो ऽपुष्टश्च कृत्रिमः ।
इति पञ्चाभिधा धत्ते पञ्चस्थानस्थितः क्रमात् ॥ ५ ॥
नकारं प्राणनामानं दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादो ऽभिधीयते ॥ ६ ॥

(सु०) एव श्रुत्यादिकारण पिण्ड निरूप्य श्रुतिस्वरादि निरूपयितुमिच्छुः प्रकृतानुगुण मङ्गलमाचरति—चैतन्यमिति । नाद एव ब्रह्म नादब्रह्म, तदुपास्महे । सर्वभूताना चैतन्यं चैतन्यफल वा, नादाभावे चेतनाना पाषाणादिभिरचेतनै· को विशेषः स्यात्? ब्रह्मपक्षे सर्वभूताना चैतन्य ज्ञानम्, 'सत्य ज्ञानमनन्त ब्रह्म' इति श्रुतेः । जगदात्मना विवृत्तम्, जगति प्रसिद्धत्वान्नादस्य जगद्रूपेण विवृत्ततोच्यते । ब्रह्मपक्षे ऽप्रच्युतप्राच्यावस्थस्यासन्नानाकारावभासो विवर्तः । एव ब्रह्मैव जगदाकारेण विवर्तत इत्यर्थ· । आनन्दं सुखसाधनम् । पक्षे सुख सुखरूपम्, 'आनन्दो ब्रह्मेति व्यजानात्' इति श्रुते· । अद्वितीयमनुपम लोकोत्तरम् । पक्षे सजातीयविजातीयस्वगतभेदशून्यम् । अत्र श्लिष्टरूपकमलकार· ॥ किमर्थं नाद उपास्यत इत्यत आह—नादोपासनयेति । ब्रह्मादयो देवा नादोपासनयोपासिता भवन्तीत्यत्र हेतुर्यस्मादेते तदात्मका इति । नादात्मका इत्यर्थ. ॥ १, २ ॥

(क०) तस्य नादस्य नित्यत्वमङ्गीकृत्य तदभिव्यक्तिक्रममाह—**आत्मा विवक्षमाण** इत्यादिना । विवक्षमाण इति ब्रुव इच्छाया सनि तस्यार्धधातुकत्वाद् ब्रुवो वच्यादेशे 'पूर्ववत्सन' इति निमित्तातिदेशत्वादात्मनेपदित्वे रूपम् ॥ नाभ्यादिस्थानेष्वाविर्भूतस्य नादस्य क्रमेण

व्यपदेशभेदमाह—**नादो ऽतिसूक्ष्म** इति ॥ नादशब्दस्य योगतो निरुक्तिमाह—**नकारमिति** । प्राणनामानं प्राण इति नाम यस्यासौ प्राणनामा, तम् । एतेन मन्त्रशास्त्रानुसारतो बीजाक्षराणा तत्तद्देवताताद्रूप्यापत्त्या ऽत्र नकारदकारौ प्राणाग्नी इत्युक्तं भवति । विदु , मान्त्रिका इति शेष । जात उदित , अभिव्यक्त इति यावत् । उक्तपञ्चविधनादस्याप्यविशेषेण गीतोपयोगित्वे प्राप्ते, हृत्कण्ठमूर्धस्थानेष्वेव श्रुतिपदनाडीसद्भावात्तत्रत्यस्यैव नादत्रयस्य गीतोपयोगित्वम् ॥ ३—६ ॥

(सु०) नादोत्पत्तिप्रकारमाह—**आत्मेति** । वक्तुमिच्छन्विवक्षमाण आत्मा मनो ऽन्त.करण प्रेरयते । तदन्त.करणमात्मप्रेरित सद्देहस्थमुदर्यमग्निमाहन्ति ताडयति । स वह्निर्मारुतं वायु प्रेरयति ॥ स पूर्व ब्रह्मग्रन्थिस्थितस्तेन वह्निना प्रेरितः सन्नूर्ध्वमार्गे गच्छन्नाघातेन नाभिहृदयकण्ठमूर्धमुखेषु ध्वनि प्रकटयति । ऊर्ध्वपथ इति प्रकृतगानोपयोगार्थम्, अधो ऽप्यनाहतस्य नादस्योत्पत्तेः, तदुक्तम्—

'कदस्थानसमुत्थो ऽपि समीर सचरन्नध' ।
ऊर्ध्व च कुरुते सर्वान्नादान्मूर्धनि तूद्भतान् ॥'

इति ॥ पञ्चविधस्य नादस्य सज्ञा' कथयति—**नाद** इति । सूक्ष्मो ऽतिसूक्ष्मः पुष्टो ऽपुष्ट' कृत्रिम इत्ययमेव क्रमो ज्ञातव्यः । ग्रन्थान्तरे तु पुष्टापुष्टयोर्व्यक्तो ऽव्यक्त इति नामनी । तथा चोक्त मतङ्गेन—

'सूक्ष्मश्चैवातिसूक्ष्मश्च व्यक्तो ऽव्यक्तश्च कृत्रिमः ।
सूक्ष्मनादो गुहावासी हृदये चातिसूक्ष्मकः ॥
कण्ठमध्यस्थितो व्यक्तश्चाव्यक्तस्तालुदेशगः ।
कृत्रिमो मुखदेशे तु ज्ञेयः पञ्चविधो बुधैः ॥'

इति ॥ नादशब्दव्युत्पत्तिं कथयति—**नकारमिति** । नामलिङ्गानुशासनविदो नकार प्राणनामान विदुर्दकार चाग्निम् । नदाभ्या जात इत्यणप्रत्यये जाते,

व्यवहारे त्वसौ त्रेधा हृदि मन्द्रो ऽभिधीयते ।
कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥ ७ ॥

आदिवृद्धौ च नाद इति रूप सिध्यति। मतङ्गेन तु नद्यत इति नाद इति व्युत्पत्तिर्दर्शिता । तथा चोक्तम्—

'नकार प्राण इत्याहुर्दकारश्चानलो मतः ।
नादस्य हि पदार्थो ऽय समीचीनो मयोदितः ।
नादो ऽयं नदतेर्धातोः स च पञ्चविधो भवेत् ॥'

इति ॥ ३–६ ॥

(क०) नामान्तराणि स्वरूपभेदं चाह—**व्यवहारे त्विति**। व्यवह्रियत इति व्यवहारो गीतम्, तस्मिन्। तु· पक्षं व्यावर्तयति। नाभ्यास्यस्थानयोर्नैवमित्यर्थ । **द्विगुणश्चोत्तरोत्तर** इति। उत्तरोत्तरः, मन्द्रादुत्तरो मध्यो मध्यादुत्तरस्तार इति यावत्। द्विगुण, गुण उच्चारणप्रयत्नः, द्वौ गुणौ यस्येति द्विगुणः। अयमर्थ·—मन्द्रस्थानस्थितात्षड्जादिव्यपदेशवतो नादान्मध्यस्थानस्थित· स एव षड्जादिव्यपदेशवास्ततो ऽपि द्विगुणप्रयत्नसाध्यत्वाद् द्विगुण इति। पूर्वस्थानस्थितात्क्रमेणारोहे सत्यष्टमः स्वर इति यावत्। अत्रासाविति नादसामान्यनिर्देशे ऽपि व्यवहारानुपयोगात्स्वररूपनादाद् द्वैगुण्य विवक्षितम्। श्रुतिरूपनादविवक्षाया तु त्रयोविंशो द्विगुणः ॥ ७ ॥

(सु०) त्रिविधस्य नादस्य व्यवहारयोग्यत्व कथयति—**व्यवहारे त्विति**। व्यवहारे गानव्यवहारे, घटपटाद्यभिधानव्यवहारे तु मुखोत्पन्नस्यापि ध्वनेरुपयोगित्वात्। हृदि य उत्पद्यते नाद स मन्द्र इति कथ्यते, यस्तु कण्ठ उत्पद्यते स मध्यः, यस्तु मूर्ध्नि स तारः। एषा मानं कथयति—**द्विगुण** इति। यावान्मन्द्रस्ततो द्विगुणो मध्यः, यावान्मध्यस्ततो द्विगुणस्तार । तदुक्त संगीतसमयसारे—

'त्रीणि स्थानानि हृत्कण्ठशिरासीति समासतः ।
एकैकमपि तेषु स्याद् द्वाविंशतिविधायुतम् ॥

तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः ।
हृद्यूर्ध्वनाडीसंलग्ना नाड्यो द्वाविंशतिर्मताः ॥ ८ ॥
तिरश्च्यस्तासु तावत्यः श्रुतयो मारुताहतेः ।
उच्चोच्चतरतायुक्ताः प्रभवन्त्युत्तरोत्तरम् ॥ ९ ॥
एवं कण्ठे तथा शीर्षे श्रुतिद्वाविंशतिर्मता ।

द्वाविंशतिविधो मन्द्रो ध्वनिः सजायते हृदि ।
यथोत्तरमसौ नादो वीणायामधरोत्तरम् ॥
स एव द्विगुणो मध्यः कण्ठस्थाने यथाक्रमम् ।
स एव मस्तके तारः स्यान्मध्याद् द्विगुण क्रमात् ॥
इति स्वरगता ज्ञेया. श्रुतयः श्रुतिवेदिभिः ।
अन्तरस्वरवर्तिन्यो ह्यन्तरश्रुतयो मताः ॥ '

इति ॥ ७ ॥

(क०) स्थानान्युक्त्वा क्रमप्राप्ता श्रुतीर्नादभेदत्वेनाह—**तस्येति** । तस्यैकैकस्थानाविर्भूतस्य नादस्य । सामान्यविवक्षयैकत्वम् । द्वाविंशतिर्भेदा अभिव्यञ्जकनाडीभेदवशात् । श्रवणाच्छ्रवणयोग्यत्वात् । श्रुतय·, श्रूयन्त इति व्युत्पत्त्या । एतदुक्तं भवति—यद्यपि श्रवणयोग्यत्वमनुरणनात्मनः स्वरतानादिरूपेण दीर्घदीर्घस्यापि ध्वनेर्विद्यते, तथा ऽप्यत्र मारुताद्याहत्यनन्तरोत्पन्नप्रथमक्षणवर्तिश्रवणमात्रयोग्यध्वनेरेव श्रुतित्वमिति । तत्र मन्द्रस्थाने श्रुतिभेदजनकनाडीना संनिवेशमाह—**हृदीति** । ऊर्ध्वनाड्याविडापिङ्गले, तयोः संलग्ना नाड्य· सच्छिद्रा नाडिका·, तासु नाडीषूत्तरोत्तरमुच्चोच्चतरतायुक्ता । उच्चा चोच्चतरा चोच्चोच्चतरे, तयोर्भावावुच्चोच्चतरते, ताभ्या युक्ताः श्रुतयः प्रभवन्ति । अयमर्थ·—मन्द्रस्थाने प्रथमनाड्युत्पन्ना श्रुतिरतिनीचा । तदपेक्षया द्वितीयातृतीययो· श्रुत्योरुच्चोच्चतरते । तत्र द्वितीयाया

उच्चायास्तृतीया किंचिदुच्चेति तरप्प्रयोगः । एवं तृतीयाचतुर्थ्यादिषु श्रुतिषु द्वयोर्द्वयोर्द्रष्टव्यमिति ॥ एवं प्रथमस्थानोक्तमर्थमुत्तरोत्तरस्थानद्वये ऽप्यतिदिशति—**एवं कण्ठ** इति ॥ ८–९- ॥

(सु०) तस्य नादस्य भेदान्कथयति—तस्येति । तस्य नादस्य द्वाविंशतिसंख्याका भेदा भवन्ति । ते च श्रुतिसंज्ञयोच्यन्ते । तत्र व्युत्पत्तिं कथयति—**श्रवणादिति** । श्रूयन्त इति श्रुतय इत्यर्थः । तथा चोक्तं मतङ्गेन—

'श्रवणार्थस्य धातोः क्तिन्प्रत्यये च सुसंश्रिते ।
श्रुतिशब्दः प्रसाध्यो ऽयं शब्दज्ञैः कर्मसाधनः ॥'

इति । तत्र श्रुतेरेकत्वानेकत्वविषये महती विप्रतिपत्तिः । देहाकाशपवनसंयोगात् पुरुषप्रयत्नप्रेरितो ध्वनिर्नाभेरूर्ध्वमाकाशदेशमाक्रामन्धूमवत्सोपानपदावस्थानं पवनेच्छया ऽनेकधा ऽऽरोहन्नन्तर्भूतपूरणप्रत्ययार्थतया चतुःश्रुतित्वादिभेदभिन्नो ऽवभासत इति मतङ्गः । विश्वावसुस्तु द्वैविध्यं श्रुतेरुक्तवान् । तथा चाह—

'श्रवणेन्द्रियग्राह्यत्वाद्ध्वनिरेव श्रुतिर्भवेत् ।
सा चैका द्विविधा ज्ञेया स्वरान्तरविभागतः ॥
नियतश्रुतिसंस्थातो गीयन्ते सप्त गीतिषु ।
तस्मात्स्वरगता ज्ञेयाः श्रुतयः श्रुतिवेदिभिः ॥
अन्तरस्वरवर्तिन्यो ह्यन्तरश्रुतयो मताः ।'

इति । केचित्स्थानत्रययोगाच्छ्रुतीनां त्रैविध्यं प्रतिपद्यन्ते । केचिद् द्वाविंशतिं श्रुतीराहुः । केचित्षट्षष्टिम् । अन्ये आनन्त्यम् । तथा चाह कोहलः—

'द्वाविंशतिं केचिदुदाहरन्ति श्रुतीः श्रुतिज्ञानविचारदक्षाः ।
षट्षष्टिभिन्नाः खलु केचिदासामानन्त्यमन्ये प्रतिपादयन्ति ॥'

इति । तत्र मन्दतीव्रतीव्रतरादितारतम्याख्यविरुद्धधर्मसंसर्गस्य विद्यमानत्वाद्भेदस्तावत्सिद्धः । तदुक्तम्—'अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च' इति । मन्द्रमध्यतारस्थानेष्वपि ता एवैता श्रुतयस्त एवामी स्वरा इति प्रत्यभिज्ञानाद्भेदस्यासिद्धिः, तस्माद् द्वाविंशतिश्रुतिपक्ष एव समीचीन

व्यक्तये कुर्महे तासां वीणाद्वंद्वे निदर्शनम् ॥ १० ॥
द्वे वीणे सदृशौ कार्ये यथा नादः समो भवेत् ।
तयोर्द्वाविंशतिस्तन्त्र्यः प्रत्येकं तासु चादिमा ॥ ११ ॥
कार्या मन्द्रतमध्वाना द्वितीयोच्चध्वनिर्मनाक् ।
स्यान्निरन्तरता श्रुत्योर्मध्ये ध्वन्यन्तराश्रुतेः ॥ १२ ॥

इति मत्वा द्वाविंशतिरित्युक्तवान् । सख्यानियमे कारणमाह—हृदीति । हृदि, ऊर्ध्वनाडी सुषुम्णा, तत्सलग्ना , तिरश्चयस्तिर्यक्थिता द्वाविंशतिर्नाड्यः । तासु मारुतसबन्धात्तावन्त एव नादा उत्पद्यन्ते । तेषु विरुद्धधर्मसंसर्ग दर्शयति—उच्चेति । उत्तरोत्तरमुच्चोच्चतरतायुक्ता. । प्रथमो नादो हीनतमः, ततो ऽनन्तरमुच्चः, ततो ऽनन्तरमुच्चतर', ततो ऽनन्तरमुच्चतम इत्यर्थः । हृदय उक्त श्रुत्युत्पत्तिप्रकारं कण्ठशीर्षयोरतिदिशति—एवमिति ॥ ८–९- ॥

(क०) शरीरे प्रतिस्थानमुक्तसंख्याकनाडीसंनिवेशस्य तत्र श्रुत्युत्पादस्य च परोक्षत्वात्तत्तत्सद्भावे संदेह स्यादिति तन्निरासार्थं प्रत्यक्षत' सवादयितुं प्रतिज्ञाय निर्दिशति—**व्यक्तय** इत्यादिना । सदृशौ सदृशाकारे । यथा नाद' समो भवेदिति । यथा सदृशाकारयो. कृतयोर्नाद' समो भवेत्तथा सदृशौ कार्ये । नादसाम्ये लाघवादिविशिष्टाकारसाम्यं निमित्तमित्यर्थ' । **तासु चेति** । वीणयो' प्रत्येक द्वाविंशतौ तन्त्रीषु । चकारो द्वितीयवीणागततन्त्रीसमुच्चयार्थ' । आदिमा प्रथमा तन्त्री । कर्त्रपेक्षया संनिहितेत्यर्थः । मन्द्रतमध्वाना ऽतिमन्द्रस्वना , उत्तरोत्तराऽपेक्षया पूर्वपूर्वस्या मन्द्रत्वे संभवत्यपि सर्वापेक्षयेयं मन्द्रेति तमप्प्रयोग । अतिमन्द्रस्वनत्वं च तन्त्र्या अतिशिथिलीकरणेन भवति । ततो ऽपि शिथिलीकरणे यथा ऽनुरणनध्वन्यसंभवस्तथा कार्येत्यर्थः । द्वितीया तन्त्रीर्मनागुच्चध्वनि कार्या । मनागुच्चध्वनित्वस्यैव व्यवस्थापकम्—**स्यान्निरन्तरतेति** । श्रुत्यो. पूर्वोत्तर-

अधराधरतीव्रास्तास्तज्जो नादः श्रुतिर्मतः ।
वीणाद्वये स्वराः स्थाप्यास्तत्र षड्जश्चतुःश्रुतिः ॥ १३ ॥

तन्त्र्युत्पन्नयोर्मध्ये ध्वन्यन्तराश्रुतेर्ध्वन्यन्तरस्य पूर्वोत्तरश्रुतिविलक्षणस्य पूर्वश्रुते किंचिदुच्चस्योत्तरश्रुते किंचिन्नीचस्य चान्यध्वनेरश्रुतिरश्रवणम् । अश्रुतेरिति हेतौ पञ्चमी । मध्यगतध्वन्यन्तराश्रवणं निमित्तीकृत्य श्रुत्योर्निरन्तरता यथा स्यात्तथा तन्त्री· किंचिद् दृढीकरणेन मनागुच्चध्वनि. कार्येत्यर्थः । अत्र नैरन्तर्यं ध्वन्योरेवोक्तं न तु तन्त्र्योर्दण्डादिप्रदेशस्थयोः । अतस्तन्त्र्योर्दण्डादिषु मध्ये ऽवकाशो दृश्यत इति तत्र ध्वन्यन्तरसंभवो न शङ्कनीय । द्वितीयेत्युपलक्षणम् । तेन तृतीयाऽऽद्यो ऽपि द्वितीयाऽऽद्यपेक्षया किंचित्किंचिद् दृढीकरणेन मनागुच्चध्वनयः कार्या इत्यर्थ· । एवं कृते तास्तन्त्र्यो ऽधराधरतीव्रा उच्चोच्चध्वनयो भवन्ति । यथा शरीरे श्रुतय उत्तरोत्तरोच्चा उत्पद्यन्ते तथा वीणायामधराधरोच्चा उत्पद्यन्त इति बोद्धव्यम् । तज्ज, तासु तन्त्रीष्वाहत्योत्पन्नो नाद· श्रुतित्वेन मतः । अत्र श्रुतिशब्दनिरुक्तिपूर्वक श्रुत्येकत्वादिविषयविकल्पे मतङ्गो मतभेदानदर्शयत् । तद्यथा—

'श्रवणार्थस्य धातोः क्तिन्प्रत्यये च सुसंश्रिते ।
श्रुतिशब्दः प्रसाध्यो ऽयं शब्दज्ञै· कर्मसाधनः ॥'

श्रूयत इति श्रुति· । सा चैका ऽनेका वा । एकैव श्रुतिरिति । तद्यथा—तत्रादौ तावद्देहाकाशपवनसंयोगात्पुरुषप्रयत्नप्रेरितो ध्वनिर्नाभेरूर्ध्वमाकाशदेशमाक्रामन्धूमवत्सोपानपदक्रमेण पवनेच्छया ऽनेकधा ऽऽरोहन्नन्तर्भूतपूरणप्रत्ययार्थतया चतुःश्रुत्यादिभेदभिन्न· प्रतिभासत इति मामकीनं मतम् । अन्ये तु पुनर्द्विप्रकारा श्रुतिं मन्यन्ते । कथम् ? स्वरान्तरविभागात् । तथा चाह विश्वावसुः—

स्थाप्यस्तन्त्र्यां तुरीयायामृषभस्त्रिश्रुतिस्ततः ।
पञ्चमीतस्तृतीयायां गांधारो द्विश्रुतिस्ततः ॥ १४ ॥

'श्रवणेन्द्रियग्राह्यत्वाद् ध्वनिरेव श्रुतिर्भवेत् ।
सा चैका द्विविधा ज्ञेया स्वरान्तरविभागत· ॥
नियतश्रुतिसंस्थानाद् गीयन्ते सप्त गीतिषु ।
तस्मात्स्वरगता ज्ञेयाः श्रुतय· श्रुतिवेदिभि· ॥'

शुद्धस्वररूपा इत्यर्थः ।

'अन्तरस्वरवर्तिन्यो ह्यन्तरश्रुतयो मता· ।'

विकृतस्वररूपा इत्यर्थः । प्रयोगबहुलत्वापेक्षया श्रुतय इति बहुवचननिर्देश· ।

'एतासामपि वैस्वर्य क्रियाग्रामविभागतः ॥' इति ।

केचित्स्थानत्रययोगात्त्रिविधा श्रुति मन्वते । अन्ये त्विन्द्रियवैगुण्यात्त्रिविधा श्रुतिं मन्यन्ते । इन्द्रियवैगुण्यं च त्रिविध सहजं दोषजमभिघातजं चेति । अत्रेन्द्रियं मन· । तत्र सत्त्वगुणयुक्त सहजम्, रजस्तमोयुक्तं दोषजम्, अम्लादिरसोपहतमभिघातजमित्यर्थ । अपरे तु वातपित्तकफसंनिपातभेदभिन्ना चतुर्विधा श्रुतिं प्रतिपेदिरे । तथा चाह तुम्बुरु.—

'उच्चैस्तरो ध्वनी रूक्षो विज्ञेयो वातजो बुधै ।
गम्भीरो घनलीनस्तु ज्ञेयो ऽसौ पित्तजो ध्वनिः ॥
स्निग्धश्च सुकुमारश्च मधुर· कफजो ध्वनि· ।
त्रयाणा गुणसंयुक्तो विज्ञेयः संनिपातजः ॥'

इति । एते तु शब्दभेदत्वेन वक्ष्यन्ते । अपरे तु वेण्वादयो मुनयो नवविधा श्रुतिं मन्यन्ते । तथा हि—

अष्टमीतो द्वितीयायां मध्यमो ऽथ चतुःश्रुतिः ।
दशमीतश्चतुर्थ्यां स्यात्पञ्चमो ऽथ चतुःश्रुतिः ॥ १५ ॥
चतुर्दशीतस्तुर्यायां धैवतस्त्रिश्रुतिस्ततः ।

'द्विश्रुतिस्त्रिश्रुतिश्चैव चतुःश्रुतिक एव च ।
स्वरप्रयोगः कर्तव्यो वंशच्छिद्रगतो बुधैः ॥'

इति । भरतेनाप्युक्तम्—

'द्विकत्रिकचतुष्कास्तु ज्ञेया वंशगताः स्वराः ।
कम्पमानार्धमुक्ताश्च व्यक्तमुक्ताङ्गुलिस्वरा ॥
इति तावन्मया प्रोक्ताः समीच्यः श्रुतयो नव ।'

इति । एतानि षण्मतानि स्वरश्रुत्योरभेदमङ्गीकृत्य प्रवर्तितानीति मन्तव्यम् । तानि त्वभिव्यङ्ग्यत्वाभिव्यञ्जकत्वाभ्या साक्षाद्भिन्नरूपयोः स्वरश्रुत्योर्भेदापह्नवान्न समीचीनानि । अत्र केचिन्मीमासामासलितधियो धीरा द्वाविंशति श्रुतीर्मन्यन्ते । केचित्पुनः षट्षष्टिभेदभिन्ना श्रुतय इति वदन्ति । अन्ये पुनरानन्त्य वर्णयन्ति श्रुतीनाम् । तथा चाह कोहल —

'द्वाविंशति केचिदुदाहरन्ति श्रुतीः श्रुतिज्ञानविचारदक्षाः ।
षट्षष्टिभिन्नाः खलु केचिदासामानन्त्यमन्ये प्रतिपादयन्ति ॥'

इति । तत्र,

'आनन्त्यं हि श्रुतीनां च सूचयन्ति विपश्चितः ।
यथा ध्वनिविशेषाणामानन्त्यं गगनोदरे ॥
उत्तालपवनोद्वेलजलराशिसमुद्भवाः ।
इयत्तां प्रतिपद्यन्ते न तरङ्गपरंपराः ॥'

अष्टादश्यास्तृतीयायां निषादो द्विश्रुतिस्ततः ॥ १६ ॥
एकविंश्या द्वितीयायां वीणैका ऽत्र ध्रुवा भवेत् ।

इति श्रुतीनामानन्त्यं दर्शितमिति । अस्मिन्पक्षे रणनानुरणनात्मकयो श्रुतिस्वरयोर्भेदाङ्गीकारे ऽप्यनुरणनरूपाणामपि ध्वनीना श्रुतित्वमभिधायोभयेषामपि वीचीतरङ्गन्यायेनोत्पद्यमानाना तेषामतिसूक्ष्मभागकल्पनया प्रतिध्वन्यवयवभूतध्वनिबहुत्वविवक्षया ऽऽनन्त्यं दर्शितम् । तदनुपपन्नमिति मन्तव्यम् । यद्यपि श्रवणयोग्यस्य ध्वनेरिन्द्रियग्राह्यत्वाक्षिप्तेन सावयवत्वेन त्रसरेणुवदवयवाः सन्ति, तथा ऽपि तेषां श्रोत्रप्रत्यक्षमूलेनानुमानेनार्थापत्त्या वा ऽन्यतरेणैव त्रसरेणुगतपरमाणुवद्गम्यतया श्रोत्रग्राह्यत्वाभावात् स्वतः स्वराभिव्यक्तिहेतुत्वाभावेनाश्रुतित्वादिति । द्वाविंशतिश्रुतिपक्षे षट्षष्टिश्रुतिपक्षे च यद्यपि श्रुतिस्वरयोर्भेदाङ्गीकार समान एव, तथा ऽपि द्वाविंशतिश्रुतिपक्षे द्वाविंशतिः श्रुतय एव मन्द्रस्था स्थानान्तरयोरपि द्विगुणद्विगुणत्वेनावर्त्यन्त इति । षट्षष्टिश्रुतिपक्षे तु तावत्य एव श्रुतयः स्थानत्रये ऽप्यनावृत्ता परस्परं भिन्ना इति च वैषम्यम् । तत्रानावृत्तिपक्षस्वीकारे षड्जादीनामपि स्वराणामावृत्त्यभावान्मध्यतारस्थाश्चतुर्दश स्वराः पृथग्व्यपदेशभाजो भवेयुः । नैव तथा व्यवहारः । अत एव मतङ्गादिदर्शितेषु नवसु पक्षेषु द्वाविंशतिश्रुतिपक्षमेव रणनानुरणनात्मना साक्षादनुभूयमानश्रुतिस्वरभेदानपह्नवेनावृत्त्या सप्तानामेव स्वराणा गुणभिन्नाना व्यवहारोपयोगित्वसिद्धेश्च सारतमं निश्चित्य निःशङ्को वीणयोर्निदर्शिताना तासा द्वाविंशतिश्रुतीना मध्ये चतुर्थीप्रभृतिषु शास्त्रानुसारेण पूर्वोत्तरावधिप्रदर्शनपूर्वकं षड्जादिसप्तस्वरस्थापन विदधाति—**वीणाद्वय** इत्यादिना । **चतुःश्रुतिरिति** । स्वाभिव्यक्तिकरणत्वेन चतस्र श्रुतयो यस्येति स तथोक्त । एवं त्रिश्रुतिरित्यादौ द्रष्टव्यम् ॥ -१०—१६- ॥

(सु०) दृष्टान्तेन विनैते नादविशेषा दुरवबोधा, कण्ठे ऽपि दर्शयितुमशक्याः; तस्माद्वीणाद्वद्वे दृष्टान्तकथन प्रतिजानीते—व्यक्तय इति। ताः प्राकटयेन दर्शयितुमित्यर्थ । तदुक्तं सगीतसमयसारे—

'ते तु द्वाविशतिर्नादा न कण्ठेन परिस्फुटा. ।
शक्या दर्शयितु तस्माद्वीणाया तन्निदर्शनम् ॥'

इति। प्रतिज्ञातमर्थं कथयति—द्वे वीणे इति। सदृशौ समाने। आकारसाम्य नात्रोपयुज्यत इत्याह—यथा नादः समान एव भवतीति। तदुक्तम्—

'द्वे वीणे तुलिते कार्ये समस्तावयवैस्तथा ।
एकवीणेव भासेते यथा द्वे अपि शृण्वताम् ॥'

इति। तयोः प्रत्येक द्वाविशतिस्तन्त्र्यः स्थापनीया । तास्वाद्या मन्द्रतमध्वाना कर्तव्या। स मन्द्रतमो यस्माद्वीनो मन्द्रो ऽन्यो नादो रञ्जको न निष्पद्यते। द्वितीया तस्याः सकाशान्मनाक्किंचिदुच्चध्वनिः। किचिदित्यनेनैवोक्तमर्थं विशदयति—मध्ये ध्वन्यन्तराश्रुतेरिति। यथा मध्ये विसदृश ध्वन्यन्तर नोत्पद्यते तथा नैरन्तर्य विधेयम्। तदुक्तम्—

'द्वितीया तु ततस्तीव्रध्वनिस्तन्त्रीर्विधीयते ।
यथा यथा तयोर्मध्ये न तृतीया ध्वनिर्भवेत् ॥'

इति। तास्तन्त्र्यो ऽधोऽधःस्थातस्तीव्रनादा भवन्ति। ताभ्यस्तन्त्रीभ्यो जातो नादः श्रुतिरित्युच्यते। श्रुतेः प्रमाणमुक्त मतङ्गेन—ननु श्रुतेः कि मानम्? उच्यते, पञ्चमस्तावद् ग्रामद्वयस्थो लोके प्रसिद्धः। [1]तस्योत्कर्षापकर्षाभ्या मार्दवादायतत्वाद्वा यदन्तर तत्प्रमाणा श्रुतिरिति। स्थानत्रये षट्षष्टिसख्याकाना श्रुतीना नामान्युक्तानि संगीतसमयसारे—

'मन्द्रा चैवातिमन्द्रा च घोरा घोरतरा तथा ।
मण्डना च तथा सौम्या सुमनाः पुष्करा तथा ॥
शङ्खिनी चैव नीला च उत्पला चानुनासिका ।
घोषावती लीननादा आवर्तन्यपि चापरा ॥

[1] तस्य श्रुत्युत्कर्षापकर्षाभ्या.

चलवीणा द्वितीया तु तस्यां तन्त्रीस्तु सारयेत् ॥ १७ ॥
स्वोपान्त्यतन्त्रीमानेयास्तस्यां सप्त स्वरा बुधैः ।

रणदा चैव गम्भीरा दीर्घतारा च नादिनी ।
मन्द्रजा सुप्रसन्ना च निनदा मन्द्रसप्तके ॥
नादान्ता निष्कला गूढा सकला मधुरा गली ।
एकाक्षरा भृङ्गजाती रसगीती सुरञ्जिका ॥
पूर्णा ऽलंकारिणी चैव वाशिका वैणिका तथा ।
त्रिस्थाना सुस्वरा सौम्या भाषाऽङ्गी वार्त्तिका तथा ॥
सपूर्णा च प्रसन्ना च सर्वव्यापनिका तथा ।
द्वाविंशतिः समाख्याताः श्रुतयो मध्यसप्तके ॥
ईश्वरी चैव कौमारी सवराली तथा परा ।
भोगवीर्या मनोरामा सुस्निग्धा च तथा परा ॥
दिव्याङ्गा ऽथो सुललिता विद्रुमा च तथा परा ।
महार्का शङ्खिनी राका लज्जा चैव तथा परा ॥
काली सूक्ष्मा ऽतिसूक्ष्मा च पुष्टा चैव सुपुष्टिका ।
विस्पष्टा काकली चैव कराली च तथा परा ॥
विस्फोटान्तर्भेदिनी च इत्येतास्तारसप्तके ।'

इति । श्रुतिभ्यः स्वरोत्पत्तिप्रकार कथयति—वीणाद्वय इति । वीणाद्वये स्वराः स्थापनीयाः । तत्र चतस्रः श्रुतयो यस्य संबन्धिन्यः स चतुःश्रुतिः षड्जस्तुरीयाया चतुर्थ्यां तन्त्र्या स्थाप्यः । त्रिश्रुतिर्ऋषभः सप्तम्याम् । द्विश्रुतिर्गांधारो नवम्याम् । चतुःश्रुतिर्मध्यमस्त्रयोदश्याम् । चतुःश्रुतिः पञ्चमः सप्तदश्याम् । त्रिश्रुतिर्धैवतो विंशतितम्याम् । द्विश्रुतिर्निषादो द्वाविंश्याम् ॥ -१०-१६- ॥

(क०) अत्र वीणयोः । एका ध्रुवा भवेदिति । अनयोश्चलत्वध्रुवत्वे सारणाऽन्वयव्यतिरेकानुविधायिनी । द्वितीयेति । ध्रुवत्वेन कल्पिताया अन्येत्यर्थः । अत्र तुशब्दो व्यपदेशान्तरपरिग्रहार्थः । श्रुतिगतेयत्तापरिज्ञानार्थं

ध्रुववीणास्वरेभ्यो ऽस्यां चलायां ते स्वरास्तदा ॥ १८ ॥
एक ुत्यपकृष्टाः स्युरेवमन्या ऽपि सारणा[1] ।

चलवीणाया सारणा विदधाति—**तस्यामिति** । तन्त्रीस्तु सारयेदिति । तुशब्दो भिन्नक्रम । तस्या त्विति योजना ध्रुवातो वैषम्यप्रदर्शनार्था । सारयेत्सारणा कुर्यात्, स्वस्वतन्त्रीस्थितान्स्वरास्तत्तच्छ्रुतिस्थानात्प्रच्याव्य श्रुत्यन्तराणि तन्त्री प्रापयेदित्यर्थ· ॥ सारयेदित्यनेनानियमेन श्रुत्यन्तर-प्रापणे प्राप्ते, प्रथमादिसारणासु श्रुत्यन्तरनियममाह—**स्वोपान्त्येति** । तस्या प्रथमाया सारणायाम् । ननु श्रुत्यन्तरप्राप्त्या स्वरान्तरत्वं कि न स्यादित्यत आह—ध्रुववीणास्वरेभ्य इति । ते स्वरास्तदैकश्रुत्यपकृष्टा स्युरित्यत्र त इति ध्रुवायामिव चतु.श्रुतिकत्वादिलक्षणाना षड्जादीना परामर्शाच्छ्रुत्यन्तर-प्राप्त्या स्वरान्तरत्वप्राप्तावप्येकश्रुत्यपकर्षेण तेषामेव नीचत्वमात्रप्रतीतेर्विशेष-लाभाभावात्स्वरान्तरत्वं न स्यादित्यर्थ । उक्तं प्रकारं सारणाऽन्तरे ऽप्यति-दिशति—**एवमिति** । पूर्वत्र सारणायामेकश्रुत्यपकृष्टान्स्वरान्प्रकृति कृत्वा तेषा ततो ऽप्युपान्त्यतन्त्र्यानयनमिहान्यशब्दार्थः ॥ -१७—१८- ॥

(सु०) अत्र वीणाद्वय एका चलवीणैका ध्रुववीणा । यस्या स्वरा· स्वस्थान परित्यज्यापकृष्यन्ते सा चलवीणा, यस्या तु नापकृष्यन्ते सा ध्रुववीणा । श्रुतिनिश्चयार्थ चलवीणाया यत्कर्तव्य तदाह—**तस्यामिति** । तस्या चलवीणाया तन्त्रीः सारयेदपकर्षयेत् । प्रथमसारणाप्रकारमाह—**स्वोपान्त्येति** । तस्या चल-वीणाया सप्तापि स्वरा यत्र स्थापितास्ता अन्त्यास्तन्त्र्यः, तत्समीपवर्तिन्यो ऽपकृष्टा उपान्त्या , तासु सप्त स्वरा आनेया. स्थापनीयाः । एव प्रथमसारणाया कृताया कि स्यात्? तदाह—**ध्रुववीणेति** । अस्या चलाया चलवीणाया ते षड्जादयः स्वरा ध्रुववीणास्वरेभ्यस्तदपेक्षयैकश्रुत्या ऽपकृष्टा स्यु· । एवमेव

[1] ०मन्याश्च सारणा

श्रुतिद्वयलयादस्यां चलवीणागतौ गनी ॥ १९ ॥
ध्रुववीणोपगतयो रिधयोर्विशतः क्रमात् ।
तृतीयस्यां सारणायां विशतः सपयो रिधौ ॥ २० ॥
निगमेषु चतुर्थ्यां तु विशन्ति समपाः क्रमात् ।
श्रुतिद्वाविंशतावेवं सारणानां चतुष्टयात् ॥ २१ ॥

द्वितीयतृतीयचतुर्थ्यः सारणाः कर्तव्या इत्याह—एवमिति । प्रतिसारणं स्वराणा ततो ऽपि पुनरेकैकश्रुत्यपकर्षः कर्तव्यः ॥ -१७-१८- ॥

(क०) द्वितीयादिषु सारणासु ज्ञेयं दर्शयति—**श्रुतिद्वयेत्य** दिना । अस्या द्वितीयसारणाया चलवीणागतौ चलवीणाया स्वस्वोपान्त्यतन्त्रीस्थितौ गनी गाधारनिषादौ ध्रुववीणोपगतयोर्ध्रुववीणाया स्वस्वाधारश्रुतिस्थयो रिधयोर्ऋषभधैवतयो क्रमादृषभे गाधारो धैवते निषादश्च श्रुतिद्वयलयात्प्रातिस्विकश्रुतिद्वयपरित्यागाद्विशतो लीनौ भवत । ध्वनिसाम्यादेकाकारता भजत इति यावत् । एवं तृतीयचतुर्थसारणयोरपि स्वरान्तरप्रवेशो द्रष्टव्यः । ननु चतुर्थसारणाया मन्द्रषड्जस्य निषादे प्रवेश उच्यते, तत्कथमुपपद्यते ? 'कार्या मन्द्रतमध्वाना' इति षड्जादिमश्रुतेरारम्भात्तत्पूर्वध्वन्यसंभवेनोपान्त्यतन्त्र्यभावात् । सत्यं ध्वन्यसंभवात्तन्त्र्यभाव, तथा ऽपि मन्द्रस्वरसप्तकस्यावृत्तौ षड्जनिषादयो संनिधानान्निषादाधारश्रुतेरुपान्त्यत्वं कल्पयित्वा प्रवेश पर्यवस्यतीत्युपपन्नम् । अथ वा, स्थानान्तरावृत्तस्य तस्यैव षड्जस्य पूर्वं निषादसंभवात्तस्मिन्प्रवेशो द्रष्टव्य. । सारणाना फलमाह—**श्रुतिद्वाविंशताविति** । यद्येवं स्यादेतदनावृत्तिमतानुसारेण सारणापञ्चकेनापि सप्तानामपि स्वराणामेकोनत्रिंशच्छ्रुतीयत्तानिश्चय कर्तुं शक्यत इति । नैवम् । स्वरास्तावच्छ्रुत्यनुरणनात्मका । ते च षड्जादयो

ध्रुवाश्रुतिषु लीनायामियत्ता ज्ञायते स्फुटम् ।
अतः परं तु रक्तिघ्नं न कार्यमपकर्षणम् ॥ २२ ॥
श्रुतिभ्यः स्युः स्वराः षड्जर्षभगांधारमध्यमाः ।

लोके शास्त्रे च चतुर्थ्यादिश्रुतिषु मयूरादिस्वरसंवादित्वेनाभिव्यक्ताः सिद्धा' । तेषा तदुक्तरीत्योत्कर्षणेन पञ्चम्यादिषु श्रुतिषु प्रापणे कृते तादृशानुरणनाभावान्मन्द्रमध्ययोरुत्तरोत्तरस्थानाक्रमणे तारमन्द्रव्यवस्थितेरपायाच्च यतो रक्तिघातः, अत सारणाऽन्तरं न कर्तव्यमित्यभिसंधायोक्तम्—**अतः परं त्विति** ॥ -१९–२२ ॥

(सु०) द्वितीयसारणाया कृताया यत्सिध्यति तदाह—**श्रुतिद्वयेति** । अस्या चलवीणाया द्वितीयसारणाया कृताया श्रुतिद्वयस्य लयादपकर्षाच्चलवीणाया वर्तमानौ गाधारनिषादौ ध्रुववीणागतयोर्ऋषभधैवतयो प्रविशत' । **क्रमादिति** । गाधार ऋषभ निषादो धैवतमित्यर्थ' । तयोः प्रविशत इति तत्समाननादौ भवत इत्यर्थ । तृतीयसारणाया सिद्ध कथयति—**तृतीयस्यामिति** । सपयोः षड्जपञ्चमयोर्ऋषभधैवतौ विशत । ऋषभः षड्ज प्रविशति, धैवतः पञ्चम प्रविशति । चतुर्थ्या तु सारणाया मध्यषड्जो मन्द्रनिषाद प्रविशति, मध्यमो गाधार प्रविशति, पञ्चमो मध्यम प्रविशति । उपसहरति—**श्रुतिद्वाविंशताविति** । एव सारणाचतुष्टयाच्छ्रुतिद्वाविशतौ ध्रुवाश्रुतिषु लीनाया सत्या द्वाविशतिरेव श्रुतय इतीयत्तैतावत्सख्याकत्व ज्ञायते । द्वितीयसारणाया श्रुतिचतुष्टयलाभः, तृतीयाया षट्श्रुतिलाभ', चतुर्थ्या द्वादशश्रुतिलाभः । ननु पुनरप्यपकर्षण कर्तव्यम्, नेत्याह—**अतः परमिति** । अतः परमपकर्षण न कार्यम् । कुतः ? यतो **रक्तिघ्नमिति** । अत. परमपकर्षणे कृते स्वराणा रञ्जकत्वाभावात्स्वरत्वमेव नश्यति, 'स्वतो रञ्जयति श्रोतृचित्त स स्वर उच्यते' इति वक्ष्यमाणत्वात् ॥ -१९–२२ ॥

(क०) इत्थमियत्तया निश्चिताभ्य श्रुतिभ्य स्वराणा निष्पत्तिमाह—**श्रुतिभ्यः स्युः स्वरा** इति । चतसृभ्यस्तिसृभ्यो द्वाभ्या च

पञ्चमो धैवतश्चाथ निषाद इति सप्त ते ॥ २३ ॥
तेषां संज्ञाः सरिगमपधनीत्यपरा मताः ।

यथायोगं द्वाविंशते श्रुतिभ्यः सप्त स्वरा भवन्तीत्यर्थ । अत्र पञ्च पक्षा सभवन्ति—श्रवणैकेन्द्रियग्राह्यत्वाद्विशेषस्पर्शशून्ययो स्वरश्रुत्योर्जातिव्यक्त्योरिव तादात्म्यमिति प्रथम पक्ष· । दर्पणे मुखविवर्तवच्छ्रुतिषु स्वरा विवर्तन्त इति द्वितीय· । यथा घटस्य मृत्पिण्डदण्डादिकार्यत्व तथा स्वराणा श्रुतिकार्यत्वमिति तृतीय· । क्षीर दधिरूपेणेव श्रुतय स्वररूपेण विपरिणमन्त इति चतुर्थ. । प्रदीपादन्धकारस्थितघटाद्यभिव्यक्तिवच्छ्रुतिभ्य· स्वराणामभिव्यक्तिरिति पञ्चम । नाद्य·, स्वरश्रुत्योर्भिन्नबुद्धिग्राह्यत्वादाश्रयाश्रयित्वभेदाच्च जातिव्यक्त्योरपि 'निर्विशेषं न सामान्यम्' इति न्यायेन भेदस्य सिद्धत्वाच्च । न द्वितीय·, विवर्तत्वे हि स्वराणा भ्रान्तत्व स्यात्, न च तथा, तेषामबाधितप्रयोगहेतुत्वदर्शनात् । तृतीयो ऽपि न परीक्षाक्षमः । स्वरव्यतिरेकेण श्रुतिसद्भावे प्रमाणाभाव इति वक्तुं हि न युक्तम्, 'स्वरस्य हि श्रूयमाणमनुरणनात्मकत्व रणनमन्तरेण नोपपद्यते' इत्यार्थापत्त्या वा, 'अयं स्वरो रणनपूर्वको ऽनुरणनात्मकत्वाद्दण्डाहतजयघण्टाऽनुरणनशब्दवत्' इत्यनुमानेन वा तत्सिद्धे । सत्यम् । यद्यपि स्फुटपौर्वापर्येण कार्यकारणभावप्रतीतिरस्ति, तथा ऽप्युपादानस्य मृत्पिण्डादेर्यथा घटादिकार्यनिष्पत्तौ भेदेनानुपलब्धिर्न तथेह स्वरनिष्पत्तौ श्रुतीनामनुपलम्भ इति तासामकारणत्वात् । चतुर्थपञ्चमावदुष्टत्वेन मतङ्गादिसमतत्वाद् ग्राह्यौ । अथ शुद्धस्वरानन्वर्थतया प्रसिद्धैर्नामभि· परिगणयति—**षड्जेति** । षड्जादिनाम्नामन्वर्थता मतङ्गादिभिरुक्ता । तद्यथा—

'षण्णा स्वराणा जनकः षड्भिर्वा जन्यते स्वरैः ।
षड्भ्यो वा जायते ऽङ्गेभ्य· षड्ज इत्यभिधीयते ॥'

षडपि स्वराञ्जनयति प्रकाशयतीति जनेरन्तर्भावितण्यर्थात् 'अन्येष्वपि दृश्यते' इति डप्रत्यये टिलोपे च सति षड्ज इति रूपम्। षड्भिः स्वरैरङ्गभावेन प्रविष्टैर्जन्यते प्रकाश्यत इति वा षड्जः। पूर्ववद्रूपसिद्धिः। षड्भ्यो नासाकण्ठोरस्तालुजिह्वादन्तस्थानेभ्यो जायत इति वा 'पञ्चम्याम-जातौ' इति डप्रत्यये षड्ज इति।

'प्राप्नोति हृदयं शीघ्रमन्यस्माद्दषभः स्मृतः।
स्त्रीगवीषु यथा तिष्ठन्विभाति ऋषभो महान्॥
स्वरग्रामे समुत्पन्नः स्वरोऽयमृषभस्तथा।'

ऋषति गच्छति हृदयमन्यस्वरेभ्य इति 'ऋष गतौ' इत्यस्माद्धातो-रौणादिके ऽभच्प्रत्यये ऋषभ इति रूपम्। यथा गोसमूहे बलीवर्दस्तथा स्वरसमूहे राशौ द्वितीयो बलवान्। ऋषभवन्नदतीति वा ऋषभः।

'वाचं गानात्मिका धत्त इति गाधारसंज्ञकः'

गा गानात्मिका वाचं धत्त इति 'धृ धारणे' इत्यस्माद्धातोर्गोशब्दे कर्मण्युपपदे ऽण्प्रत्यये पृषोदरादित्वाद्बहुलग्रहणाद्वा ऽलुकि गाधार इति रूपम्। गान्धर्वसुखहेतुत्वाद्वा गाधारः।

'स्वराणां मध्यमत्वाच्च मध्यमः स्वर इष्यते।'

सप्तानां स्वराणां चतुर्थो यः स्वरस्तस्य मध्यस्थत्वात् 'मध्यान्मः' इति भवार्थे मप्रत्यये मध्यम इति रूपम्। अथ वा मद्धियो ऽमो रोग इति मद्धयमः। यद्वा मम धियो रोग इति मद्धयमशब्देन सप्तानां स्वराणां श्रूयमाणो रुचिरत्वाशङ्कया पीडयतीत्यर्थः।

'स्वरान्तराणां विस्तारं यो मिमीते स पञ्चमः।
पाठक्रमेण गणने संख्यया पञ्चमो ऽथ वा॥'

'पचि विस्तारे' इत्यस्माद्धातोर्भावे घञि पञ्चं विस्तारं मिमीत इति 'आतो ऽनुपसर्गे कः' इति कप्रत्यये पञ्चम इति रूपम् । 'ह्रावामश्च' इत्यण्युक् च संज्ञात्वादुपेक्ष्येते । यद्वा पृषोदरादित्वाद्युगभाव आलोपश्च । स्वराणा क्रमेण गणने पञ्चमत्वाद्वा पञ्चमस्थानसंभूतत्वाद्वा पञ्चम ।

'धीरस्यास्तीति धीवास्तत्सबन्धी धैवत स्मृत ।'

यद्वा, 'षष्ठस्थाने धृतो यस्मात्ततो ऽसौ धैवतो मत ।'

धीरस्यास्तीति धीवान्, तत्सबन्धित्वेन 'तस्येदम्' इत्यणि धैवत इति रूपम् । सबन्धित्वं चानेकप्रकारं निरूप्यनिरूपकलक्षणमास्वाद्यास्वादक-लक्षणं जन्यजनकलक्षण चेति । तत्रोत्तरस्वरेण संसृष्टश्रुतित्वात्स्थूलमतीना दुर्विवेकत्वाद्धीमत सूक्ष्ममतेरेव निरूप्यत्वाद्धैवत । षष्ठस्थाने ललाटस्थाने धृतत्वाद्वा धैवत ।

'निषीदन्ति स्वरा सर्वे निषादस्तेन कथ्यते ।'

'षद्लृ विशरणे' इत्यस्माद्धातो, निषीदन्ति पर्यवस्यन्त्यस्मिन्स्वरा इति 'अकर्तरि च' इति सूत्रेण घञि निषाद इति रूपम् । इत्युक्तप्रकारेण ते स्वरा सप्तैवेति नियमे सप्तधात्वाश्रितत्वं सप्तचक्राश्रितत्वं वा निमित्तं मतङ्गोक्तमनुसंधेयम् ॥ प्रयोगसौकर्यार्थं तेषामाद्याक्षराण्युद्धृत्य संज्ञाऽन्तरा-ण्याह—**तेषां संज्ञा** इति । सरिगादीना मतङ्गाभिमत उद्धारक्रम उच्यते —अत्राकचटतपयशा अष्टौ वर्गा । तत्राष्टमस्य तृतीयं हरिबीजयुक्तमाद्य-स्वरमुद्धरेत् । हरिबीजमकार । सप्तमस्य द्वितीयं कामबीजयुक्तं द्वितीयस्व-रमुद्धरेत् । कामबीजमिकार. । द्वितीयस्य तृतीय हरिबीजयुक्तं तृतीयस्वर-मुद्धरेत् । षष्ठस्य पञ्चममकारयुक्तं [1]चतुर्थस्वरमुद्धरेत् । षष्ठस्य प्रथमम-

[1] मध्यमस्वर समुद्धरेत्

श्रुत्यनन्तरभावी यः स्निग्धो ऽनुरणनात्मकः ॥ २४ ॥
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ।

कारयुक्तं पञ्चमस्वरमुद्धरेत् । पञ्चमस्य चतुर्थमकारयुक्तं षष्ठस्वरमुद्धरेत् । पञ्चमस्य पञ्चमं कामबीजयुक्तं सप्तमस्वरमुद्धरेत् । अत्र सरिगादिष्वाद्याक्षराणा व्यञ्जनत्वात्कथं स्वरत्वमित्याक्षिप्याचार्यपरिभाषया सकेतमात्रमेतदिति प्रत्याह मतङ्गः ॥ २३, २३- ॥

(सु०) एव श्रुतीर्निरूप्य स्वरान्निरूपयति—**श्रुतिभ्य** इति । षड्जर्षभेयादीनामाद्याक्षरैर्व्यवहारार्थं सज्ञान्तराणि कथयति—तेषामिति । सरिगमपधनीत्येताः प्रथम स्वरोपादानात्तेषा पूर्वाभ्यो ऽपराः संज्ञाः । यद्यपि षऋगमपधनीति सज्ञाघोषण युक्त तथा ऽपि सरिगेत्यपभ्रशः पाठः ॥ २३, २३- ॥

(क०) स्वराणा सामान्यलक्षणं ·स्वरशब्दस्य निरुक्ति चाह—**श्रुत्यनन्तरे**ति । श्रुत्यनन्तरभावी, श्रुतेश्चतुर्थ्यादेर्मारुताद्याहत्युत्पन्नप्रथमध्वनेरनन्तरं भाव्याविर्भवनशीलः, स्निग्धो ऽरूक्ष सन्दूरसंश्राव्य , अनुरणनात्मको ऽनुस्वानरूप·, स्वतः सहकारिकारणनिरपेक्ष श्रोतृचित्तं रञ्जयत्यनुरक्तं करोति । स्वतःशब्दोपपदात् 'रञ्ज रागे' इत्यस्माद्धातोः 'अन्येभ्यो ऽपि दृश्यते' इति डप्रत्यये टिलोपे पूर्वपदस्थतकारादेः पृषोदरादित्वाल्लोपे च स्वर इति रूपसिद्धि· ॥ -२४, २४- ॥

(सु०) स्वरस्य लक्षण निर्वचन च कथयति—**श्रुत्यनन्तरे**ति । श्रुतेरनन्तर भवतीति श्रुत्यनन्तरभावी । प्रथमतन्त्र्यामाहताया यो ध्वनिरनुरणनशून्य उत्पद्यते स श्रुति , यस्तु ततो ऽनन्तरमनुरणनरूप· श्रूयते स स्वर । कथ तस्य स्वरत्वमित्यत आह—**स्वत** इति । स्वतो ऽन्यानपेक्षतया यस्माच्छ्रोतृचित्त रञ्जयति तस्मात्स्वर इति निरुक्ति । कथ तस्य रञ्जकत्वम्? अतो हेतगर्भ

विशेषण स्निग्ध इति। यद्यपि स्निग्धत्वमपामेव धर्मः, 'स्नेहो ऽपा विशेष-गुण.' इत्युक्तत्वात्, न तस्य श्रवणेन्द्रियगम्यता; तथा ऽप्यौपचारिक स्निग्धत्व स्वरेषु गृह्यते। अत्र बहुधा विप्रतिपत्ति.—केचित्स्वरश्रुत्योस्तादात्म्य वर्ण-यन्ति। यदाहुः—

'विशेषस्पर्शशून्यत्वाच्छ्रवणेन्द्रियगम्ययोः।
स्वरश्रुत्योस्तु तादात्म्य जातिव्यक्त्योरिवानयोः॥'

इति। केचित्स्वरश्रुत्योर्विवर्त्यविवर्तकतामाचक्षते। यदाहु:—

'नराणा तु मुख यद्वद्दर्पणेषु विवर्तते।
प्रतिभान्ति स्वरास्तद्वच्छ्रुतिष्वेव विवर्तिनः॥'

इति। केचित्स्वरश्रुत्यो कार्यकारणभाव वदन्ति। यदाहु:—

'स्वराणा श्रुतिकार्यत्वमिति केचिद्वदन्ति हि।
मृत्पिण्डदण्डकार्यत्व घटस्येह यथा भवेत्॥'

इति। केचित्परिणामपक्षमाद्रियन्ते। यदाहु:—

'श्रुतयः स्वररूपेण परिणामं व्रजन्ति हि।
परीणमेद्यथा क्षीर दधिरूपेण सर्वथा॥'

इति। केचित्पुनरभिव्यक्तिपक्षमङ्गीकुर्वते। यदाहु:—

'षड्जादयः स्वराः सप्त व्यज्यन्ते श्रुतिभिः सदा।
अन्धकारस्थिता यद्वत्प्रदीपेन घटादयः॥'

इति। एतेषु पक्षेषु परिणामाभिव्यक्तिपक्षावेव स्वीकृतौ मतङ्गेन। यदाह—

'भेदः स्वलक्षणाना सामान्येनान्यवस्तुवत्सिद्धः।
तद्धि विशेषैः शून्य भवति नभःपुष्पसकाशम्॥
नानाबुद्धिगृहीतत्वात्स्वरश्रुत्योस्तु भिन्नता।
आश्रयाश्रयिभेदाच्च तादात्म्य केन सिध्यति॥

यदभाणि विवर्तत्व स्वराणा तदसगतम् ।
विवर्तत्वे स्वराणा हि भ्रान्तिज्ञान प्रसज्यते ॥
तथा च कारणत्व च श्रुतीना नैव सभवेत् ।
कार्येषु विद्यमानेषु कारणस्योपलम्भनात् ॥
घटादौ विद्यमाने हि मृत्पिण्डो नोपलभ्यते ।
परिणामो ऽप्यभिव्यक्तिर्न्याय्य· पक्ष. सता मत: ॥'

इति । मतङ्गेन त्वन्यथा स्वरशब्दो व्युत्पादित: । यदाह —

'राजृ दीप्तावस्य धातो· स्वशब्दपूर्वकस्य च ।
स्वय हि राजते यस्मात्तस्मात्स्वर इति स्मृत: ॥'

इति । षड्जादीना निरुक्तिरुक्ता सगीतसमयसारकारेण—

'नासा कण्ठ उरस्तालु जिह्वा दन्तास्तथैव च ।
षडभि· सजायते यस्मात्तस्मात्षड्ज इति स्मृत ॥
नाभे: समुत्थितो वायु: कण्ठशीर्षसमाहत ।
नदत्यृषभवद्यस्मात्तस्मादृषभ ईरित: ॥
नाभे: समुत्थितो वायु· कण्ठशीर्षसमाहत· ।
गन्धर्वसुखहेतु. स्याद्गाधारस्तेन हेतुना ॥
वायु: समुत्थितो नाभेर्हृदये च समाहत ।
मध्यस्थानोद्भवत्वात्तु मध्यमत्वेन कीर्तित: ॥
वायु समुत्थितो नाभेरोष्ठकण्ठशिरोहृदि ।
पञ्चस्थानसमुद्भूत· पञ्चमस्तेन कीर्तित: ॥
नाभे: समुत्थितो वायु: कण्ठतालुशिरोहृदि ।
तत्तत्स्थानधृतो यस्मात्ततो ऽसौ धैवतो मत· ।
नाभे· समुत्थिते वायौ कण्ठतालुशिरोहृते ।
निषीदन्ति स्वरा· सर्वे निषादस्तेन कथ्यते ॥

इति ॥ -२४, २४- ॥

ननु श्रुतिश्चतुर्थ्यादिरस्त्वेवं स्वरकारणम् ॥ २५ ॥
त्र्यादीनां तत्र पूर्वासां श्रुतीनां हेतुता कथम् ।
ब्रूमस्तुर्यातृतीयाऽऽदिः श्रुतिः पूर्वाऽभिकाङ्क्षया ॥ २६ ॥
निर्धार्यते ऽतः श्रुतयः पूर्वा अप्यत्र हेतवः ।
दीप्ता ऽऽयता च करुणा मृदुर्मध्येति जातयः ॥ २७ ॥
श्रुतीनां पञ्च तासां च स्वरेष्वेवं व्यवस्थिति ।
दीप्ता ऽऽयता मृदुर्मध्या षड्जे स्यादृषभे पुन ॥ २८ ॥
संस्थिता करुणा मध्या मृदुर्गांधारके पुनः ।
दीप्ताऽऽयते मध्यमे ते मृदुमध्ये च संस्थिते ॥ २९ ॥
मृदुर्मध्या ऽऽयताऽऽख्या च करुणा पञ्चमे स्थिता ।
करुणा चायता मध्या धैवते सप्तमे पुनः ॥ ३० ॥
दीप्ता मध्येति तासां च जातीनां ब्रूमहे भिदा. ।
तीव्रा रौद्री वज्रिकोग्रेत्युक्ता दीप्ता चतुर्विधा ॥ ३१ ॥
कुमुद्वत्यायता या ऽस्याः क्रोधा चाथ प्रसारिणी ।
संदीपनी रोहिणी च भेदाः पञ्चेति कीर्तिताः ॥ ३२ ॥

(क०) यद्येव चतुर्थ्यादेरेव श्रुते स्वरकारणत्वमस्तु, न पूर्वपूर्वासामित्याक्षिपति—**नन्विति** । त्र्यादीनामिति । तृतीयाऽऽदीनामित्यर्थ । अत्र वृत्तौ तीयप्रत्ययान्तस्य 'प्रत्ययलोपे ऽपि तदर्थग्रहणम्' इति त्र्यादीनामिति निर्देशोपपत्ति । समाधत्ते—**ब्रूम** इति । तुर्यातृतीयाऽऽदि·, षड्जमध्यमपञ्चमाना तुर्या, ऋषभधैवतयोस्तृतीया, आदिशब्देन गाधारनिषादयोर्द्वितीया च श्रुति., पूर्वाऽभिकाङ्क्षया, आदिशब्दसामर्थ्यात्पूर्वेत्यस्य वीप्सा कर्तव्या पूर्वपूर्वाऽभिकाङ्क्षयेति । उत्तरोत्तरतारूपेण लक्षणेन स्वोत्पत्तौ

दयावती तथा ऽऽलापिन्यथ प्रोक्ता मदन्तिका ।
त्रयस्ते करुणाभेदा मृदोर्भेदचतुष्टयम् ॥ ३३ ॥
मन्दा च रतिका प्रीतिः क्षितिर्मध्या तु षड्विधा ।
छन्दोवती रञ्जनी च मार्जनी रक्तिका तथा ॥ ३४ ॥
रम्या च क्षोभिणीत्यासामथ ब्रूमः स्वरस्थितिम् ।
तीव्राकुमुद्वतीमन्दाच्छन्दोवत्यस्तु षड्जगाः ॥ ३५ ॥
दयावती रञ्जनी च रक्तिका चर्षभे स्थिताः ।
रौद्री क्रोधा च गांधारे वज्रिका ऽथ प्रसारिणी ॥ ३६ ॥
प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः ।
क्षिती रक्ता च संदीपन्यालापिन्यपि पञ्चमे ॥ ३७ ॥
मदन्ती रोहिणी रम्येत्येतास्तिस्रस्तु धैवते ।
उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती ॥ ३८ ॥

संख्यया तुर्याऽऽदिव्यपदेशे च पूर्वपूर्वस्या साकाङ्क्षतया यतो निर्धार्यते ऽत इत्यर्थ. । श्रुतीनामन्योऽन्यमसंकीर्णतया स्वरूपपरिज्ञानाय क्वचित्तासा साजात्येन संगत्या रक्तिलाभाय चावान्तरभेदसहिताना जातीना स्वरेषु व्यवस्थानं दर्शयति—**दीप्ता ऽऽयतेत्यादिना** । स्वरविनियोगानन्तरमुद्दिष्टानामपि श्रुतिजातीनामिह निरूपण श्रुतिस्वरविवेचनरूपार्थसगतिवशादुपपन्नम् । व्युत्क्रमेणोद्देशस्तु क्वचित्क्रमस्याविवक्षितत्वज्ञापनार्थम् । एतेन 'कुलानि जातय·—' इत्यादिक्रमस्त्वविवक्षित इति मन्तव्यम् ॥ -२५—३८ ॥

(सु०) 'श्रुतिभ्यः स्युः स्वराः' इत्युक्तम्, तत्र श्रुतिभ्य इति पञ्चम्या 'जनिकर्तुः प्रकृतिः' इत्यनेन श्रुतीना स्वरान्प्रति कारणत्व प्रतीयते; अय स्वरश्चतु.श्रुतिरय स्वरस्त्रिश्रुतिरय द्विश्रुतिरित्युक्तत्वाच्च सर्वासामपि कारणत्व

प्रतीयते, तदाक्षिपति—नन्विति। ननु यस्या श्रुतौ स्वरः स्थाप्यते सा चतुर्थ्यादि श्रुतिः, चतुर्थी सप्तमी नवमी त्रयोदशी सप्तदशी विंशी द्वाविंशी च श्रुतिरभिव्यञ्जकत्वेन परिणामकत्वेन वा स्वराणा षड्जादीना कारणमस्तु नाम, पूर्वासा त्र्यादीना श्रुतीना स्वर प्रति कथ हेतुत्वम्? त्र्यादीनामित्यत्रादि-शब्देन षड्जमध्यमपञ्चमेषु तिसृणा तिसृणामृषभधैवतयोर्द्वयोर्द्वयोर्गाधारनिषादयोरेक-स्या एकस्याः पूर्वावस्थितायाः श्रुत्या. स्वर प्रति क उपयोगः? परिहरति—ब्रूम इति। तुरीयातृतीयाऽऽदिः श्रुतिः पूर्वापेक्षया निर्धार्यत इय श्रुतिश्चतुर्थीय तृतीयेय द्वितीयेति पूर्वाः श्रुतीरपेक्ष्याय व्यवहारः। यदि पूर्वा श्रुतयो न स्युस्तर्हि किमपेक्ष्यायं चतुर्थ्यादिव्यवहार. स्यात्? अतश्चतुर्थीत्वादिनिर्धारणार्थं पूर्वासामपि श्रुतीना हेतुत्वसिद्धि। अधुना श्रुतिजातीर्विभजते—दीप्ता ऽऽयतेति। श्रुतीना पञ्च जातयो भवन्ति दीप्ता ऽऽयता करुणा मृदुर्मध्येति। तासु का जाति कस्मिन्स्वरे निवसतीत्यपेक्षायामाह—तासा चेति। षड्जे दीप्ताऽऽदयश्चतस्र श्रुतिजातयः, प्रथमा श्रुतिर्दीप्ता द्वितीया ऽऽयता तृतीया मृदुश्चतुर्थी मध्या। ऋषभे तु प्रथमा श्रुतिः करुणा द्वितीया मध्या तृतीया मृदुः। गाधारे प्रथमा श्रुतिर्दीप्ता द्वितीया ऽऽयता। मध्यमे ते दीप्ताऽऽयते मृदुमध्ये च सस्थिते। ततश्च मध्य-मस्य प्रथमा श्रुतिर्दीप्ता द्वितीया ऽऽयता तृतीया मृदुश्चतुर्थी मध्या। पञ्चमे प्रथमा श्रुतिर्मृदुर्द्वितीया मध्या तृतीया ऽऽयता चतुर्थी करुणा। धैवते प्रथमा श्रुतिः करुणा द्वितीया ऽऽयता तृतीया मध्या। सप्तमे निषादे प्रथमा श्रुतिर्दीप्ता द्वितीया मध्येति। तासामपि जातीनामवान्तरजातीः प्रतिज्ञाय कथयति—तासा चेति। दीप्ता चतुर्विधा तीव्रा रौद्री वज्रिकोग्रेति। आयतायाः पञ्च भेदा. कुमुद्वती क्रोधा प्रसारिणी सदीपनी रोहिणी चेति। करुणाया भेदत्रय दया-वत्यालापिनी मदन्तिकेति। मृदोश्चत्वारो भेदा मन्दा रतिः प्रीतिः क्षितिरिति। मध्या तु षड्विधा षट्प्रकारा च्छन्दोवती रञ्जनी मार्जनी रक्तिका रम्या क्षोभिणीति। तुशब्देन पूर्वाभ्यो ऽधिकभेदत्व सूचितम्। एतासा जातीना स्वरस्थिति प्रतिज्ञाय कथयति—आसामथेति। आसा श्रुतिजातीना षड्जगा षड्जे वर्तमानाश्चतस्रो जातयस्तीव्रादय। ततश्च षड्जे प्रथमा श्रुतिस्तीव्राजाया-क्रान्ता दीप्ता; द्वितीया कुमुद्वतीजातिका ऽऽयता, तृतीया मन्दाजातिका मृदुः; चतुर्थी च्छन्दोवतीजातिका मध्या। ऋषभे प्रथमा श्रुतिर्दयावतीजातिका

ते मन्द्रमध्यताराख्यस्थानभेदात्त्रिधा मताः ।
त एव विकृतावस्था द्वादश प्रतिपादिताः ॥ ३९ ॥
च्युतो ऽच्युतो द्विधा षड्जो द्विश्रुतिर्विकृतो भवेत् ।
साधारणे काकलीत्वे निषादस्य च दृश्यते ॥ ४० ॥
साधारणे श्रुतिं षाड्जीमृषभः संश्रितो यदा ।
चतुःश्रुतित्वमायाति तदैको विकृतो भवेत् ॥ ४१ ॥

करुणा, द्वितीया रञ्जनीजातिका मध्या, तृतीया रतिजातिका मृदु' । गाधारे प्रथमा श्रुती रौद्रीजातिका दीप्ता, द्वितीया क्रोधाजातिका ऽऽयता । मध्यमे प्रथमा श्रुतिर्वज्रिकाजातिका दीप्ता, द्वितीया प्रसारिणीजातिका ऽऽयता, तृतीया प्रीतिजातिका मृदु', चतुर्थी मार्जनीजातिका मध्या । पञ्चमे प्रथमा श्रुति' क्षितिजातिका मृदु', द्वितीया रक्ताजातिका मध्या, तृतीया सदीपनीजातिका ऽऽयता, चतुर्थ्यालापिनीजातिका करुणा । धैवते प्रथमा श्रुतिर्मदन्तीजातिका करुणा, द्वितीया रोहिणीजातिका ऽऽयता, तृतीया रम्याजातिका मध्या । निषादे प्रथमा श्रुतिरुग्राजातिका दीप्ता, द्वितीया क्षोभिणीजातिका मध्येति । ननु किं श्रुतिजातिनिरूपणेन प्रयोजनम्? उच्यते—तत्तज्जातिका श्रुति श्रुत्वा मनसो नामसाम्येन तथा तथा विकार उत्पद्यत इति सूचयितुं श्रुतिजातिनिरूपणम् । ततश्च दीप्ता श्रुतिमाकर्ण्य मनसो दीप्तत्वमिव भवति, आयता श्रुतिमाकर्ण्यायतत्वमिव; एवं करुणत्वादि ज्ञातव्यम् ॥ -२९–३८ ॥

(क०) प्रसङ्गाच्छ्रुतिजातीरुक्त्वा प्रकृतस्वरपरामर्शपूर्वकं स्थानभेदात्तेषां त्रैविध्यमाह—**ते मन्द्रेति** । ननु च्युतादयः पृथक्स्वरा स्युः, किं तेषामवस्थाऽन्तरापन्नषड्जादित्वकल्पनयेत्यत आह—**त एवेति** । **द्वादशेति** ॥ षड्जमध्यमग्रामद्वयापेक्षया क्रमप्राप्तान्विकृतस्वरा॑ल्लक्षयति—**च्युतो ऽच्युत** इत्यादिना । चतुःश्रुतिः षड्जो द्विश्रुतिर्विकृतः संश्चयुतो ऽच्युत इति द्विधा भवेत् । स च साधारणे स्वसाधारणे च्युतः, निषादस्य काकलीत्वे

साधारणे त्रिश्रुतिः स्यादन्तरत्वे चतुःश्रुतिः ।
गांधार इति तद्भेदौ द्वौ निःशङ्केन कीर्तितौ ॥ ४२ ॥
मध्यमः षड्जवद् द्वेधा ऽन्तरसाधारणाश्रयात् ।
पञ्चमो मध्यमग्रामे त्रिश्रुतिः कैशिके पुनः ॥ ४३ ॥
मध्यमस्य श्रुतिं प्राप्य चतुःश्रुतिरिति द्विधा ।
धैवतो मध्यमग्रामे विकृतः स्याच्चतुःश्रुतिः ॥ ४४ ॥
कैशिके काकलीत्वे च निषादस्त्रिचतुःश्रुतिः ।
प्राप्नोति विकृतौ भेदौ द्वाविति द्वादश स्मृताः ॥ ४५ ॥
ते शुद्धैः सप्तभिः सार्धं भवन्त्येकोनविंशतिः ।

चाच्युत इति दृश्यते ॥ साधारणे त्रिश्रुतिः स्यादित्यत्र मध्यमसाधारण इत्यर्थः । अन्तरत्वे चतुःश्रुतिरित्यत्र स्वस्यान्तरत्व इति विशेषणीयम् ॥ मध्यमः षड्जवदिति । अत्र षड्जवदिति षड्जो यथा द्विश्रुतिर्विकृतश्चयुतत्वाच्युतत्वभेदभिन्नस्तथा मध्यमो ऽपीति वतेरर्थः ॥ कैशिके काकलीत्वे चेत्यत्र कैशिके षड्जसाधारणे त्रिश्रुतिः, स्वस्य काकलीत्वे चतुःश्रुतिरिति ॥ ३९—४५ ॥

(सु०) एवं श्रुतीः श्रुतिजातीः [1]श्रुतिजातिभ्यः स्वरोत्पत्तिं च कथयित्वा स्वरभेदान्निरूपयति—त इति । ते षड्जादयः स्वरास्त्रिधा त्रिप्रकाराः । कुतस्त्रिप्रकारत्वम् ? अत आह—मन्द्रमध्यताराख्यस्थानभेदात् । ततश्च तात्त्विको भेदो नास्ति, किं तु स्थानकल्पितो भेदः । यथैक एव देवदत्तस्त्रिभूमिके प्रासादे प्रथमभूमिकायां द्वितीयभूमिकायां तृतीयभूमिकायां च तिष्ठन्नन्य इव [2]भासते तथा स्वरा अपि स्थानविशेषेणेत्यर्थः । ननु यथा षड्जादीनां सप्तानां स्वराणां स्थान-

[1] श्रुतिभ्य .
[2] प्रतिभाति.

विशेषेणैव भेदस्तात्त्विकः प्रतीयते तथा मन्द्रमध्यतारस्थानस्थिताना षड्जादीनामपीति कथमत्रैव काल्पनिकत्वमङ्गीक्रियते ? ब्रूमः, प्रत्यभिज्ञानात्स्थानत्रये ऽपि त एव स्वरा इति प्रतीयते । य एव मन्द्रस्थः षड्जः स एवाय मध्यस्थाने तारस्थाने च प्रतीयत इति सकललोकसाक्षिका प्रत्यभिज्ञा नावज्ञातु शक्यते । नैव षड्जर्षभादिषु सप्तसु प्रत्यभिज्ञालेशो ऽप्यस्तीति महान्विशेषः । एव शुद्धान्सप्त स्वरान्निरूप्य द्वादश विकृतान्स्वरान्विभज्य निरूपयति—त एवेति । ते शुद्धाः सप्त स्वरा एव विकृतावस्था विकारं प्राप्ता द्वादशसख्याका भवन्ति ॥ ३९ ॥ तमेव विकार दर्शयति—च्युत इति । द्विश्रुति षड्जो द्विधा विकृतो भवतीति च्युतश्चाच्युतश्चेत्युच्यते । तत्र च्युतो यस्या चतुर्थ्या श्रुतौ स्थापितस्तस्याः सकाशात्प्रच्युतः, अच्युतस्तु तस्यामेव श्रुतावस्थितः पूर्वश्रुतिहीनतया विकृतो भवति । कदा तस्यैवविध विकृतत्वम् ? तदाह—साधारण इति । साधारणे स्वसाधारणे निषादस्य च काकलीत्व उभयविध विकृतत्वम् ।

'निषादो यदि षड्जस्य श्रुतिमाद्या समाश्रयेत् ।
ऋषभस्त्वन्तिमा प्रोक्तं षड्जसाधारण तदा ॥'

इति वक्ष्यमाणे षड्जसाधारणे षड्जः स्वस्थानाच्चतुर्थश्रुतेः प्रच्युतस्तृतीयश्रुतावस्थितो विकृतो भवति ।

'श्रुतिद्वयं चेत्षड्जस्य निषादः संश्रयेत्तदा ।
स काकली मध्यमस्य गाधारस्त्वन्तर' स्वरः ॥'

इति वक्ष्यमाणे निषादस्य काकलीत्वे पूर्वश्रुतिद्वयहीनत्वादच्युतः स्वस्थाने चतुर्थश्रुतौ स्थित एव विकृतो भवति । ननु स्वस्थानस्थितस्य पूर्वश्रुतिद्वयहीनत्वे ऽपि ध्वनिविकाराभावात्कथ विकृतत्वम् ? उच्यते—यद्यपि पूर्वश्रुतिविहीनत्वे तत्स्थानस्थितत्वाद् ध्वनिविकारो नास्ति, तथा ऽपि निषादस्य स्वस्थानस्थितत्वे चतु.श्रुतित्वात्षड्जस्यायतत्व भवति । यदा काकलीत्वे निषादः षड्जस्य द्वितीयश्रुतौ तिष्ठति, तदा द्विश्रुतित्वादनायत प्रतीयते । तस्माद्भवत्येव विकृतः ॥ ४० ॥ ऋषभस्य विकृतत्व कथयति—साधारण इति । साधारणे षड्जसाधारणे षड्जस्यान्तिमा श्रुतिमृषभो गृह्णाति, तदा चतु.श्रुतिः सन्विकृतो भवति ॥ ४१ ॥ गाधारस्य द्वौ भेदौ विकृतौ कथयति—साधारण इति । साधारणे मध्यमसाधारणे

मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ॥ ४६ ॥
गजश्च सप्त षड्जादीन्क्रमादुच्चारयन्त्यमी ।

मध्यमस्य प्रथमा श्रुति गाधारो गृह्णाति । तदा त्रिश्रुतिर्विकृतो भवति । [1]अन्तरस्तु गाधारो मध्यमस्याद्य श्रुतिद्वय गृह्णाति । तदा चतु श्रुतिः सन्विकृतो भवति ॥४२॥ मध्यमस्य द्वौ विकृतौ भेदौ कथयति—**मध्यम** इति । षड्जो यथा च्युतत्वेनाच्युतत्वेन च द्वेधा विकृतः कथितः स्वसाधारणे निषादस्य च काकलीत्वे, तद्वन्मध्यमसाधारणे गाधारस्यान्तरत्वे च मध्यमो ऽपि द्वेधा विकृतो भवति ।

'मध्यमस्यापि गपयोरेव साधारण मतम् ।' इति,
'. . मध्यमस्य गाधारस्त्वन्तरः स्वरः ।'

इति च मध्यमसाधारण गाधारस्यान्तरत्व च वक्ष्यते ॥ ४२- ॥ पञ्चमस्य द्वेधा विकृतत्व कथयति—**पञ्चम** इति । पञ्चमे तृतीयश्रुतिसस्थिते सति मध्यमग्राम इति वक्ष्यते । तस्मिन्मध्यमग्रामे त्रिश्रुतिः पञ्चमो विकृतो भवति । पुनश्च कैशिके मध्यमसाधारणे मध्यमस्यान्तिमा श्रुति प्राप्य चतु'श्रुतिः सन्विकृतो भवति ॥-४३, ४३- ॥ धैवतस्यैकधा विकृतत्व कथयति—**धैवत** इति । मध्यमग्रामे पञ्चमस्य तृतीयश्रुतावबस्थितत्वादन्तिमा पञ्चमस्य श्रुतिर्धैवत प्रविशति । स तदा चतुःश्रुतिर्विकृतो भवति ॥-४४ ॥ निषादस्य द्विधा विकृतत्व कथयति—**कैशिक** इति । कैशिके षड्जसाधारणे निषाद. षड्जस्य प्रथमश्रुतौ यदा तिष्ठति, तदा त्रिश्रुति' सन्विकृतः; यदा तु काकली भवन्षड्जस्य श्रुतिद्वय गृहीत्वा चतु श्रुतिर्भवति तदा ऽपि विकृतः । एव द्वादश विकृतभेदा. । विकृताना शुद्धानामप्येकोनविशतिर्भेदा भवन्तीत्याह—**तैरिति** ॥ ४५, ४५- ॥

(क०) लोकतो ऽपि षड्जादिस्वरूपपरिज्ञानाय मयूरादिप्राणिविशेषध्वनिं निदर्शनाभिप्रायेणाह—**मयूरेति** । स्वराणामन्योऽन्यं स्वरूपकृतं भेदमुक्त्वा प्रसङ्गात्प्रयोगार्थं प्रकारभेदेन तेषा चातुर्विध्यं दर्शयति—

[1] अन्तरस्वरस्तु.

चतुर्विधाः स्वरा वादी संवादी च विवाद्यपि ॥ ४७ ॥
अनुवादी च वादी तु प्रयोगे बहुलः स्वरः ।
श्रुतयो द्वादशाष्टौ वा ययोरन्तरगोचराः ॥ ४८ ॥
मिथः संवादिनौ तौ स्तो निगावन्यविवादिनौ ।
रिधयोरेव वा स्यातां तौ तयोर्वा रिधावपि ॥ ४९ ॥

चतुर्विधा इति । वदनाद्वादी । ननु वदनादिकं प्राणिधर्म. कथमचेतनाना स्वराणा संभवति? सत्यम्, वदन हि नाम रागप्रतिपादकत्वं विवक्षितम्, न वचनमित्यदोष· । संवदनात्संवादी । संवदनं नाम यद्वादिना स्वरेण रागस्य रागत्वं जनितं तन्निर्वाहकत्वम् । विवदनाद्विवादी । विवदनं नाम वाद्यादिभि स्वरैरुत्पाद्यमानाया रक्तेर्विनाशकत्वम् । अनुवदनादनुवादी । अनुवदनं नाम वादिसंवादिसंपादितरक्त्यनुकूलत्वम् । क्रमेण ताल्लक्षयति— **वादी त्वित्यादिना** । प्रयोगे जात्यादौ बहुलो ग्रहत्वन्यासत्वादिभेदेन पुन पुनरावृत्तः । सवादिलक्षणपरिज्ञानार्थमादौ मण्डलप्रस्तारं वीणाप्रस्तारं वा लिखेत् । तत्र मण्डलप्रस्तारो यथा—षड्ऊर्ध्वरेखा लिखित्वा तदूर्ध्वाध किचिदग्राण्यवशेष्य मध्ये पञ्च तिर्यग्रेखा किचिदग्रावशेष लिखेत् । तदा परितो रेखाऽग्राणि द्वाविंशतिर्भवन्ति । वीणाप्रस्तारस्तु—तिर्यग्रेखा एव द्वाविंशति लिखेत् । तत्र वामतो दक्षिणतो वा रेखाऽग्राणि द्वाविंशतिर्भवन्ति । तत्रैकस्मिञ्श्रुतिमण्डले शुद्धान्विकृतान्वा षड्जादीन्स्वस्वश्रुतिसंख्यया विलिखेत् । तेषु ययो· स्वरयोरन्तरगोचरा· स्वाधारश्रुती विहाय मध्यवर्तिन्य श्रुतयो द्वादशाष्टौ वा दृश्यन्ते तौ मिथ· सवादिनौ भवत इति ज्ञातव्यम् । **निगावन्यविवादिनाविति** । अन्येषां पञ्चानां विवादिनौ विरोधिनौ । ननु निगयोरितरान्पञ्चापि स्वरान्प्रति विवादित्वमुक्तम्, तदनुपपन्नम्, शुद्धयोर्मध्यमनिषादयो· परस्परं संवादित्वदर्शनादित्यपरितोषेण

शेषाणामनुवादित्वं वादी राजा ऽत्र गीयते ।
संवादी त्वनुसारित्वादस्यामात्यो ऽभिधीयते ॥ ५० ॥
विवादी विपरीतत्वाद्धीरैरुक्तो रिपूपमः ।

पक्षान्तरमाह—**रिधयोरेव** वेति । प्रथममन्यविवादिनावित्यविशेण कथन तु समश्रुतिकयोरेव संवाद इति मतानुसारेण । अतो द्वादशाष्टश्रुत्यन्तरितत्वमात्रमेव संवादिलक्षणमिति सिद्धं भवति । **तौ तयोर्वेति** । तौ रिधौ तयोर्निगयोर्विवादिनौ स्त । एतेनैकश्रुत्यन्तरितौ परस्परं विवादिनाविति लक्षणं सूचितं भवति । 'द्व्यन्तरत्वाद्विवादित्वमुक्तम्' इति मतङ्गोक्तस्यापि द्वयोरेकस्वराधारश्रुत्या सह द्व्यन्तरत्वस्य विवक्षितत्वादेकश्रुत्यन्तरितत्वमेवार्थ । एवम् 'त्रयोदशनवान्तरम्' इति मतङ्गोक्तस्य संवादिलक्षणस्यापि द्वादशाष्टान्तरत्वमेवार्थ । अत शुद्धावस्थाया रिगयोर्धन्योश्च यथा परस्पर विवाद', तथा विकृतावस्थाया गमयोर्निसयोश्च विवादो द्रष्टव्य । अयमभिप्राय:—वादिसंवाद्यनुवादिना परस्परं स्थानव्यत्ययेन प्रयोगे ऽपि जातिरागहानिर्न भवति, विवादिनस्तु प्रयोगे जातिरागहानिर्भवेदिति । शेषाणा वाद्यादिलक्षणरहितानाम् । अथ प्रयोगे वाद्यादीना प्रधानोपसर्जनभावेन तारतम्य सदृष्टान्त दर्शयति—वादी राजेत्यादिना ॥ -४६—५१ ॥

(सु०) एतेषा स्वराणा स्वरूपज्ञानार्थमसाधारणानुच्चारयितॄन्कथयति—मयूरेति । मयूर' षड्जमुच्चारयति, चातक ऋषभम्, छागो गाधारम्, क्रौञ्चो मध्यमम्, कोकिल: पञ्चमम्, दर्दुरो धैवतम्, गजो निषादमिति ॥ -४६, ४६- ॥ स्वराणा चातुर्विध्य कथयति—**चतुर्विधा** इति । वादिनो लक्षण कथयति—**वादी** त्विति । प्रयोगे जातिरागादौ बहुलो बाहुल्येन य उच्चार्यते सो ऽशस्वरापरपर्यायो वादी । ननु वदतीति वादी; वदन च प्राणिधर्म: कथमचेतनाना स्वराणा संभवति? सत्यम्; वदन हि नामात्र रागप्रतिपादकत्व विवक्षितम्, ततश्च रागाणा रागत्व वदन्ति प्रतिपादयन्तीति वादिन: ॥ -४७, ४७- ॥ संवादि-

लक्षण कथयति—श्रुतय इति। द्वादशाष्टौ वा श्रुतयो ययोरन्तरे वर्तन्ते तौ मिथः परस्पर सवादिनौ भवत'। ननु मतङ्गेन त्रयोदशनवश्रुत्यन्तरत्वेन सवादित्व-मुक्तम्; यदाह—'संवादिनस्तु पुनः समश्रुतिकत्वे सति त्रयोदशनवान्तरत्वे वा ऽन्योऽन्य बोद्धव्याः' इति। दत्तिलेनाप्युक्तम्—

'मिथः सवादिनौ ज्ञेयौ त्रयोदशनवान्तरौ।'

इति, तत्कथमुच्यते 'श्रुतयो द्वादशाष्टौ वा ययोरन्तरगोचरा' इति? उच्यते—ययो' श्रुत्योः स्वराववस्थितौ ते श्रुती विहाय मध्यस्थाः श्रुतयो द्वादशाष्टौ वा यदि भवन्ति तदा तयोः सवादित्वमित्यनेनाभिप्रायेणैवमुक्तम्। मतङ्गादिभिस्तु यो यस्य सवादी तस्यावस्थानश्रुतिमपि मध्ये गणयित्वा त्रयोदश-नवान्तरत्वमुक्तमिति न कश्चिद्विसवादः। ततः षड्जस्य मध्यमपञ्चमौ सवादिनौ, ऋषभस्य धैवत, गाधारस्य निषाद', मध्यमस्य षड्जः, पञ्चमस्य षड्जः, धैवतस्यर्षभ', निषादस्य गाधार इति। ननु सवादित्वेन क उपयोग? ब्रूमः—यस्मिन्गीते यो ऽशत्वेन परिकल्पितः षड्जस्तस्य स्थाने मध्यमः क्रियमाणो जातिरागनाशको न भवति, यस्मिन्वा ऽशत्वेन मूर्च्छनावशान्मध्यमः प्रयुक्त-स्तस्य स्थाने षड्जः प्रयुज्यमानो जातिरागनाशको न भवति, षड्जपञ्चमयो' स्थाने पञ्चमषड्जौ प्रयुज्यमानौ जातिरागहानिकरौ न भवतः, एवमृषभ-धैवतयोः स्थाने धैवतर्षभौ प्रयुज्यमानौ जातिरागविनाशकरौ न भवतः; गाधार-निषादयोः स्थाने निषादगाधारौ प्रयुज्यमानौ जातिरागहानि न कुरुत इति। विवादिलक्षणमाह—**निगाविति**। निषादगाधारावन्येषा सर्वेषा स्वराणा विवादिनौ। पक्षान्तरमाह—**रिधयोरिति**। तौ निषादगाधारावृषभधैवतयोरेव विवादिनाविति। तृतीय पक्षमाह—**तयोरिति**। तयोर्निषादगाधारयोर्ऋषभधैवतौ विवादिनाविति। मतङ्गेन तु द्विश्रुत्यन्तरितत्वेन विवादित्वमुक्तम्; यदाह 'द्व्यन्तरौ तु स्वरौ विवादिनौ' इति। ननु किमिदं विवादित्वम्? ब्रूमः—वाद्यादिभिः स्वरैर्यद्रागस्य वादित्व मवादित्वमनुवादित्व वा प्राप्त तद्विनाशकत्वं नाम विवादित्वम्। ततश्चर्षभस्थाने यदा गाधारः प्रयुज्यते गाधारस्थाने वर्षभस्तदा जातिरागहानि-र्भवति। अनुवादिलक्षण कथयति—**शेषाणामिति**। येषा परस्पर सवादित्व विवादित्व वा नास्ति तेषामनुवादित्वम्। मतङ्गेन त्वेकश्रुत्यन्तरहीनत्वेनानु-

नृपामात्यानुसारित्वादनुवादी तु भृत्यवत् ॥ ५१ ॥
गीर्वाणकुलसंभूताः षड्जगांधारमध्यमाः ।

वादित्वमुक्तम् । नन्वनुवादी स्वरः किमनुवदति ? यद्वादिना रागस्य रागत्व सपादित तत्प्रतिपादकत्वं नामानुवादित्वम् । ततश्च षड्जस्थान ऋषभ प्रयुज्यमान ऋषभस्थाने च षड्जः प्रयुज्यमानो जातिरागविनाशकरो न भवति, पञ्चमस्थाने धैवत' प्रयुज्यमानो धैवतस्थाने च पञ्चमः प्रयुज्यमानो जातिरागविनाशकरो न भवति, षड्जस्थाने धैवतः प्रयुज्यमानो धैवतस्थाने च षड्जः प्रयुज्यमानो जातिरागविनाशकरो न भवति, तथा पञ्चमस्थान ऋषभ' प्रयुज्यमान ऋषभस्थाने च पञ्चमः प्रयुज्यमानो जातिरागविनाशकरो न भवति, मध्यमस्थान ऋषभ ऋषभस्थाने च मध्यमस्तथा धैवतस्थाने मध्यमो मध्यमस्थाने च धैवतः प्रयुज्यमानो जातिरागनाशको न भवतीति । ऋषभगाधारयोश्चैकश्रुत्यन्तरहीनत्वेनानुवादित्वे प्राप्ते द्व्यन्तरत्वाद्विवादित्वम् । एव षड्जग्रामे वादिसवादिविवाद्यनुवादिविचारः । एवमेव मध्यमग्रामे ऽपि पञ्चमस्य तृतीयश्रुत्यवस्थितत्वात्क्वचिद्विकृतो ऽयमेव विचारो बोद्धव्यः । तत्र षड्जस्य संवादी मध्यमः, ऋषभस्य धैवतपञ्चमौ, गाधारस्य निषादः; मध्यमस्य षड्जनिषादौ, पञ्चमस्यर्षभः, धैवतस्यर्षभः, निषादस्य गाधारमध्यमाविति । विवादित्व ग्रामद्वये ऽपि समानमेव । षड्जस्य पञ्चमधैवतर्षभा अनुवादिन', ऋषभस्य षड्जमध्यमौ, गाधारनिषादयोः सर्वविवादित्वादनुवादित्व नास्ति; मध्यमस्यर्षभधैवतौ, पञ्चमस्य मध्यमधैवतौ, धैवतस्य मध्यमपञ्चमाविति ज्ञातव्यम् । एतेषा वाद्यादीना प्रधानगुणभावमाह—**वादी राजेति** । यथा राजा मुख्यस्तथा वादी, अन्येषा तदनुसारित्वात् । सवादी त्वस्य वादिन' प्रधानपुरुषतुल्यः, कुतः ? अनुसारित्वात्सहवृत्तेः, अत एवामा सह वसतीत्यमात्य इत्यमात्यशब्देनाभिधीयते । विवादी तु रिपुतुल्यो विपरीतत्वात्, अननुसारित्वादित्यर्थः । अनुवादी सेवकवत्, नृपो वादी अमात्य सवादी, तदनुसारित्वात् । भृत्यो ऽप्युभयानुसारी भवति ॥ -४६—५१ ॥

(क०) ज्ञात्वा प्रयोगे ऽदृष्टातिशयो ऽप्यस्तीति स्वराणा कुलादीन्युद्देशक्रमेणाह—**गीर्वाणकुलेत्यादिना** ॥ ५२—५९- ॥

पञ्चमः पितृवंशोत्थो रिधावृषिकुलोद्भवौ ॥ ५२ ॥
निषादो ऽसुरवंशोत्थो ब्राह्मणाः समपञ्चमा ।
रिधौ तु क्षत्रियौ ज्ञेयौ वैश्यजाती निगौ मतौ ॥ ५३ ॥
शूद्रावन्तरकाकल्यौ स्वरौ वर्णास्त्विमे क्रमात् ।
पद्माभः पिञ्जरः स्वर्णवर्णः कुन्दप्रभो ऽसितः ॥ ५४ ॥
पीतः कर्बुर इत्येषां जन्मभूमीरथ ब्रुवे ।
जम्बूशाककुशक्रौञ्चशाल्मलीश्वेतनामसु ॥ ५५ ॥
द्वीपेषु पुष्करे चैते जाताः षड्जादयः क्रमात् ।
वह्निर्वेधाः शशाङ्कश्च लक्ष्मीकान्तश्च नारदः ॥ ५६ ॥
ऋषयो ददृशुः पञ्च षड्जादींस्तुम्बुरुर्धनी ।
वह्निब्रह्मसरस्वत्यः शर्वश्रीशगणेश्वराः ॥ ५७ ॥
सहस्रांशुरिति प्रोक्ताः क्रमात्षड्जादिदेवताः ।
क्रमादनुष्टुब्गायत्री त्रिष्टुप्च बृहती ततः ॥ ५८ ॥
पङ्क्तिरुष्णिक्च जगतीत्याहुश्छन्दांसि सादिषु ।
सरी वीरे ऽद्भुते रौद्रे धो बीभत्से भयानके ॥ ५९ ॥
कार्यौ गनी तु करुणे हास्यशृङ्गारयोर्मपौ ।

(सु०) इदानी षड्जादीना स्वराणा कुलानि कथयति—**गीर्वाणेति** । षड्जगाधारमध्यमास्त्रयः सुरवशसमुत्पन्नाः; पञ्चमः पितृवशोद्भवः, ऋषभधैवतावृषिवशोद्भवौ, निषादो ऽसुरवश्यः । इदानी ब्राह्मणत्वादिवर्णविशेष कथयति—**ब्राह्मणा इति** । षड्जमध्यमपञ्चमा ब्राह्मणाः, ऋषभधैवतौ क्षत्रियौ; निषादगाधारौ वैश्यौ; अन्तरकाकल्यौ शूद्रौ । तयोस्तु लक्षण मूर्च्छनाप्रकरणे वक्ष्यति ॥ ५१–५३- ॥ अधुना तु सितादिवर्णविशेष कथयति—**पद्माभ इति** । पद्माभो रक्तवर्णः षड्जः; ऋषभस्तु पिञ्जर ईषत्पीतवर्णः, गाधारः स्वर्णवर्णो ऽतिपीतवर्णः, मध्यमः कुन्दवर्णः शुभ्रः, पञ्चमो ऽसितः कृष्णवर्णः,

धैवतः पीतवर्णः, निषाद कर्बुरो विचित्रवर्ण ॥ -९४ ॥ अधुना ऽमूना स्वराणा जन्मभूमी प्रतिज्ञाय कथयति—एषा जन्मभूमीरिति। जम्बूद्वीपे षड्ज-स्योत्पत्तिः, शाकद्वीप ऋषभस्य, कुशद्वीपे गाधारस्य, क्रौञ्चद्वीपे मध्यमस्य, शाल्मलीद्वीपे पञ्चमस्य, श्वेतद्वीपे धैवतस्य, पुष्करद्वीपे निषादस्य। नन्विद द्वीपोत्पत्तिकथन कुत्रोपयुज्यते? स्वराणा सप्तत्वनिश्चय इति ब्रूम.। तथा चोक्त मतङ्गेन—'ननु कथ सप्त स्वरा इति नियमः? उच्यते—यथा सप्तधात्वाश्रि-तत्वेन सप्तैव धातवो रसादयो ज्ञेयाः, तथा चाह सुश्रुत.—

'त्वगसृङ्मासमेदोऽस्थिमज्जशुक्लानि धातव' ।'

इति, तथा सप्तचक्राश्रितत्वेन सप्तद्वीपाश्रितत्वेन वा सप्तैव स्वरा इति। ननु काकल्यन्तरयोरपि स्वरान्तरयोः सद्भावात्कथ सप्तैव स्वरा इति नियमः सिध्यति? नव स्वरा इति हि वक्तव्यम्, मैवम्, अनशत्वादनयो स्वरान्तरत्व नास्ति, विकृतनिषादस्यैव काकलीत्व विकृतगाधारस्यैवान्तरत्वम्। तथा चोक्त दत्तिलेन—

'निषादः काकलीसज्ञो द्विश्रुत्युत्कर्षणाद्भवेत्।
गाधारस्तद्वदेव स्यादन्तरस्वरसज्ञितः ॥
अनशत्वात्तु भेदेन स्वरत्व नोच्यते तयो ।
अतो निषादगाधारावेतावाद्यैरुदाहृतौ ॥'

इति ॥ ९५, ९५- ॥ अथ स्वराणा द्रष्टृनृषीन्कथयति—वह्निरिति। षड्जस्य-र्षिर्वह्नि', ऋषभस्य ब्रह्मा, गाधारस्य चन्द्रः, मध्यमस्य विष्णु., पञ्चमस्य नारदः; धैवतनिषादयोस्तुम्बुरु ॥ -९६, ९६- ॥ देवताः कथयति—वह्नीति ॥ -९७, ९७- ॥ छन्दासि कथयति—क्रमादनुष्टुबिति। ननु स्वराणाम् 'पद्माभ-' इत्यादि वर्णनिरूपणमृषिदैवतच्छन्दोनिरूपण च कुत्रोपयुज्यते? स्वरोपासना-यामित्यवेहि। यदा स्वराणा बीजैः षड्जादयः स्वरा उपास्यन्ते तदा तेषामृषि-देवताच्छन्दासि स्मर्तव्यानि, वर्णाश्च ध्येया.। अत एव स्वराणा बीजान्युक्तानि मतङ्गेन। यथा—

'वर्गाष्टक तु सप्राप्य अकारादि यशान्तकम्।
वर्णमात्रासमायुक्तमुद्धरेत्स्वरसप्तकम् ॥

अष्टमस्य तृतीय तु हरिबीजसमन्वितम् ।
आद्य स्वर स्वरज्ञस्तु उद्धरेत्स प्रयत्नतः ॥
सप्तमस्य द्वितीय तु कामबीजसमन्वितम् ।
उद्धरेत्तु स्वर नित्य सौरभेय[1] मनोहरम् ॥
द्वितीयस्य तृतीय तु हरिबीजसमन्वितम् ।
समुद्धरेत्तृतीय त सरस स्वरमुत्तमम् ॥
षष्ठस्यापि हि वर्गस्य अन्तिम चादिसयुतम् ।
अविनष्ट विजानीयान्मध्यमस्वरमुत्तमम् ॥
तदादि प्रथमोपेत स्वर सविद्धि शोभनम् ।
व्योमसख्यासमायुक्तमोष्ठस्थानसमुद्भवम् ॥
पञ्चमस्यापि वर्गस्य चतुर्थ चादिभूषितम् ।
कोदण्डद्वयसभूतमुद्धरेत्स्वरमुत्तमम ॥
अकारान्तान्तसभिन्न पञ्चमान्त समुद्धरेत् ।
ब्रह्मस्थानसमुद्भूत सुतारध्वनिसयुतम् ॥
आगमस्थः स्वरोद्धार एव तावत्प्रदर्शितः ।'

इति ॥ -५८, ५८- ॥ अथ स्वराणा रसव्यञ्जकनियममाह—सरी इति । षड्जर्षभौ वीराद्भुतरौद्रेषु, धैवतो बीभत्सभयानकयोः, गाधारनिषादौ करुणे, मध्यमपञ्चमौ हास्यशृङ्गारयोरिति ॥ -५९, ५९- ॥

इति प्रथमे स्वरगताध्याये नादस्थानश्रुतिस्वरजातिकुलदैवतर्षिच्छन्दोरसप्रकरणम् ॥ ३ ॥

---

[1] 'सौरभेयमृषभम्' इति सुधाटिप्पणी

अथ चतुर्थं ग्राममूर्च्छनाक्रमतानप्रकरणम्

ग्रामः स्वरसमूहः स्यान्मूर्च्छनाऽऽदेः समाश्रयः[1] ।
तौ द्वौ धरातले तत्र स्यात्षड्जग्राम आदिम ॥ १ ॥
द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ।
षड्जग्राम पञ्चमे स्वचतुर्थश्रुतिसंस्थिते ॥ २ ॥

(क०) एवं स्वरान्निरूप्य व्यस्ताना तेषा दृष्टादृष्टफलोपयोगित्व नास्तीति तत्सिद्धये नियतसमस्तस्वरसंनिवेशरूपान्मूर्च्छनाऽऽदीन्निरूपयिष्यं-स्तदाश्रयत्वाद्व्यवस्थापकत्वाच्च ग्रामयो प्रसक्तयोस्तत्सामान्यलक्षणं ताव-दाह—**ग्राम** इति । ग्रामवद् ग्राम । यथा लोके जनसमूहो ग्राम इत्युच्यते, एवमत्र स्वरसमूहो ग्राम इति विवक्षित । स्वरसमूहो ग्राम इत्येतावत्युच्य-माने लौकिकवैदिकवाक्येष्वपि स्वरसमूहत्वसभवात्तत्रातिव्याप्ति स्याल्लक्षणस्य । तद्व्यावृत्त्यर्थं मूर्च्छनाऽऽदे समाश्रय इति विशेषणम् । अत्रादिशब्देन क्रमतान-वर्णालंकारजात्यादयो गृह्यन्ते । सामान्यलक्षणे ग्राम इति जातावेकत्वनिर्दे-शादविशेषेण सप्तानामपि स्वराणा ग्रामविशेषणत्वे प्राप्ते, त्रयाणामेव तद्विशेष-णत्वमवगमयन्ग्रामविशेषलक्षणानि लोकव्यवस्थापूर्वकमाह—**तौ द्वावित्यादि-ना** । ननु समूहित्वाविशेषेण सप्तानामपि ग्रामव्यपदेशकत्वसंभवे कथ धरातले द्वावित्यवधारणमिति चेत्तत्रोच्यते—शुद्धविकृतरूपेण द्विविधस्वरप्रयोगवशात्,

'द्वौ ग्रामौ विश्रुतौ लोके षड्जमध्यमसंज्ञकौ'

इति मुनिवचनाच्च शुद्धाश्रयत्वात्षड्जग्राम आदिमो विकृताश्रयत्वाद्द्वितीयो मध्यमग्राम इत्युपपद्यत इति । **स्वचतुर्थश्रुतिसंस्थित** इति । स्वकीय-

[1] ०मूर्च्छनादिसमाश्रय.

स्वोपान्त्यश्रुतिसंस्थे ऽस्मिन्मध्यमग्राम इष्यते ।
यद्वा धस्त्रिश्रुतिः षड्जे मध्यमे तु चतुःश्रुतिः ॥ ३ ॥
रिमयोः श्रुतिमेकैकां गांधारश्चेत्समाश्रितः ।
पश्रुतिं धो निषादस्तु धश्रुतिं सश्रुतिं श्रितः ॥ ४ ॥
गांधारग्राममाचष्ट तदा तं नारदो मुनिः ।
प्रवर्तते स्वर्गलोके ग्रामो ऽसौ न महीतले ॥ ५ ॥

चतुर्थश्रुतौ करुणाजातिभेद आलापिन्यामादित सप्तदश्या स्थिते सति षड्जग्राम. । **स्वोपान्त्यश्रुतिसंस्थ** इति । स्वोपान्त्यश्रुतावायताभेदे सदीपन्या षोडश्या सतिष्ठत इति संस्थ·, तस्मिन् । अत्र चतुर्थश्रुतिसस्थित इत्युपान्त्यश्रुतिसस्थ इति चैतावत्युक्ते, मध्यमग्रामे मध्यमसाधारणे पञ्चमस्य चतु·श्रुतिकत्वेन स्वतृतीयश्रुतिसंस्थस्यापि मध्यमान्तिमश्रुतिसाहित्येन चतुर्थश्रुतिसंस्थत्वम्, तस्यामवस्थाया स्वद्वितीयश्रुतेरुपान्त्यत्वेनोपान्त्यश्रुतिसस्थत्व च सभवतीति तन्निवृत्त्यर्थमुभयत्र स्वशब्दोपादान कृतम्, तयोस्तृतीयद्वितीययो श्रुत्यो स्वकीयत्वेन रूपेण चतुर्थत्वोपान्त्यत्वाभावात् । यद्वेत्यभ्युच्चयपक्ष· । कुत ? पञ्चमभेदायत्तत्वेन ग्रामभेदे सिद्धे ग्रामभेदाश्रयणेन धैवतभेदकथनात्, धैवतस्य पञ्चमसनिधान विना स्वगतभेदाप्रतीते· स्वतो ग्रामभेदकत्वाभावाच्च । भेदकत्वकथनं तु धैवत पञ्चमान्त्यश्रुतिलाभाच्चतुश्रुतिर्विकृत सस्तदलाभे शुद्धश्च सन्साक्षाल्लक्षणस्य पञ्चमस्य क्रमात्त्रिश्रुतित्वं चतु·श्रुतित्व चावगमयन्ग्रामयोरुपलक्षणं भवतीति ॥ १—५ ॥

(सु०) ग्रामनिरूपणार्थमाह—**ग्रामः स्वरसमूह** इति । स्वराणा समूहो ग्रामशब्देनोच्यते । ननु कथ स्वरसमूहस्य ग्रामशब्दवाच्यत्वम् ? उच्यते—यतो मूर्च्छनाऽऽदे. समाश्रयभूत·, अतः स्वरसमूहो ग्रामः । लोकाश्रयभूतो हि ग्राम इत्युच्यते । तदुक्त मतङ्गेन—

'यथा कुटुम्बिनः सर्व एकीभूता वसन्ति हि ।
[1]सर्वलोकस्य स ग्रामो यत्र नित्य व्यवस्थितिः ॥'

इति। अथ वा स्वरसमूहस्य ग्रामत्वे ऽव्यवस्थयोच्चारितस्यापि स्वरसमूहस्य ग्रामत्व स्यात्, तन्निवृत्त्यर्थमुक्त मूर्च्छनाऽऽदिसमाश्रय इति। यस्तु मूर्च्छनाऽऽदीनामाश्रय' स्वरसमूहः स एव ग्रामशब्देनोच्यते, नाव्यवस्थयोच्चारित स्वरसमूह इत्यर्थ.। तथा चोक्त सगीतसमयसारकारेण—

'स्वराणा मूर्च्छनातानजातिजात्यशकात्मनाम् ।
व्यवस्थितश्रुतीना हि समूहो ग्राम इष्यते ॥'

इति। तस्य भेदावाह—**तौ द्वाविति**। ननु त्रयो ग्रामा इति प्रसिद्धिः; कथ द्वावित्युच्यते? अत आह—**धरातल** इति। तत्र तयोर्मध्ये षड्जग्राम आदिमो मुख्यः। द्वितीयो मध्यमग्रामः। अत एव मतङ्गेनोक्तम्—

'उभयोर्ग्रामयोर्मध्ये मुख्यत्व कस्य गण्यते ।
षड्जस्यैव हि मुख्यत्व [2]गम्यते वचनान्मुने' ॥'

इति। तयोर्लक्षण प्रतिज्ञाय कथयति—**तयोरिति**। पञ्चमे स्वरे स्वकीया या चतुर्थी श्रुतिर्यस्यामसौ स्थापितस्तत्स्थे ऽविकृते षड्जग्रामः। यद्यपि षड्जग्रामे ऽन्येषामपि षड्जादीना स्वराणामविकृतत्व तथा ऽपि पञ्चमस्यैवाविकृतत्वकथन मध्यमग्रामे पञ्चमस्य विकृतत्वात्तद्वैलक्षण्यप्रतिपादनार्थम्। मध्यमग्रामलक्षण कथयति—**स्वोपान्त्येति**। स्वस्योपान्त्या ऽन्त्याया' श्रुते. समीपे वर्तमाना या तृतीया श्रुतिस्तत्र सस्थिते ऽस्मिन्पञ्चमे मध्यमग्रामो भवति। यद्यपि धैवतस्य प्रथमा श्रुति पञ्चमस्यान्त्यश्रुते' समीपवर्तिनी भवति, तथा ऽपि सा स्वकीया न भवतीति तन्निवृत्त्यर्थ स्वेत्युक्तम्। इदमेव लक्षण प्रकारान्तरेण कथयति—**यद्वेति**। धो धैवतः षड्जग्रामे त्रिश्रुतिः, मध्यमग्रामे तु पञ्चमस्यान्तिमा श्रुति लब्ध्वा चतु'श्रुतिः। अर्थस्तु स एव। कि तु पूर्व पञ्चमस्वरप्राधान्येनोभयोर्लक्षण-

[1] सर्वलोकेषु
[2] गण्यते.

षड्जः प्रधानमाद्यत्वादमात्याधिक्यतस्तथा ।
ग्रामे स्यादविलोपित्वान्मध्यमस्तु पुरःसरः ॥ ६ ॥
एतत्कुलप्रसूतत्वाद्गांधारो ऽप्यग्रणीर्दिवि ।
क्रमाद् ग्रामत्रये देवा ब्रह्मविष्णुमहेश्वराः ॥ ७ ॥
हेमन्तग्रीष्मवर्षासु गातव्यास्ते यथाक्रमम् ।
पूर्वाह्णकाले मध्याह्ने ऽपराह्णे ऽभ्युदयार्थिभिः ॥ ८ ॥

मुक्तम्, इद तु धैवतप्राधान्येन । [1] धैवतप्रधान्यनिरूपणाद्यत्पूर्वोक्त लक्षणमसमतमिव भाति तत्परमते, न तु स्वमते । अत एव पञ्चमरहिताना कूटतानाना भेदकपञ्चमाभावादेव पौनरुक्त्य वक्ष्यति, न धैवताभावेन पौनरुक्त्यमिति । गाधारग्रामस्य क्षितितले ऽनुपयोगे ऽपि शास्त्रस्य सर्वविषयत्वात्तल्लक्षणं कथयति—**रिमयोरिति** । गाधार ऋषभस्यान्तिमा श्रुति मध्यमस्य चादिमा श्रुतिमाश्रितः सश्चतु·श्रुतिर्भवति । धैवतस्तु पञ्चमस्यान्तिमा श्रुतिमाश्रयति । निषादश्च धैवतस्यान्तिमा श्रुति गृहीत्वा षड्जस्य चादिमा श्रुति समाश्रित· सश्चतु श्रुतिर्भवति । तदा त गाधारग्राम नारदो मुनिराचष्ट । नारदकथन प्राशस्त्यार्थ न तु स्वमते ऽन्यथात्वप्रकटनार्थम् ॥ १—५ ॥

(क०) ननु स्वरप्रयोगवशादिह द्वावेव ग्रामौ स्याताम्, स्वरान्तरेषु सत्सु कि तयो· षड्जमध्यमविशेषणेनेत्याशङ्क्य तत्रोपपत्तिमाह— **षड्ज प्रधानमिति** । अमात्याधिक्यत, संवादिस्वरबाहुल्यादित्यर्थः । ग्रामे प्रधानं स्यादित्यन्वयः । **अविलोपित्वादिति** । मध्यमस्याविलोपित्वं चाधस्तनाना सरिगाणामुपरितनाना पधनीना च यथासंख्यं द्वयोर्द्वयोरेकत्र तन्त्र्या संवदनं संवाद इति मतानुसारेणैकाकिनो मध्यमस्यान्येन संवादाभावात्परिशेषादवधिभूतस्य तस्य लोपो नेष्यत इति केषाचिन्मतम् । अन्येषा तु शुद्धतान-

[1] धैवतप्राधान्यनिरूपण च समत परमतत्वेन, न तु स्वमतत्वेन ।

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।

लक्षणावसरे षड्जर्षभनिषादपञ्चमहीनाश्चत्वारस्ताना इत्यादिना भरतादिभिर्मध्यमव्यतिरिक्तानामेव षाडवौडुवकारित्वेन लोपविधानान्मध्यमस्याविनाशित्वमिति ॥ ६—८ ॥

(सु०) ननु कथ षड्जमध्यमगाधाराणामेव ग्रामत्वव्यपदेशो नान्येषा स्वराणामत आह—**षड्ज** इति । षड्जः सर्वेषा स्वराणामाद्य , तस्मात्प्रधान मुख्यः । अन्यदपि प्राधान्ये कारणमाह—**अमात्याधिक्यत** इति । अमात्या. सवादिन , तेषामाधिक्यमन्यस्वरापेक्षया । अन्येषा स्वराणामेकैक एव स्वरः सवादी , षड्जस्य तु मध्यमपञ्चमौ द्वौ सवादिनौ । मध्यमो ऽपि ग्रामे पुर.सर आद्यः, ग्रामव्यपदेशभाग्भवतीति यावत् । कारणमाह—**अविलोपित्वादिति** । षाडवितत्व औडुवितत्वे च मध्यमस्य लोपो नास्ति । तस्मात्सो ऽपि प्रधानम् । एतयोः षड्जमध्यमयो' कुले देवकुल उत्पन्नत्वाद्गाधारो ऽपि स्वर्गलोके स्वराणामग्रणीगाद्यो ग्रामव्यपदेशभाक् । अत एवोक्त मतङ्गेन—'ननु कथ षड्जमध्यमस्वराभ्या ग्रामव्यपदेश.? उच्यते—असाधारणत्वेन ताभ्या ग्रामव्यपदेश. । असाधारणत्व च देवकुलोत्पन्नत्वेन । ' इति । मध्यमस्याविलोपित्वमुक्त दत्तिलेन—

'पञ्चम मध्यमग्रामे षड्जग्रामे तु धैवतम् ।
अलोपिन विजानीयात्सर्वत्रैव तु मध्यमम् ॥'

इति । ग्रामत्रये ऽप्यधिष्ठातॄन्देवान्कथयति—**क्रमादिति** । गान ऋतुनियम कथयति—**हेमन्तेति** । ऋतुविशेषेष्वपि पूर्वाह्णादिकालविशेष गाने नियमयति—**पूर्वाह्णेति** । ऋतुविशेषेष्वप्यभ्युदयार्थिभिरिति फलस्य कथितत्वान्नियमे फलमनियमे न दोष । ग्रामनिरूपणप्रयोजनमुक्त मतङ्गेन—'स्वरश्रुतिमूर्च्छनातानजातिरागाणा व्यवस्थापकत्व नाम प्रयोजनम्' इति ॥ ६—८ ॥ इति ग्रामप्रकरणम् ॥

(क०) ग्रामलक्षणे तदाधेयत्वेन प्रथमोपात्ताना मूर्च्छनाना सामान्यलक्षणमाह—**क्रमात्स्वराणामिति** । क्रमादिति कूटतानव्यावृत्त्यर्थम् । सप्ताना

मूर्च्छनेत्युच्यते ग्रामद्वये ताः सप्त सप्त च ॥ ९ ॥
षड्जे तूत्तरमन्द्रा ऽऽदौ रजनी चोत्तरायता ।
शुद्धषड्जा [1]मत्सरीकृदश्वक्रान्ता ऽभिरुद्गता ॥ १० ॥
मध्यमे स्यात्तु सौवीरी हारिणाश्वा ततः परम् ।
स्यात्कलोपनता शुद्धमध्या मार्गी च पौरवी ॥ ११ ॥
हृष्यकेत्यथ तासां तु लक्षणं प्रतिपाद्यते ।

स्वराणामिति शुद्धतानव्यावृत्त्यर्थम् । आरोहश्चावरोहणमित्यारोह्यवरोहिद्विविधवर्णालंकारनिवृत्त्यर्थम् । **मूर्च्छने**ति । यया करणभूतया रागो मूर्च्छ्यते व्याप्यत इति, श्रोता मूर्च्छ्यते मोह्यत इति वा 'मुर्छा मोहसमुच्छ्राययो' इति धातोर्ण्यन्ताद्युचि प्रत्यये मूर्च्छनेति रूपम् । यदि पुनर्मतङ्गनन्दिकेश्वरादिभि प्रयोगे स्थानत्रयव्याप्तिसिद्ध्यर्थं लक्ष्यानुरोधेन द्वादशस्वरमूर्च्छना अप्युक्ता, एवमपि लक्ष्ये प्रायेण ग्रामद्वयसंसृष्टप्रयोगदर्शनात्तेनैव स्थानत्रयव्याप्ति सेत्स्यतीत्यभिप्रायेण न पृथगुक्ता । तद्विशेषान्ग्रामद्वये ऽपि व्यवहारार्थं नामतो रूपतश्च संख्यापूर्वकं दर्शयति—**ग्रामद्वय** इत्यादिना । मूर्च्छनेति जातिविवक्षयैकत्वे प्रकृते ऽपि ता इति बहुवचनेन परामर्शो वक्ष्यमाणतद्विशेषापेक्षयेत्युपपद्यते । मध्यस्थानस्थषड्जेनाग्रिमा मूर्च्छनोत्तरमन्द्रा ऽऽरभ्यते । कुतो ऽय नियमः? भरतादिनियमितत्वात्तासाम् । यथा ऽऽह भरतः 'मध्यमस्वरेण वैणवेन मूर्च्छनानिर्देशः' इति, मतङ्गो ऽपि 'मध्यसप्तकेन मूर्च्छनानिर्देशः कार्यो मन्द्रतारसिद्ध्यर्थम्' इति ॥ ९—११- ॥

(सु०) मूर्च्छना निरूपयति—क्रमादिति । सप्ताना स्वराणामारोहश्चावरोहण च मूर्च्छनेत्युच्यते । आरोहावरोहणशब्देन तद्युक्ताः स्वरा उच्यन्ते ।

[1] मत्सरीकृता ऽश्वक्रान्ता.

मध्यस्थानस्थषड्जेन मूर्च्छना ऽऽरभ्यते ऽग्रिमा ॥ १२ ॥
अधस्तनैर्निषादाद्यैः षडन्या मूर्च्छनाः क्रमात् ।
मध्यमध्यममारभ्य सौवीरी मूर्च्छना भवेत् ॥ १३ ॥
षडन्यास्तदधोऽधःस्थस्वरानारभ्य तु क्रमात् ।
षड्जस्थानस्थितैर्न्याद्यै रजन्याद्याः परे विदुः ॥ १४ ॥
हारिणाश्वादिका गाद्यैर्मध्यमस्थानसंस्थितैः ।

ततश्चारूढा अवरूढाश्च क्रमत' सप्त स्वरा मूर्च्छनाशब्दवाच्या' । मूर्च्छनाशब्द-व्युत्पत्ति. कथिता मतङ्गेन—

'मूर्च्छनाशब्दनिष्पत्तिर्मुर्छा मोहे समुच्छ्रये ।
मूर्च्छ्यते येन रागो हि मूर्च्छनेत्यभिसञ्ज्ञिता ॥'

इति । स्वराणामेव मूर्च्छनात्व न त्वारोहणावरोहणरूपायाः क्रियाया इत्य-प्युक्त तेनैव—

'आरोहणावरोहणक्रमेण स्वरसप्तकम् ।
मूर्च्छनाशब्दवाच्य हि विज्ञेय तद्विचक्षणैः ॥'

इति । सप्ताना स्वराणामित्युपलक्षणम्, द्वादशस्वराणामपि मूर्च्छनाना मतङ्गेन प्रतिपादितत्वात् । तासा भेदान्कथयति—**ग्रामद्वय** इति । षड्जग्रामे सप्त मूर्च्छना', मध्यमग्रामे च सप्त भवन्ति । तासा नामानि कथयति—**षड्ज** इति । षड्जग्रामे प्रथमा मूर्च्छनोत्तरमन्द्रा, द्वितीया रजनी, तृतीयोत्तरायता, चतुर्थी शुद्धषड्जा, पञ्चमी मत्सरीकृता, षष्ठ्यश्वक्रान्ता, सप्तम्यभिरुद्गता । मध्यमग्रामे प्रथमा सौवीरी, द्वितीया हारिणाश्वा, तृतीया कलोपनता, चतुर्थी शुद्धमध्या, पञ्चमी मार्गी, षष्ठी पौरवी, सप्तमी हृष्यकेति ॥ ९—११- ॥

(क०) अधस्तनैर्मन्द्रस्थानभवै । तदधोऽध स्थस्वरान्, तस्य मध्य-स्थानस्थितमध्यमस्याधोऽध·स्था गाधारर्षभादयः स्वरा, तान् । क्रमादव-रोहक्रमेण । लक्ष्यानुरोधेन पक्षान्तरमाह—**षड्जस्थानस्थितैरिति** । मध्य-

स्थानस्थितषड्जस्थानगतैरिति प्रकरणादवगन्तव्यम् । सरिगमपधनीत्युत्तर-मन्द्रास्वरस्थानेष्वेव निसरिगमपधेति रजनीस्वरानुच्चारयेदित्यर्थ ॥ **हारिणा-श्वादिका** इति । अत्रापि मध्यस्थानस्थितमध्ममारभ्य मपधनिसरिगेति सौवीरीस्वरस्थानेष्वेव गमपधनिसरीति हारिणाश्वास्वरानुच्चारयेदित्यर्थ । उभयत्राप्यादिशब्देन षड्जमध्यमस्थानयोरेव तत्तन्मूर्च्छनाऽऽदिमस्वरारम्भो द्रष्टव्य· ॥ -१२—१४- ॥

(सु०) श्रोत्रवधानार्थं वैषम्यद्योतनाय चैतासा लक्षणं प्रतिज्ञाय कथयति—**अथ तासामिति** । मध्यस्थानस्थितेन षड्जेनाग्रिमा षड्जग्रामे प्रथमा मूर्च्छनोत्तर-मन्द्रा ऽऽरभ्यते । षड्जमारभ्य सप्तमस्वरपर्यन्तमारोहो निषादमारभ्य षड्ज-पर्यन्त चावरोहः कार्य । अन्यास्तु षड्जन्यादयो मूर्च्छनास्तस्मान्मध्यस्थान-स्थितात्षड्जादधो ऽपकृष्टस्थाने स्थिता ये मन्द्रनिषादधैवतादयो मन्द्रर्षभपर्यन्ता षट्, तानारभ्य कर्तव्याः । मध्यमग्राममूर्च्छना लक्षयति—**मध्यमध्यमामिति** । मध्यस्थानस्थितं मध्यममारभ्य सौवीरी मध्यमग्रामे प्रथमा मूर्च्छना भवेत् । अन्यास्तु षड् हारिणाश्वादयस्तस्य मध्यस्थानस्थमध्यमस्याधो ऽधो ऽपकृष्टे स्थाने स्थिता स्वरा ये गाधारर्षभादयो मन्द्रपञ्चमपर्यन्ता·, तानारभ्य कर्तव्याः । ततश्चैव मूर्च्छनास्वरूप भवति—लिपौ बिन्दुशिरा मन्द्रो ज्ञातव्यः, ऊर्ध्वरेखा-शिरास्तु तार·, 'मन्द्रो बिन्दुशिरा भवेत् । ऊर्ध्वरेखास्तारो लिपौ' इति वक्ष्यमाणत्वात् । तत्र त्वारोहक्रम एव लिख्यते । अवरोहक्रमस्त्वन्तिमस्वराज्ज्ञा-तव्यः । सरिगमपधनि—उत्तरमन्द्रा ॥ १ ॥ निसरिगमपध—रजनी ॥ २ ॥ धनिसरिगमप—उत्तरायता ॥ ३ ॥ पधनिसरिगम—शुद्धषड्जा ॥ ४ ॥ मप धनिसरिग—मत्सरीकृता ॥ ५ ॥ गमपधनिसरि—अश्वक्रान्ता ॥ ६ ॥ रिगमप-धनिस—अभिरुद्गता ॥ ७ ॥ मपधनिसरिग—सौवीरी ॥ १ ॥ गमपधनिसरि—हारिणाश्वा ॥ २ ॥ रिगमपधनिस—कलोपनता ॥ ३ ॥ सरिगमपधनि—शुद्धमध्या ॥ ४ ॥ उत्तरमन्द्राया तु पञ्चमश्चतु·श्रुतिः, अस्या तु त्रिश्रुतिरित्यन-योर्भेद· । निसरिगमपध—मार्गी ॥ ५ ॥ अस्या रजन्याश्च पूर्ववत्पञ्चमेन भेदः । धनिसरिगमप—पौरवी ॥ ६ ॥ अस्या उत्तरायतायाश्च पूर्ववत्पञ्चमेन भेद ।

षड्जादीन्मध्यमादींश्च तदूर्ध्वं सारयेत्क्रमात् ॥ १५ ॥
चतुर्धा ताः पृथक्शुद्धा. [1]काकलीकलितास्तथा ।
सान्तरास्तद्द्वयोपेताः षट्पञ्चाशदितीरिताः ॥ १६ ॥

पधनिसरिगम— हृष्यका ॥ ७ ॥ अस्या. शुद्धषड्जायाश्चापि पूर्ववत्पञ्चमेन भेद' । मतान्तरेणान्यथैतासा लक्षणमाह—षड्जस्थानेति । निषादाद्यैः स्वरै. षड्ज-स्थानस्थितै रजन्याद्या भवन्ति । षड्जस्य स्थाने निषादे स्थाप्यमाने रजनी ॥२॥ धैवते स्थाप्यमान उत्तरायता ॥ ३ ॥ पञ्चमे स्थाप्यमाने शुद्धषड्जा ॥ ४ ॥ मध्यमे मत्सरीकृता ॥ ५ ॥ गाधारे ऽश्वक्रान्ता ॥ ६ ॥ ऋषभे ऽभिरुद्गता ॥ ७ ॥ एव मध्यमस्य स्थाने स्थाप्यमानैर्गाधाराद्यैर्हारिणाश्वाऽऽदयो भवन्ति । मध्यमस्य स्थाने गाधारे स्थाप्यमाने हारिणाश्वा ॥ २ ॥ ऋषभे स्थाप्यमाने कलोपनता ॥३॥ षड्जे स्थाप्यमाने शुद्धमध्या ॥ ४ ॥ निषादे मार्गी ॥ ५ ॥ धैवते पौरवी ॥ ६ ॥ पञ्चमे हृष्यका ॥ ७ ॥ इति ॥ -१२—१४- ॥

(क०) ननु षड्जमध्यमस्थानयोरेव निषादगाधारादिप्रयोगे सति षड्जग्राम उत्तरमन्द्रारजन्यादीना कथं परस्परं भेदो मध्यमग्रामे च सौवीरी-हारिणाश्वाऽऽदिकाना च कथमन्योऽन्य भेद इत्याशङ्क्य परिहरिष्यन्नाह—**षड्जादीन्मध्यमादींश्चेति** । **तदूर्ध्वमिति** । रजन्यादिकाया षड्जस्थान-स्थापितनिषादादेर्हारिणाश्वाऽऽदिकाया मध्यमस्थानस्थापितगाधारादेश्च पर षड्जादीन्मध्यमादींश्च स्वरान्सारयेत्, स्वस्वश्रुतिसंख्यापर्यालोचनया श्रुत्य-न्तराणि प्रापयेदित्यर्थ । **क्रमादिति** । उत्तरायताया षड्जस्थाने धैवते स्थापिते तदूर्ध्व निषादं कलोपनताया मध्यमस्थान ऋषभे स्थापिते तदूर्ध्वं गाधारं चेत्यादि क्रम । तस्मान्मूर्च्छनाना शुद्धादिभेदेन प्रत्येकं चातुर्विध्यं दर्शयति—**चतुर्धेति** । ग्रामयोरुक्ताश्चतुर्दश मूर्च्छनास्ता इति परामृश्यन्ते ।

[1] काकलीसहिता०

शुद्धा. षड्जग्रामे सर्वस्वरविकाररहिता , मध्यमग्रामे तु ग्रामस्वरूपभेद-निर्वर्तक पञ्चमं तदुपलक्षकं धैवत च विहायेतरस्वरविकाररहिता । तत्र पञ्चमधैवतयोस्तादवस्थ्यमेव शुद्धत्व विवक्षितमिति मन्तव्यम् । ननु विकृत-स्वरेषु यद्यपि पञ्चमस्य ग्रामभेदकत्वेनैव चरितार्थत्वे ऽपि, ऋषभधैवतयोश्च षड्जपञ्चमविकारायत्तविकारयो. स्वतो भेदकत्वाभावे ऽपि, षड्जमध्यमसा-धारणद्वयाश्रयणेनापि प्रकारान्तरेषु सभवत्सु केवल काकल्यन्तराश्रयणेनैव चतुर्धेति निश्चय कथमिति चेत् । सत्यम् , षड्जमध्यमयो साधारणी-कृतयो· स्वरूपेण भेदकत्वे सभवत्यपि काकल्यन्तरयो साधारणयोरन्तर्भूतत्वेन तयो पृथग्भेदकत्वम् । तथा चाह मतङ्ग·—'साधारणस्वरौ निषादगाधार-वन्तौ तदादिविकृतास्तत्रैवान्तर्भूता ' इति । कि च ग्रामद्वये मूर्च्छनासाधा-रणप्रकारभेदनिरूपणावसरे प्रतिनियतग्रामवर्तिनो षड्जमध्यमसाधारणयोरनु-पयोगाच्च । यथोक्तं भरतेन—'षड्जग्रामे षड्जसाधारणं मध्यमग्रामे मध्यमसाधारणम्' इति । अतश्चतुर्धेत्युपपद्यत इत्याचार्यरहस्यमसंप्रदाय-विदुषा दुर्ग्रहम् ।

श्रुतिस्वरप्रमाणज्ञ कल्लिनाथ कलानिधिः ।
चातुर्विध्य मूर्च्छनानामत्रैवं निरदीधरत् ॥ -१५, १६ ॥

(सु०) ननु षड्जस्थाने मध्यमस्थाने च यदि निषादादयो गाधारा-दयश्च स्थापितास्तदा षड्जमध्यमयोः कुत्रावस्थानमत आह—षड्जादीनिति । षड्जर्षभगाधारादीन्मध्यमपञ्चमधैवतादींश्चोर्ध्व सारयेदुत्कृष्टेषु स्वरेषु स्थापयेत् । यदा निषादः षड्जस्थाने स्थापितस्तदा षड्ज ऋषभस्थान ऋषभो गाधारस्थान इत्यादि । यदा धैवत. षड्जस्थाने तदा निषाद ऋषभस्थाने षड्जो गाधारस्थान इत्यादि स्वयमूह्यम् । ननु कथमन्यस्य स्वरस्यान्यस्वरस्थाने ऽवस्थानम्? ब्रूमः, नाय मुख्यो व्यवहार, कि त्वौपचारिको ऽय व्यवहार । अथ वा, दत्तिलादि-भिरङ्गीकृतत्वादेवमुच्यते । दत्तिलो हि स्वेच्छया यस्या कस्यामपि श्रुतौ

षड्ज स्थापयेत्तदपेक्षया च श्रुतिनियमेनान्यान्स्वरान्स्थापयेदित्युक्तवान् । यदाह—

'षड्जत्वेन गृहीतो यः षड्जग्रामे ध्वनिर्भवेत् ।
तत ऊर्ध्वं तृतीयः स्यादृषभो नात्र सशय ॥
ततो द्वितीयो गाधारश्चतुर्थो मध्यमस्ततः ।
मध्यमात्पञ्चमस्तद्वत्तृतीयो धैवतस्तत ॥
निषादो ऽतो द्वितीयः स्यात्ततः षड्जश्चतुर्थक ।'

इति । विवृत चैतत्प्रयोगस्तबकाख्याया दत्तिलटीकायाम्—'षड्जत्वेन षड्जस्वरभावेन गृहीतः परिकल्पितो बुद्ध्या व्यवस्थापितो य· कश्चिद् ध्वनिविशेष. षड्जाख्ये ग्रामे भवेत्तस्माद् ध्वनिविशेषादूर्ध्वं तृतीय स्यादृषभ.' इति । अनेनैवाभिप्रायेण दत्तिल· षड्जग्राममूर्च्छनाना मध्यमग्राममूर्च्छनाना च किंचिद्विकारेणैक्यमुक्तवान् । यदाह—

'गाधार धैवतीकुर्याद् द्विश्रुत्युत्कर्षणाद्यदि ।
तद्वशान्मध्यमादींश्च निषादादीन्यथा स्थितान् ॥
ततो ऽभूद्यावतिथ्येषा षड्जग्रामस्य मूर्च्छना ।
जायते तावतिथ्येव मध्यमग्राममूर्च्छना ॥
श्रुतिद्वयापकर्षेण गाधारीकृत्य धैवतम् ।
पूर्ववन्मध्यमाद्याश्च भावयेत्षड्जमूर्च्छनाः ॥'

इति । स्वेच्छया षड्जावस्थापनमङ्गीकृत्यैव दत्तिलदक्षप्रजापत्यादयो ऽवधान गाधर्वाङ्गत्वेनाङ्गयकार्षु । यदाह दत्तिल·—

'पदस्थ. स्वरसघातस्तालेन सुमितस्तथा ।
प्रयुक्तश्चावधानेन गाधर्वमभिधीयते ॥'

इति । दक्षप्रजापतिरपि—

'अवधानानि गाधर्व पश्चात्स्वरपदादय. ।
अवधानातिरेकेण त्रिविध नोपपद्यते ॥

इत्याह । अवधान नाम मनोबुद्धिस्मृतीन्द्रियाणामैकाग्र्यम् । षड्जो यत्र स्थापितस्तदपेक्षयैवान्येषा स्वराणामुच्चारणमिति यावत् । यदि स्वराः स्वेच्छया नावस्थाप्यन्ते तदा ऽवधान नोपयुज्येत । शार्ङ्गदेवेनापि चलवीणाया सारणानिरूपणेनाय पक्ष· किचित्स्वीकृत एव, 'स्वोपान्त्यतन्त्रीमानेयास्तस्या सप्त स्वरा बुधैः' इत्युक्तत्वात् । लोके च वैणिकाः स्वेच्छया स्वरानवस्थापयन्तो दृश्यन्त इत्यास्ता विस्तरः । मतङ्गेन तु द्वादशस्वरमूर्च्छना उक्ताः—

'इदानीं सप्रवक्ष्यामि द्वादशस्वरमूर्च्छनाः'

इति । अत्र मूर्च्छनानिर्देश· स्थानत्रितयप्राप्त्यर्थमिति वचनाद् द्वादशस्वरसपन्ना मूर्च्छना द्रष्टव्या. । नन्दिकेश्वरेणाप्युक्तम्—

'द्वादशस्वरसंपन्ना ज्ञातव्या मूर्च्छना बुधै ।
[1]जातिभाषाऽऽदिसिद्ध्यर्थं तारमन्द्रादिसिद्धये ॥'

इति । ताश्चैवम्—धनिसरिगमपधनिसरिग—उत्तरमन्द्रा ॥ १ ॥ निसरिगमपधनिसरिगम— रजनी ॥ २ ॥ सरिगमपधनिसरिगमप—उत्तरायता ॥ ३ ॥ रिगमपधनिसरिगमपध—शुद्धषड्जा ॥ ४ ॥ गमपधनिसरिगमपधनि—मत्सरीकृता ॥ ५ ॥ मपधनिसरिगमपधनिस—अश्वक्रान्ता ॥ ६ ॥ पधनिसरिगमपधनिसरि—अभिरुद्गता ॥ ७ ॥ इति षड्जग्रामे ॥ मध्यमग्रामे ऽप्येवमेव । [2]सरिगमपधनिसरिगमप—सौवीरी ॥ १ ॥ रिगमपधनिसरिगमपध—हारिणाश्वा ॥ २ ॥ गमपधनिसरिगमपधनि—कलोपनता ॥ ३ ॥ मपधनिसरिगमपधनिस—शुद्धमध्या ॥ ४ ॥ पधनिसरिगमपधनिसरि—मार्गी ॥ ५ ॥ धनिसरिगमपधनिसरिग—पौरवी ॥ ६ ॥ निसरिगमपधनिसरिगम—हृष्यका ॥ ७ ॥ इति । चतुर्दशानामपि मूर्च्छनाना चातुर्विध्य प्रतिपादयति—चतुर्धेति । ताश्चतुर्दश मूर्च्छना. पृथक्प्रत्येक चतुर्विधाः शुद्धाः काकलीसहिताः सान्तराः काकल्यन्तरोपेताश्चेत्येव षट्पञ्चाशद्भवन्ति ॥ -१५, १६ ॥

[1] परिभाषाऽऽदि०.

[2] निसरिगमपधनिसरिगम—सौवीरी० इत्यादि कोशान्तरपाठ

श्रुतिद्वयं चेत्षड्जस्य निषादः संश्रयेत्तदा ।
स काकली मध्यमस्य गांधारस्त्वन्तरः स्वरः ॥ १७ ॥

(क०) मूर्च्छनाभेदकत्वेन प्रसक्तयोः काकल्यन्तरयो स्वरूपमाह— **श्रुतिद्वयं चेदिति । मध्यमस्येति** । अत्रापि श्रुतिद्वय चेदित्याद्यनुषङ्गनीयम् । मूर्च्छनाभेदोपयोगिकाकल्यन्तरप्रसङ्गान्मतङ्गप्रोक्तौ स्वराणा प्रवेशनिग्रहावुच्येते । तद्यथा—द्विविधस्तानप्रयोग प्रवेशेन निग्रहेण च । प्रवेशो द्विविध पूर्वस्वरविप्रकर्षेणोत्तरस्वरमार्दवेन च । तत्रर्षभापेक्षया षड्जस्याधरीभूतस्य लोपनीयस्यापि विप्रकर्ष पीडनम्, ऋषभापादनमिति यावत् । तस्यैव षड्जस्य निषादापेक्षयोत्तरीभूतस्य मार्दव शिथिलीकरणम्, निषादापादनमिति यावत् । निग्रहस्तूत्तरस्वरस्य परित्याग, असस्पर्श इति यावत् । तथा चाह भरतः—

'द्विधा तानक्रिया तन्त्र्या प्रवेशान्निग्रहात्तथा ।

इति । तत्र प्रवेशो नामाधरस्वरविप्रकर्षादुत्तरस्वरमार्दवाद्वा । निग्रहश्चासंस्पर्श' इति । दत्तिलेनाप्युक्तम्—

'तानक्रिया द्विधा तन्त्र्या प्रवेशान्निग्रहात्तथा ।
प्रवेशो ध्वनिसादृश्यमसंस्पर्शस्तु निग्रह' ॥'

इति ॥ १७ ॥

(सु०) काकलीसहिताः सान्तरा इत्युक्तम्, तत्र को ऽय काकल्यन्तरो वेत्यपेक्षायामाह—**श्रुतिद्वयमिति** । निषादः षड्जस्य श्रुतिद्वय सश्रयेच्चेत, षड्जस्य द्वितीयश्रुतौ तिष्ठश्चतुःश्रुतिर्भवति यदि, तदा काकलीत्युच्यते । गाधारश्च मध्यमस्य श्रुतिद्वय गृह्णश्चतुःश्रुतिः सन्नन्तर इत्युच्यते । निषादगाधारावेव काकल्यन्तरस्वरौ, न तयो' स्वरान्तरत्वमित्युक्तं प्राक् ॥ १७ ॥

यस्यां यावतिथौ षड्जमध्यमौ ग्रामयोः क्रमात् ।
मूर्च्छना तावतिथ्येव सा निःशङ्केन कीर्तिता ॥ १८ ॥
प्रथमादिस्वरारम्भादेकैका सप्तधा भवेत् ।
तासूच्चार्यान्त्यस्वरांस्तान्पूर्वानुच्चारयेत्क्रमात् ॥ १९ ॥
ते क्रमास्तेषु संख्या स्याद् द्वानवत्या शतत्रयम् ।
यक्षरक्षोनारदाब्जभवनागाश्विपाशिन. ॥ २० ॥
षड्जग्रामे मूर्च्छनानामेता' स्युर्देवताः क्रमात् ।
ब्रह्मेन्द्रवायुगन्धर्वसिद्धद्रुहिणभानवः ॥ २१ ॥
स्युरिमा मध्यमग्राममूर्च्छनादेवताः क्रमात् ।
तासामन्यानि नामानि नारदो मुनिरब्रवीत् ॥ २२ ॥
मूर्च्छनोत्तरवर्णा ऽऽद्या षड्जग्रामे ऽभिरुद्गता ।
अश्वक्रान्ता च सौवीरी हृष्यका चोत्तरायता ॥ २३ ॥
रजनीति समाख्याता ऋषीणां सप्त मूर्च्छनाः ।
आप्यायनी विश्वकृता चन्द्रा हेमा कपर्दिनी ॥ २४ ॥
मैत्री चान्द्रमसी पित्र्या मध्यमे मूर्च्छना इमाः ।
नन्दा विशाला सुमुखी चित्रा चित्रवती सुखा ॥ २५ ॥
आलापा चेति गांधारग्रामे स्युः सप्त मूर्च्छनाः ।
ताश्च स्वर्गे प्रयोक्तव्या विशेषात्तेन नोदिताः ॥ २६ ॥

(क०) मूर्च्छनासु प्रथमादिसंख्यापरिज्ञानोपायमाह—**यस्यामिति** । **यावतिथाविति** । यावच्छब्दात्पूरणे ऽर्थे डटि 'वतोरिथुक्' इति वत्वन्तस्येथु-गागमे कृते यावतिथ इति रूपम् । ग्रामयोर्यस्या मूर्च्छनाया षड्जमध्यमौ यावतिथौ सा मूर्च्छना तावतिथी । अत्र 'टिड्ढाणञ्—' इत्यादिना

डीप् ॥ अथ मूर्च्छनाप्रसङ्गेन केवलारोहवत्तया तदेकदेशरूपान्क्रमान्प्रस्तारे कूटतानोपयोगार्थं प्रतिमूर्च्छनमियत्तया ऽवधार्य लक्षयति—प्रथमादीत्यादिना। प्रथमादिस्वरारम्भात्, यस्या मूर्च्छनाया य प्रथम स्वर स आदिर्येषा त इतरे षट् स्वरा, तद्गुणसविज्ञानात्प्रथमश्चेति प्रथमादय सप्त स्वरा, तेषामारम्भः क्रमादादिमत्वेनोच्चारणम्, तस्मात्। एकैकेति। शुद्धादिभेदेनोक्तासु षट्पञ्चाशन्मूर्च्छनासु प्रत्येकमित्यर्थः। तास्वन्त्यस्वरान्क्रमादुच्चार्य पूर्वान्स्वरान्क्रमादुच्चारयेदिति क्रमादित्यस्यावृत्त्या ऽन्वय कर्तव्य। पूर्वानारब्धस्वरादधस्तनान्। इह सप्तस्वरात्मकेषु क्रमेषु पूर्वानुच्चारयेदिति लक्षणाश प्रतिमूर्च्छन प्रथमक्रमेष्वसंभाव्यो ऽपि द्वितीयादिक्रमेषु सभवत्स्वरविषयो द्रष्टव्य। तद्यथा—उत्तरमन्द्राया सरिगमपधनीति प्रथम क्रम। निसरिगमपधेति द्वितीय। धनिसरिगमपेति तृतीय। पधनिसरिगमेति चतुर्थः। मपधनिसरिगेति पञ्चम। गमपधनिसरीति षष्ठः। रिगमपधनिसेति सप्तम। एवं क्रमेणोच्चारितत्वादेतेषा क्रमसंज्ञा ॥ यक्षरक्ष इत्यादि स्पष्टार्थ ॥ १८-२६ ॥

(सु०) मूर्च्छनासख्यापरिज्ञानार्थं सुगममुपायमाह—यस्यामिति। उभयो ग्रामयोर्मध्ये षड्जमध्यमौ स्वरौ यावतिथौ यावत्सख्यापूरणौ, तावतिथी तावत्सख्यापूरणी मूर्च्छना नि.शङ्केन निःशङ्क इति बिरुदविराजितेन शार्ङ्गदेवेन कथिता। षड्जग्राममूर्च्छनासु यदि षड्जः प्रथमस्तर्हि प्रथमा मूर्च्छना, यदि षड्जो द्वितीयस्तर्हि द्वितीया, यदि तृतीयस्तृतीया, यदि चतुर्थश्चतुर्थी, यदि पञ्चम. पञ्चमी, यदि षष्ठः षष्ठी, यदि सप्तमः सप्तमीति। एव मध्यमग्राममूर्च्छनासु यदि मध्यमः प्रथमस्तर्हि प्रथमा मूर्च्छना, यदि द्वितीयो द्वितीया, यदि तृतीयस्तृतीयेत्यादि ॥ १८ ॥ षट्पञ्चाशत्सख्याना मूर्च्छनाना प्रत्येक सप्तविधत्व दर्शयति—प्रथमादीति। एकैका मूर्च्छना सप्तधा भवति, प्रथमद्वितीयतृतीय तुरीयपञ्चमषष्ठसप्तमस्वरारम्भात्। ननु द्वितीयादिस्वरारम्भे कथं सप्तस्वरत्वम्? अत आह—तास्विति। तासु मूर्च्छनास्वन्त्यस्वरपर्यन्तमुच्चार्य पूर्वान्स्वरानु-

चारयेत् । ननु तर्हि क्रमादारोहावरोहाभावान्मूर्च्छनात्व व्याहन्येत, अत आह—क्रमादिति । यद्यप्यारोहावरोहयोः क्रमो नास्ति, तथा ऽपि स्वरक्रमस्य सद्भावान्मूर्च्छनात्वम् ॥ १९ ॥ ते मूर्च्छनाभेदाः क्रमशब्देनोच्यन्ते । तेषा सख्या द्वानवत्या ऽधिक शतत्रय ज्ञातव्यम् । मतङ्गदत्तिलौ तु मूर्च्छनानामन्यथा चातुर्विध्यमवादिष्टाम् । यदाह मतङ्ग —'तत्र सप्तस्वरा मूर्च्छना चतुर्विधा पूर्णा षाडवौडुविता साधारणी चेति । तत्र सप्तभि स्वरैर्या गीयते सा पूर्णा । षड्भिः स्वरैर्या गीयते सा षाडवा । पञ्चभिः स्वरैर्या गीयते सौडुविता । काकल्यन्तरैः स्वरैर्या गीयते सा साधारणी ।' इति । दत्तिलो ऽप्याह—

'स्वरौ यावतिथौ स्याता ग्रामयो' षड्जमध्यमौ ।
मूर्च्छना तावतिथ्येव तद्ग्रामद्वितये तथा ॥
सर्वास्ताः पञ्चषट्पूर्णसाधारणकृता. स्मृताः ।'

इति । मूर्च्छनाना षाडवत्व वक्ष्यमाणषाडवतानप्रकारेणोक्तम् । ओडुवत्व वक्ष्यमाणौडुवतानप्रकारेणोक्तम् । ताभ्या षाडवौडुवत्वम् । मूर्च्छनातानयोश्च भेदः प्रतिपादितो मतङ्गेन । यदाह—'ननु मूर्च्छनातानयोः को भेद.? उच्यते । मूर्च्छनातानयोर्नार्थान्तरत्वमिति विशाखिलः । एतन्न सगतम्, सग्रहश्लोके मूर्च्छनातानयोर्भेदस्य प्रतिपादितत्वात् । ननु कथ मूर्च्छनातानयोर्भेद' ? ब्रूम.—आरोहावरोहक्रमयुक्त' स्वरसमुदायो मूर्च्छनेत्युच्यते, तानस्त्वारोहणक्रमेण भवतीति भेदः' इति ॥ १९- ॥ मूर्च्छनाना देवता. कथयति—यक्षेति । यक्षाः, रक्षासि, नारद., अब्जभवो ब्रह्मा, नागा. सर्पा', अश्विनौ दस्रौ, पाशी वरुण. ॥ -२०, २०- ॥ मध्यमग्राममूर्च्छनाना देवताः कथयति—ब्रह्मेति । देवताकथन तु तया तया मूर्च्छनया गीतया सा सा देवता प्रीयत इत्येतमर्थ ज्ञापयितुम् । नारदमतेन मूर्च्छनानामन्यथा नामानि कथयति—तासामिति । ऋषीणा समाख्याता इति । ऋषिभि' समाख्याता इत्यर्थ । नारदमतेन गाधारग्राममूर्च्छनानामानि कथयति—नन्देति । ननु गाधारग्राममूर्च्छनाना लक्षण किमिति नोक्तम् ? अत आह—ताश्चेति । विशेषयति व्यावर्तयति सजातीयविजातीयेभ्य इति विशेषो लक्षणम् । ल्यब्लोपे पञ्चमी । लक्षण कृत्वा नोक्ता इत्यर्थः ॥ -२१—२६ ॥

तानाः स्युर्मूर्च्छना शुद्धाः षाडवौडुवितीकृताः ।
षड्जगाः सप्त हीनाश्चेत्क्रमात्सरिपसप्तमैः ॥ २७ ॥
तदा ऽष्टाविंशतिस्ताना मध्यमे सरिगोज्झिताः ।
सप्त क्रमाद्यदा तानाः स्युस्तदा त्वेकविंशतिः ॥ २८ ॥
एते चैकोनपञ्चाशदुभये षाडवा मताः ।
सपाभ्यां द्विश्रुतिभ्यां च रिपाभ्यां सप्त वर्जिताः ॥ २९ ॥
षड्जग्रामे पृथक्ताना एकविंशतिरौडुवाः ।
रिधाभ्यां द्विश्रुतिभ्यां च मध्यमग्रामगास्तु ते ॥ ३० ॥
हीनाश्चतुर्दशैव स्युः पञ्चत्रिंशत्तु ते युताः ।
सर्वे चतुरशीतिः स्युर्मिलिताः षाडवौडुवाः ॥ ३१ ॥

(क०) प्रसङ्गात्क्रमानुक्त्वा मूर्च्छनैकदेशरूपत्वेन मूर्च्छनाऽनन्तरमुद्दिष्टाञ्शुद्धतानाँल्लक्षयति—**तानाः स्युरिति** । तन्यते विस्तार्यत इति तनोतेर्धातो 'अकर्तरि च—' इत्यादिना सूत्रेण कर्मणि घञि तान इति रूपं दायो लाभ इतिवत् । शुद्धा मूर्च्छना षाडवौडुवितीकृता सत्यः शुद्धास्ताना स्युरिति शुद्धपदस्योभयत्र संबन्ध । यदि तानपदेनैव संबन्धस्तदा मूर्च्छना इत्यविशेषेण प्रकृतत्वात्षट्पञ्चाशन्मूर्च्छनानामपि प्रसक्तौ तासा च प्रत्येकं वक्ष्यमाणप्रकारेण षाडवौडुवितत्वयो कृतयोस्तदुत्थतानसंख्याया षट्त्रिंशदुत्तरशतत्रयमिताया सत्याम् 'तानाश्चतुरशीति. स्यु' इति भरतवचनविरोध स्यात । कि चोत्तरवाक्ययो 'षड्जगा सप्त' 'मध्यमे सप्त' इति च सख्योपादानमनुपपन्नं स्यात् । अत शुद्धा मूर्च्छना इत्यन्वय कर्तव्य । अथ यदि मूर्च्छनापदेनैव संबन्ध. क्रियेत तदा कूटतानानामपि लक्ष्यत्व प्रतीयेत, तानपदस्याविशेषेणोपादानात् । तन्मा भूदित्यु-

भयत्रान्वय कर्तव्यः। इह मूर्च्छनाना शुद्धत्व नाम काकल्यन्तररहितत्वम्, तानाना तु शुद्धत्व काकल्यन्तररहितत्व व्युत्क्रमेणोच्चारितस्वररहितत्वं चावगन्तव्यम्। षाडवौडुवितीकृता इति। सप्तसु नियतैकस्वरलोपात्षाडवा। सप्तसु नियतस्वरद्वयलोपादौडुविता। पूर्वमषाडवा षाडवा संपन्नाः षाडवीकृता, पूर्वमनौडुविता औडुविताः सपन्ना औडुवितीकृताः। षाडवीकृताश्चौडुवितीकृताश्चेति समास। षाडवौडुवितीकृता इत्यनेनैकस्य द्वयोर्वा स्वरयोरविशेषेण लोपे प्राप्ते, भरतादिमतानुसारेण लोपं निगमयति—**षड्जगा** इत्यादिना। ननु शुद्धतानेषु केषुचिद्भेदकपञ्चमलोपाद् ग्रामविवेकः कथमिति चेत्, उच्यते—ग्रामविशेषमधिकृत्यैव तत्तत्स्वरविहीनतानाभिधानात्क्वचिद्भेदकपञ्चमाभावे ऽपि तानविशेषस्यैव ग्रामभेदकत्वमिति ॥ २७–३१ ॥

(सु०) तानान्निरूपयति—**ताना. स्युरिति**। शुद्धा मूर्च्छनास्ताना: स्यु.। किविधा मूर्च्छना: ? विवक्षितैकस्वरापकर्षेण विवक्षितस्वरद्वयापकर्षेण च षट्स्वराः पञ्चस्वराश्चेति कृताः। तमेव विवक्षित स्वरापकर्ष कथयति—**षड्जगा** इति। षड्जग्रामस्था मूर्च्छना यदा षड्जेन हीना: क्रियन्ते तदा सप्त ताना भवन्ति। यदर्षभेण हीनास्तदा सप्त। यदा पञ्चमेन हीनास्तदा सप्त। यदा सप्तमेन निषादेन हीनास्तदा सप्त। एव षड्जग्रामे षाडवा अष्टाविंशतिस्ताना भवन्ति। मध्यमग्रामे सप्त मूर्च्छना यदा षड्जोज्झिता भवन्ति तदा सप्त ताना:। यदर्षभोज्झितास्तदा सप्त। यदा गाधारोज्झितास्तदा सप्त। एव मध्यमग्राम एकविंशतिः षाडवास्ताना भवन्ति। ग्रामद्वये मिलिता. षाडवास्ताना एकोनपञ्चाशत् ॥ २७—२८- ॥ औडुवास्तानान्निरूपयति—**सपाभ्यामिति**। षड्जग्राममूर्च्छना: सपाभ्या षड्जपञ्चमाभ्या वर्जिता यदा भवन्ति तदा सप्तौडुवास्ताना:। यदा द्विश्रुतिभ्या गाधारनिषादाभ्या वर्जितास्तदा सप्त। यदा रिपाभ्यामृषभपञ्चमाभ्या हीनास्तदा सप्त। एवं षड्जग्राम एकविंशतिस्ताना औडुवा:। मध्यमग्रामे यदा सप्त मूर्च्छना रिधाभ्यामृषभधैवताभ्या हीना भवन्ति तदा सप्त ताना औडुवा:। यदा द्विश्रुतिभ्या गाधारनिषादाभ्या हीनास्तदा सप्त। एवं मध्यमग्राम

असंपूर्णाश्च संपूर्णा व्युत्क्रमोच्चारितस्वराः ।
मूर्च्छनाः कूटतानाः स्युस्तत्संख्यामभिदध्महे ॥ ३२ ॥
पूर्णाः पञ्च सहस्राणि चत्वारिंशद्युतानि तु ।
एकैकस्यां मूर्च्छनायां कूटतानाः सह क्रमै ॥ ३३ ॥

औडुवास्तानाश्चतुर्दश । ग्रामद्वये मिलिता औडुवा पञ्चत्रिंशत् । सर्वे ऽपि षाडवौडुवाश्चतुरशीतिः । तानाना प्रयोगस्तु द्विधा कथितो मतङ्गेन । यदाह—कथमेषा तानाना प्रयोग कार्य इति चेत्, उच्यते । द्विविधस्तानप्रयोग प्रवेशेन निग्रहेण च । प्रवेशो ह्यृषभापेक्षया षड्जस्याधरीभूतस्य लोपनीयस्य विप्रकर्ष पीडनम्, ऋषभापादनमिति यावत् । इति विप्रकर्षेण प्रवेश । मार्दवेनाय यथा—तस्यैव षड्जस्य निषादापेक्षयोत्तरीभूतस्य मार्दव शिथिलीकरणम्, निषादापादनमिति यावत् । इति द्विविधः प्रवेशः । निग्रहस्तूत्तरस्वरपरित्यागो ऽसस्पर्शः । प्रयोगस्तु यथा—सासागरिपापामारी । तथा चाह भरतः—'द्विधा तानक्रिया तन्त्र्या प्रवेशो निग्रहश्च । अत्र प्रवेशो नामाधरस्वरप्रकर्षणादुत्तरस्वरमार्दवाच्च । निग्रहश्चासस्पर्शः' इति । दत्तिलो ऽप्याह—

'द्विधा तानक्रिया तन्त्र्या प्रवेशान्निग्रहात्तथा ।
प्रवेशो ध्वनिसादृश्यमसस्पर्शस्तु निग्रहः ॥'

इति । ननु प्रथमाया सप्तम्या च मूर्च्छनाया षड्जे लुप्ते रिगमपधनीत्येकमेव रूप भवतीति तत्र को विशेषः ? सत्य भेदो नास्ति, पर तु मन्द्रतारकृतो भेदो विद्यत एव । ननु मूर्च्छनास्तावज्जातिरागभाषाऽऽदिषूपयोगिन्य इति युक्त तासा कथनम्, तानास्तु कुत्रोपयुज्यन्ते ? उच्यते । द्वयोर्ग्रामयोर्जातिरागान्यत्वप्रतिपादनार्थं प्रयोगस्तानानामित्युक्त मतङ्गेन ॥ २९—३१ ॥

(क०) क्रमप्राप्तान्कूटतानाँल्लक्षयति—**असंपूर्णाश्चेति** । मूर्च्छनाश्चतुर्विधा अपि मूर्च्छना सपूर्णा असपूर्णाश्च व्युत्क्रमेणोच्चारितस्वराश्चेत्कूटताना स्युरित्यन्वय । सपूर्णा. सप्तस्वरयुक्ता, असंपूर्णा एकैकान्त्यान्त्यस्वरत्यागे सति षटस्वराद्येकस्वरान्ता., चकारो विकल्पार्थ. । व्युत्क्रमोच्चा-

षट्पञ्चाशन्मूर्च्छनास्थाः पूर्णाः कूटास्तु योजिताः ।
लक्षद्वयं सहस्राणि द्व्यशीतिर्द्वे शते तथा ॥ ३४ ॥
चत्वारिंशच्च संख्याता अथापूर्णान्प्रचक्ष्महे ।
एकैकान्त्यान्त्यविरहाद्भेदाः षट् षट्स्वरादयः ॥ ३५ ॥
एकस्वरो ऽत्र निर्भेदो ऽप्युक्तो नष्टादिसिद्धये ।
क्रमा अकूटतानत्वे ऽप्युक्तास्तेषूपयोगिनः ॥ ३६ ॥

रितस्वरा इत्यत्र स्वराणामानुपूर्व्या ऽऽरोह एव क्रम । तेष्वेकादिस्वरव्यत्यासो व्युत्क्रमः । अवरोहे सत्यामपि विपरीतानुपूर्व्या क्रमत्वाभावेन कूटतानत्वमेव । कूटत्वं नाम व्युत्क्रमोच्चारितस्वरत्वम् ॥ अथ षट्पञ्चाशति मूर्च्छनास्वेकैकस्या· संपूर्णादिसप्तभेदेषु प्रतिभेदं वक्ष्यमाणप्रस्तारवशादियत्तया कूटतानसख्या दर्शयितुं प्रतिज्ञापूर्वकमाह—**पूर्णाः पञ्च सहस्राणी**त्यादिना ॥ **एकैकान्त्यान्त्यविरहादि**ति । एकैकस्या मूर्च्छनायामन्त्यान्त्यविरहादन्त्यान्त्यस्वरपरित्यागात् । अन्त्यान्त्येति वीप्सयोत्तरमन्द्राया संपूर्णक्रमे ऽन्त्यो निषाद, तस्य परित्यागात्षट्स्वर· क्रमो भवति । तस्मिन्क्रमे ऽन्त्यो धैवत, तत्परित्यागात्पञ्चस्वर क्रमो भवति । एवमसंपूर्णा षड् भेदा द्रष्टव्या· । तद्यथा सरिगमपधेति षट्स्वरो भेद , सरिगमपेति पञ्चस्वर , सरिगमेति चतु स्वर , सरिगेति त्रिस्वर , सरीति द्विस्वर· , सेत्येकस्वर· । एवमन्यास्वपि मूर्च्छनासु प्रत्येकं षड् भेदा द्रष्टव्याः । निर्भेद प्रस्ताराभावादवान्तरभेदरहित । **नष्टादिसिद्धय** इति । आदिशब्देनोद्दिष्टस्य संख्यायाश्च ग्रहणम्, तेषु 'मौलैकाङ्कसमन्वितैः' इत्येकस्वरतानस्योपयोगात्तत्सिद्धिरिति, तस्यै । **तेषूपयोगिन** इति । तेषु कूटतानेषु मूलकारणत्वेनोपयोगिनो यतो ऽत उक्ता· । व्युत्क्रमस्य क्रमापेक्षित्वादिति भावः ॥ ३२–३६ ॥

(सु०) कूटतानान्कथयति— असंपूर्णा इति । या मूर्च्छना असपूर्णा याश्च सपूर्णास्तास्ता एव व्युत्क्रमेणोच्चारितस्वरा' सत्य कूटताना भवन्ति । प्रतिमूर्च्छन पूर्णकूटतानसख्या प्रतिज्ञाय कथयति—तत्संख्यामिति ॥ ३२ ॥ एकैकस्या मूर्च्छनाया पूर्णा कूटतानाश्चत्वारिशदुत्तराणि पञ्च सहस्राणि (५०४०) भवन्ति । ननु मतङ्गेन त्रयस्त्रिशदधिकानि पञ्च सहस्राणि (५०३३) प्रतिमूर्च्छन कूटतानसख्योक्ता, यदाह—"कूटतानाना सहस्राणि पञ्च त्रयस्त्रिशदधिकानि निष्पद्यन्ते, दत्तिलेनाप्युक्तम्—

'पूर्णा' पञ्च सहस्राणि त्रयस्त्रिशच्च सख्यया ।
कथयन्ति प्रतिग्राममुपायो गणने ऽधुना ॥'

इति" इति । तन्निरासार्थमाह—सह क्रमैरिति । प्रतिमूर्च्छन प्रस्तारे क्रियमाणे सप्त क्रमा' सजायन्ते, तै सह चत्वारिशदुत्तराणि पञ्च सहस्राणि भवन्तीति तात्पर्यम् । दत्तिलादिभिस्तु क्रमान्विहाय कूटतानसख्यैव निर्दिष्टेत्यविरोधः ॥३३॥ प्रतिमूर्च्छन कूटतानसख्यामुक्त्वा सर्वासा मूर्च्छनाना कूटतानसख्या कथयति—षट्पञ्चाशदिति । चत्वारिशदधिकानि पञ्च सहस्राणि षट्पञ्चाशता गुणनीयानि । एतावता लक्षद्वय द्व्यशीतिः सहस्राणि शतद्वय चत्वारिशदधिकमितीय सख्या (२८२२४०) निष्पद्यते । अपूर्णान्कूटतानान्प्रतिज्ञाय कथयति—अथापूर्णानिति । क्रमाणा कूटतानाना च षट्स्वरादयः षड् भेदा भवन्ति । कथ भवन्तीत्यपेक्षायामाह—एकैकान्त्यान्त्यविरहादिति । पूर्णा या मूर्च्छना ग्रामद्वये तासामेकैकान्त्यस्वरापकर्षेण, अन्त्यैकस्वरापकर्षेण षट्स्वरा भेदा भवन्ति, अन्त्यस्वरद्वयापकर्षेण पञ्चस्वरा', अन्त्यस्वरत्रयविरहेण चतु.स्वराः, अन्त्यस्वरचतुष्टयहान्या त्रिस्वरा., अन्त्यस्वरपञ्चकहान्या द्विस्वरा, अन्त्यस्वरषट्कहानेनैकस्वरा इति ॥३४, ३५॥ नन्वेकस्वराणा प्रस्ताराभावाद्भेदा न सन्ति, ते किमर्थमत्रोच्यन्ते? अत आह—एकस्वर इति । एकस्वरभेदा नष्टोद्दिष्टसिद्धय उक्ता । एकस्वरपरित्यागेन द्विस्वरादीनामपि निवेशने खण्डमेरौ नष्टोद्दिष्टपरिज्ञानस्याशक्यत्वादेकस्वरा अप्युक्ता इत्यर्थः । ननु तर्हि क्रमाः कूटतानत्वाभावात्किमर्थमत्रोच्यन्ते? अत आह—क्रमा इति । क्रमा यद्यपि कूटताना न भवन्ति, तथा ऽपि 'क्रम न्यस्य स्वरः स्थाप्य' इति वक्ष्यमाणे प्रस्तारे ते कूटतानेषूपयोगिनो भवन्ति, क्रमैर्विना कूटतानानामशक्यज्ञानत्वात् ॥ ३२–३६ ॥

स्युः षाडवानां विंशत्या सह सप्त शतानि तु ।
औडुवानां तु विंशत्या सहितं शतमिष्यते ॥ ३७ ॥
चतुःस्वराणां [1]कूटानां चतुर्विंशतिरीरिताः ।
त्रिस्वरा· षड् द्विस्वरौ द्वावेकस्त्वेकस्वरो मतः ॥ ३८ ॥
आर्चिको गाथिकश्चाथ सामिको ऽथ स्वरान्तरः ।
एकस्वरादितानानां चतुर्णामभिधा इमा ॥ ३९ ॥
[2]उक्ताः शुद्धादिभेदेन निगयुक्ताश्चतुर्विधाः ।
तयोरेकैकहीनास्तु द्वेधा मूलक्रमा मता· ॥ ४० ॥

(क०) **स्युः षाडवानामिति** । अत्र षाडवत्व षट्स्वरवत्त्वमात्रेण विवक्षितम्, न तु प्रयोगापादनसमर्थषट्स्वरवत्त्वम् । औडुवानामित्यत्राप्येवमेव द्रष्टव्यम् ॥ **आर्चिक** इति । यज्ञप्रयोगेष्वृचामेकस्वराश्रयत्वात्, तत्संबन्धादार्चिक । तथा गाथासबन्धाद्गाथिको द्विस्वरः । सामसबन्धात्त्रिस्वरस्तान सामिक· । साम्ना तु त्रिस्वरत्व सप्तस्वरवत्त्वे ऽपि मन्द्रादिस्थानत्रयविवक्षया । चतु स्वरतानस्यैकस्वरादिसप्तविधतानमध्यवर्तित्वात्स्वरान्तर इति सज्ञा ॥ **उक्ताः शुद्धादिभेदेनेति** । अत्रादिशब्देन सकाकलिसान्तरतद्द्वयोपेता गृह्यन्ते ॥ ३७–४० ॥

(सु०) षाडवाना कूटतानाना क्रमे· सह सख्यामाह—**स्युः षाडवानामिति** । षाडवस्य क्रमस्य प्रस्तारे क्रियमाणे विशत्युत्तराणि सप्त शतानि (७२०) भेदाः सजायन्ते । औडुवाना प्रस्तारे प्रतिमूर्च्छन विशत्युत्तरशतम् (१२०) भेदा भवन्ति । चतुःस्वराणा प्रस्तारे चतुर्विंशितिर्भेदा भवन्ति । त्रिस्वराणा प्रस्तारे

[1] तानाना
[2] उक्तशुद्धादिभेदेन.

षड्जाद्यौ मध्यमाद्यौ च चत्वारः स्युर्द्विधा द्विधा ।
चतुर्धा ऽन्ये दशेत्यष्टाचत्वारिंशदमी क्रमाः ॥ ४१ ॥
सविंशतिः सप्तशती प्रागुक्ता गुणिता क्रमैः ।
चतुस्त्रिंशत्सहस्राणि षष्ट्या पञ्च शतानि च ॥ ४२ ॥

षड् (६) भेदा । द्विस्वराणा प्रस्तारे द्वौ (२) भेदौ । एकस्वरप्रस्तार एक (१) ॥ ३७, ३८ ॥ एकस्वरादितानाना नामविशेष कथयति—**आर्चिक** इति । एकस्वर आर्चिक इत्युच्यते । द्विस्वरो गाथिक. । त्रिस्वरः सामिक । चतु स्वरः स्वरान्तरः । पञ्चस्वरस्यौडुवत्व षट्स्वरस्य षाडवत्व च वक्ष्यति । सप्तस्वरः सपूर्ण', सप्तभ्यो ऽधिकस्वराभावात् । तथा चाह नारद —

'आर्चिको गाथिकश्चैव सामिकश्च स्वरान्तर' ।
औडुव षाडवश्चैव सपूर्णश्चैव सप्तम ॥
एकस्वरप्रयोगो हि आर्चिकस्त्वभिधीयते ।
गाथिको द्विस्वरो ज्ञेयस्त्रिस्वरश्चैव सामिक ॥
चतु स्वरप्रयोगो हि स्वरान्तरक उच्यते ।
औडुवः पञ्चभिश्चैव षाडव षट्स्वरो भवेत् ॥
सपूर्ण. सप्तभिश्चैव विज्ञेयो गीतयोक्तृभि ।'

इति ॥ ३९ ॥ एव षाडवादीना प्रतिक्रमं सख्यामुक्त्वा षाडवक्रमसख्याऽर्थमाह—उक्ताः शुद्धादिभेदेनेति । ग्रामद्वये चतुर्दश मूर्च्छना अन्त्यैकैकस्वरापकर्षेण यदा षाडवाः क्रियन्ते तदा निषादगाधारयुक्ता भेदाश्चतुर्विधा भवन्ति शुद्धाः काकली-कलिता सान्तरास्तद्द्वयोपेता इति । तयोर्निषादगाधारयोरेकैकहीनास्तु द्वेधा निषादहीनौ शुद्धौ सान्तरौ, गाधारहीनौ शुद्धौ काकलीकलितौ ॥ ४० ॥

(क०) **षड्जाद्यौ मध्यमाद्यौ चेति** । षड्जग्राम औत्तरमन्द्र क्रम षड्जाद्य , मध्यमग्रामे शौद्धमध्यम षड्जाद्य , एतौ षड्जाद्यौ । मध्यमग्रामे सौवीर क्रमो मध्यमाद्य , षड्जग्रामे मात्सरीकृत. क्रमो मध्यमाद्य , एतौ मध्यमाद्यौ । मिलित्वा चत्वारो द्विधा द्विधा स्यु प्रत्येकं द्विधा भवन्ति ,

इति षाडवसंख्या स्यादथ पञ्चस्वरान्ब्रुवे ।
गाद्यौ धाद्यौ निषादाद्यौ चतुर्भेदाः षडौडुवाः ॥ ४३ ॥
अष्टावन्ये द्विधेत्येवं चत्वारिंशदिमे क्रमाः ।
सविंशतौ शते तैश्च गुणिते ऽष्टौ शतानि तु ॥ ४४ ॥
चत्वारि च सहस्राणि संख्या पञ्चस्वरेष्विति ।
चतुःस्वरेषु न्याद्यौ द्वौ चतुर्धा द्वादशापरे ॥ ४५ ॥
क्रमा द्विधेति द्वात्रिंशच्चतुर्विंशतिताडिता ।
शतानि सप्ताष्टषष्ट्या स्याच्चतुःस्वरसंमितिः ॥ ४६ ॥
त्रिस्वरेषु तु माद्यौ द्वावभेदौ द्वादशापरे ।
द्विधा षड्विंशतिरिति क्रमास्ते षड्भिराहता ॥ ४७ ॥
षट्पञ्चाशच्छतं च स्युर्द्विस्वरेषु पुनर्द्विधा ।
रिगधन्यादयो ऽष्टौ स्युः शुद्धास्तदितरे क्रमाः ॥ ४८ ॥
द्वाविंशतिस्ते तु चतुश्चत्वारिंशद् द्विताडिता ।

निगयोरेकैकहीनत्वादित्यर्थ. । अन्ये दश चतुर्धेति । निगयुक्तत्वादित्यर्थ । गाद्यौ धाद्यावित्यादिष्वप्येव द्रष्टव्यम् ॥ ४१–४८- ॥

(सु०) चतुर्दशसु के चतुर्धा के च द्वेधेत्यपेक्षायामाह---षड्जाद्याविति । ग्रामद्वयमूर्च्छनासु षड्जाद्यौ द्वौ भेदौ निषादहीनत्वाद् द्विप्रकारौ शुद्धौ सान्तराविति । मध्यमाद्यौ च द्वौ भेदौ गाधारहीनत्वाद् द्विप्रकारौ शुद्धौ काकलीकलिताविति । अन्ये तु दश भेदाश्चतुर्धा शुद्धाः सान्तराः काकलीकलितास्तद्द्वयोपेता इति । एवमष्टाचत्वारिंशत् (४८) षाडवाः क्रमा भवन्ति । प्रतिक्रम च विंशत्युत्तराणि सप्त शतानि (७२०) । तान्यष्टाचत्वारिंशता गुणितानि चतुस्त्रिंशत्सहस्राणि षष्ट्यधिकानि पञ्च शतानि च (३४५६०) क्रमै सह षाडवकूटतानभेदा भवन्ति । पञ्चस्वरान्क्रमान्परिगणयति—गाद्याविति । ग्रामद्वये गाधाराद्यौ द्वौ भेदौ, धैवताद्यौ द्वौ, निषादाद्यौ द्वौ । एव षडौडुवाः पञ्चस्वरा भेदा निषादगा-

एकस्वरास्त्वभेदत्वान्मौला एव चतुर्दश ॥ ४९ ॥
षड्जादेः शुद्धमध्याया भेदकं पञ्चमं विना ।
चतु स्वरे क्रमद्वंद्वे ऽष्टाचत्वारिंशदीरिताः ॥ ५० ॥

धारयुक्तत्वाच्चतु.प्रकारा' । अन्ये ऽष्टौ भेदास्तु चत्वारो निषादहीनाश्चत्वारश्च गाधारहीना , तस्माद् द्विप्रकाराः । एव चत्वारिशत् (४०) औडुवा क्रमा' भवन्ति । प्रतिक्रम च विशत्युत्तर शतम् (१२०) भेदा भवन्ति । अतश्च विशत्युत्तरे शते चत्वारिशता गुणिते ऽष्टशताधिकानि चत्वारि सहस्राणि (४८००) पञ्चस्वरा कूटताना' क्रमै सह भवन्ति ॥ ४१–४४- ॥ चतुःस्वरान्क्रमान्परिगणयति—**चतु.स्वरेष्विति** । ग्रामद्वये चतुर्दशसु मूर्च्छनाभेदेषु मध्ये निषादाद्यौ द्वौ भेदौ चतु स्वरौ निषादगाधारयुक्तत्वाच्चतुर्धा । अपरे द्वादश भेदा एकैकयुक्तत्वाद् द्विधा । एव द्वात्रिशत् (३२) चतु.स्वरा' क्रमा भवन्ति । प्रतिक्रम चतुर्विशतिः (२४) भेदा । अतश्चतुर्विशत्या गुणिताया द्वात्रिशत्यष्टषष्ट्यधिकानि सप्त शतानि (७६८) चतु स्वरा कूटताना' क्रमै सह भवन्ति ॥ -४५, ४६ ॥ त्रिस्वरान्क्रमान्गणयति—**त्रिस्वरेष्विति** । त्रिस्वराणा चतुर्दशाना क्रमाणा मध्ये माद्यौ मध्यमाद्यौ द्वौ भेदौ निषादगाधारहीनत्वादभेदौ भेदशून्यौ । अपरे द्वादश भेदा निषादगाधारयोरैकैकयुक्तत्वाद् द्विप्रकारा । एव षड्विशति (२६) त्रिस्वरा क्रमा' सपद्यन्ते । प्रतिक्रम च षड् (६) भेदा' । ततश्च षड्भिर्गुणिताया षड्विशतौ षट्पञ्चाशदुत्तर शतम् (१५६) त्रिस्वरा कूटतानाः क्रमै सह भवन्ति । द्विस्वरान्क्रमान्परिगणयति—**द्विस्वरेष्विति** । ग्रामद्वये चतुर्दशाना द्विस्वराणा मध्य ऋषभाद्यौ द्वौ भेदौ, गाधाराद्यौ द्वौ, धैवताद्यौ द्वौ, निषादाद्यौ द्वौ । एवमष्टौ भेदा निषादगाधारयोरैकैकयुक्तत्वाद् द्विधा । अपरे तु षड् भेदा उभयहीनत्वाच्छुद्धा सान्तरत्वादिभेदहीनाः । एव द्विस्वरा द्वाविंशति (११) क्रमा भवन्ति । प्रतिक्रम च भेदद्वयम् (२) । अतश्च ते द्वाविशतिर्भेदा द्वाभ्या गुणिताया द्वाविशतौ चतुश्चत्वारिशद् (४४) द्विस्वरा कूटतानाः क्रमैः सह भवन्ति ॥ ४७–४८- ॥

(क०) **एकस्वरास्त्विति** । तुशब्दो द्विस्वरादिक्रमवैषम्यद्योतनार्थ. । वैषम्य चात्र काकल्यन्तरप्रयुक्तभेदराहित्यम् । अभेदत्वात्प्रस्तारप्रयुक्तभेदर-

तानास्त्रिस्वरयोस्त्वेते द्वादश द्विस्वरे द्वयम् ।
एक एकस्वरस्ते त्रिषष्टिरौत्तरमन्द्रकैः ॥ ५१ ॥
पुनरुक्ता मतास्तानैर्न्यादिमार्गीक्रमा पुनः ।
पञ्चस्वरा ये चत्वारस्तत्तानानां चतुःशती ॥ ५२ ॥
अशीत्यभ्यधिका चातुःस्वरी षण्णवतिर्भवेत् ।
द्वादश त्रिस्वरद्वंद्वे चत्वारो द्विस्वरद्वये ॥ ५३ ॥
एक एकस्वरस्तानस्तेषां पञ्चशती त्वियम् ।
त्रिनवत्या युता तानैरभिन्ना रजनीगतैः ॥ ५४ ॥

हितत्वात् । मौला मूले भवा , शुद्धा इत्यर्थ । चतुर्दशैव , अत्रान्ययोगव्यवच्छेदार्थमवधारणम् । अयमभिप्राय —यद्यपि निगयो काकल्यन्तरावस्थाऽऽपत्त्या मूर्च्छनाभेदकत्वं तथा ऽप्येकैकस्वरयोस्तयो स्वरान्तरयोगमन्तरेण स्वगतसूक्ष्मभेदस्यालक्ष्यमाणत्वाच्छुद्धयोरेव गणना, न काकल्यन्तरयोरिति । यदा पुन षड्जग्रामे मध्यस्थानस्थितषड्जस्थान एव निषादाद्यारम्भेण रजन्यादयो मूर्च्छना भवेयुरिति तथा मध्यमग्रामे मध्यस्थानस्थितमध्यमस्थान एव गाधाराद्यारम्भेण हारिणाश्वादयो मूर्च्छना भवेयुरिति च पक्षः, तदा ग्रामयोर्भेदकपञ्चमाभावे ऽपि मूर्च्छनाना स्थानभेदस्य विद्यमानत्वात्कूटतानपौनरुक्त्याभाव एव । यदा पुनर्ग्रामयोर्मूर्च्छनाना तदधोऽध स्थस्वरारम्भपक्षस्तदा तु मध्यमग्रामीणाना शुद्धमध्यामार्गीपौरवीगताना तानाना षड्जग्रामीणैरुत्तरमन्द्रारजन्युत्तरायतागतैर्यथायोगं षट्स्वरादिभिस्तानै सह स्थानभेदाभावाद्भेदकपञ्चमाभावेन पौनरुक्त्य निश्चित्य तत्र शुद्धाश्रयत्वेन प्रथमोक्तान्षाड्जग्रामिकान्गणनाया सस्थाप्य तदपेक्षया पुनरुक्तान्माध्यमग्रामिकानपनेतु तान्परिगणयति—**षड्जादेः शुद्धमध्याया** इत्यादिना ।

ननु शुद्धमध्याया इत्यनेनैव षड्जादित्वे सिद्धे षड्जादेरिति विशेषणं व्यर्थमिति चेत्, न, अशुद्धमध्याया प्रथमादिस्वरारम्भक्रमात्क्रमसप्तकवत्त्वेन तावत्येवोक्तक्रमविषय सदेह. स्यात्, तन्निवर्तकत्वेन विशेषणमर्थवदिति। एव न्यादिमार्गीत्यत्र धैवतादेस्तु पौरव्या इत्यत्राप्यवगन्तव्यम् ॥ -४९–५४ ॥

(सु०) एकस्वरास्तु भेदाभावाच्चतुर्दशैव भवन्तीत्याह—एकस्वरास्त्विति। एव क्रमै' पुनरुक्तैश्च सह लक्षत्रय द्वाविशतिः सहस्राणि पञ्च शतानि द्वयशीतिश्च (३२२५८२) भेदा भवन्ति। एतेषु पृथक्कर्तु पुनरुक्तान्कूटतानान्कथयति—षड्जादेरिति। मध्यमग्रामे चतुर्थी मूर्च्छना षड्जादि' शुद्धमध्या। तस्याश्चतु स्वर क्रमद्वय शुद्ध सान्तर च। तत्र ग्रामद्वयमूर्च्छनाना भेदक चतु.श्रुतिकत्वेन त्रिश्रुतिकत्वेन च द्विविध पञ्चम विना ऽष्टाचत्वारिशद्भेदा पुनरुक्ता ॥ -४९—५० ॥ त्रिस्वरयोस्तु द्वयो' क्रमयोः शुद्धसान्तरयोर्द्वादश भेदा' पुनरुक्ता.। द्विस्वरे निषादगाधारहीनत्वादेकस्मिन्ग्रामे भेदद्वय पुनरुक्तम्। एकस्वरस्त्वेक एव पुनरुक्त। एव शुद्धमध्यायास्त्रिषष्टिर्भेदाः। औत्तरमन्द्रकै' षड्जग्रामे प्रथममूर्च्छनोत्तरमन्द्रा षड्जादिभिरेव तत्सबन्धिभिः कूटतानैः सह पुनरुक्ता'। अन्यानपि पुनरुक्तान्गणयति—न्यादिमार्गीति। मध्यमग्रामे निषादादिर्हि पञ्चमी मूर्च्छना मार्गी। तस्या पञ्चस्वराश्चत्वारः क्रमा भवन्ति, निषादगाधारयुक्तत्वात्। तेषा भेदा अशीत्यभ्यधिक शतचतुष्टयम्। चतु स्वरसबन्धिनी चातु स्वरी षण्णवति'। कूटतानाना पुनरुक्ताश्चतु स्वरा अपि निषादगाधारयुक्तत्वाच्चत्वार क्रमा। प्रतिक्रम च चतुर्विंशतिर्भेदा। अत षण्णवते' पौनरुक्त्यम्। त्रिस्वर तु क्रमद्वयमेव, निषादयुक्तत्वात्। तत्र द्वादश भेदाः। द्विस्वर क्रमद्वय निषादयुक्तत्वात्। तस्य चत्वारो भेदा। एकस्वर एक एव। यद्यपि निषादस्य शुद्धत्वेन काकलीत्वेन च द्वैविध्य सभवति, तथा ऽप्येकस्वरस्य क्रमत्वेनानुपेयत्वान्न भेदादर। एव त्रिनवत्या युता पञ्चशती रजनीगतैस्तानैः सह पुनरुक्ताः। रजनी षड्जग्रामे द्वितीया मूर्च्छना निषादादिः ॥ ५१–५४ ॥

धैवतादेस्तु पौरव्याश्चत्वारः षट्स्वराः क्रमात् ।
तत्तानानां तु साशीतिः शताष्टाविंशतिर्मता ॥ ५५ ॥
औडुवानां चतुर्णां प्रागुक्ता संख्या चतुःस्वरौ ।
त्रिस्वरौ द्विस्वरावेकस्वरः प्रागुक्तसंख्यकाः ॥ ५६ ॥
पञ्चविंशतिसंयुक्ता चतुस्त्रिंशच्छती त्वियम् ।
तानानां सदृशाकारा स्यात्तानैरौत्तरायतैः ॥ ५७ ॥
इत्येकाशीतिसंयुक्तं सहस्राणां चतुष्टयम् ।
तानानां पुनरुक्तानां पूर्णापूर्णैः सह क्रमैः ॥ ५८ ॥

(क०) **धैवतादेस्तु पौरव्या** इति । अत्र धैवतस्य ग्रामभेदकत्वं नाशङ्कनीयम्, तस्योपलक्षणतया पूर्वमभेदकत्वप्रतिपादनात् ॥ ५५–५७ ॥

(सु०) पुनरपि पुनरुक्तान्गणयति—**धैवतादेरिति** । मध्यमग्रामे षष्ठी मूर्च्छना धैवतादिः पौरवी । तस्या निषादगाधारयुक्तत्वात्षट्स्वराश्चत्वारः क्रमा भवन्ति । प्रतिक्रम च सप्त शतानि विंशत्युत्तराणि । चतुर्णां क्रमाणामशीत्यभ्यधिकान्यष्टाविंशतिः शतानि भेदा पुनरुक्ता । सर्वत्र भेदक पञ्चम विनेत्यनुषङ्गो योज्यः । तस्या एव पौरव्या औडुवाः पञ्चस्वरा निषादगाधारयुक्तत्वाच्चत्वारः क्रमाः । तेषा प्रागुक्ता सख्या ऽशीत्यभ्यधिका चतुःशती । चतुःस्वरौ द्वौ क्रमौ निषादयुक्तत्वात् । तयोरष्टाचत्वारिंशद्भेदा भवन्ति । त्रिस्वरौ निषादयुक्तत्वाद् द्वौ क्रमौ । तयोर्द्वादश भेदाः । द्विस्वरावपि निषादयुक्तत्वाद् द्वौ क्रमौ । तयोश्चत्वारो भेदाः । एकस्वरस्त्वेक एव । एव पञ्चविंशतिसयुक्तानि चतुस्त्रिंशच्छतानि सदृशाकाराणि पुनरुक्तानि भवन्ति । कैः सह पौनरुक्त्यम्? अत आह—**औत्तरायतैरिति** । उत्तरायता षड्जग्रामे तृतीया मूर्च्छना धैवतादिः । तत्सबन्धिभिः कूटतानैः सह पौनरुक्त्यमित्यर्थः ॥ ५५—५७ ॥

(क०) **पूर्णापूर्णैः सह क्रमैरिति** । तत्र पूर्णाः क्रमा प्रथमादिस्वरारम्भादित्यादिना लक्षणेन निष्पन्ना द्वानवतियुतशतत्रयसंख्याका ।

अपनीयेत चेदेषा कूटतानमितिर्भवेत् ।
लक्षत्रयं सप्तदश सहस्राणि शतानि च ॥ ५९ ॥
नवत्रिंशद्युतानीति ज्ञानोपायो ऽत्र कथ्यते ।

अपूर्णा द्व्यशीत्युत्तरशतसख्याका । उभये चतु·सप्तत्यधिकपञ्चशतसंख्याका । नन्वेतै क्रमैः सहिते पुनरुक्ततानानामेकाशीतियुक्तसहस्रचतुष्टये द्व्यशीत्युत्तर-पञ्चशताधिकद्वाविंशतिसहस्रसहितलक्षत्रयमितात्तानराशेरपनीते सत्यवशिष्टकूट-तानसख्या लक्षत्रयं सप्तदश सहस्राणि नव शतानि सप्तविंशतिश्चेति दृश्यते । अत्र त्रिंशद्युतानीति कथमुपपद्यत इति चेत्, ब्रूम —अत्रैकस्वरतानाना चतुर्दशाना मध्ये शुद्धमध्यामार्गीपौरवीगतेषु त्रिष्वेकस्वरतानेषु पुनरुक्तत्वेना-पनीतेष्वेकादशैवेतरेष्वेषा क्रमत्वाभावे ऽपि कूटतानत्वाभावादपनेयत्वेन क्रम-राशौ निवेशिता, त्रयस्तु न निवेशिता इति तै सह त्रिंशद्युतानीत्युपपद्यत इति । एव तर्हि शुद्धमध्याऽऽदिष्वेव द्विस्वरादिष्वेकत्रिंशत्क्रमेषु पुनरुक्त-तानत्वेनापनीतेषु तेषामपि क्रमराशावननुप्रवेशादेकषष्टियुक्तानीति पठितव्य स्यादिति चेत्, सत्यम् । अत्रोच्यते— पुनरुक्ततानत्वाकारेणापनीतानामपि तेषा क्रमत्वसंभवात्क्रमराशावनुप्रविष्टाना क्रमत्वप्रयुक्त्या ऽपि पुनरपनेय-त्वमाकारद्वयवशाद् बृहस्पतिसवानुष्ठानवदुपपद्यते । यथैकस्यापि बृहस्पतिसव-स्याश्वमेधाङ्गत्वेन प्राधान्येन चानुष्ठेयत्वम्, लोके च यथैकस्यापि देवदत्तस्य पाठकत्वपाचकत्वोपाधिवशाद्भेदेन परिगणनात्कार्यान्तरान्वय, तद्वत्त्रयाणामेक-स्वराणामनुक्रमत्वाभावेनाकारद्वयासंभवान्न पुनरपनेयत्वम्, द्विस्वरादीनामेक-त्रिंशत्तानानामाकारद्वयसंभवात्पुनरपनेयत्वमेव, अन्यथा तु दोष स्यादिति मत्वा त्रिंशद्युतानीति सुष्ठूक्तं नि शङ्कशार्ङ्गदेवेन । ये तु मन्यन्ते—

'त्यक्ताना न सकृत्त्याग कथमप्युपपद्यते' इति निर्णीय,

'सहस्रै सप्तदशभिर्युतं लक्षत्रयं तथा ।
शतानि नव षष्टिश्च सैका कूटा समासते ॥'

इति. ते प्रष्टव्या ---अथैकत्रिंशत्तानाना सकृत्त्याग· पुनरुक्तत्वेन वा क्रमत्वेन वा? यदि पुनरुक्तत्वेनैव त्यज्येरंस्तदा तेषा क्रमत्वेन त्याज्येष्व-परिगणनात्केवलकूटतानपरिगणनावसरे क्रमाणामपि ग्रहणात् 'कूटा· समा-सते' इति वदता व्याहति स्यात्। कि च तेषा पुनरुक्ताकारवत्तया च पुनरुक्तपरित्यागो ऽपि साकल्येन न कृत स्यात्। अथ क्रमत्वेनैव परित्यागस्तदा पुनरुक्तत्वेन त्याज्येष्वपरिगणनादपुनरुक्तकूटतानेयत्ताऽभि-धानावसरे पुनरुक्तानामपि तेषा ग्रहणात् 'त्रिषष्टि परिकीर्तिता' इत्या-दिना शुद्धमध्याऽऽदिषु क्रमै सह पुनरुक्तान्परिगणयता व्याहति स्यात्। तेषा क्रमाकारवत्तया च क्रमत्यागो ऽपि साकल्येन न कृत स्यादिति तत्रभवता मीमासामासलितधियाम् 'षष्टिश्च सैका कूटा' इति महदिद ग्रन्थनिर्माणकौशलम्!

संगीतरत्नाकरभावबोद्धा श्रीकल्लिनाथ सुधिया मतेन ।
अपौनरुक्त्यात्क्रमकूटतानसख्याविरोधं त्विह पर्यहार्षीत् ॥
५८–५९- ॥

(सु०) एव शुद्धमध्यामार्गीपौरवीणा पुनरुक्तान्कूटतानान्मिलितान्परिगण-यति—इत्येकाशीतीति। एव पुनरुक्ताना तानाना सहस्रचतुष्टयमेकाशीत्यधिक भवति। पुनरुक्तकूटतानापनयने पूर्णापूर्णक्रमापनयने च निष्कृष्टा कूटतानसख्या कथयति—लक्षत्रयमिति। पूर्णाः क्रमा द्वानवत्यधिक शतत्रयम्। षाडवा अष्टा-चत्वारिशत्। औडुवाश्चत्वारिशत्। चतुःस्वरा द्वात्रिशत्। त्रिस्वराः षड्वि-शति। द्विस्वरा द्वाविशतिः। एकस्वरा एकादश। यद्यप्येकस्वराश्चतुर्दश, तथा ऽपि षड्जनिषादधैवताना पुनरुक्तमध्ये ऽपनीतत्वादवशिष्टा एकादशैव गण्यन्ते।

अङ्कानेकादिसप्तान्तानूर्ध्वमूर्ध्वं लिखेत्क्रमात् ॥ ६० ॥
हते पूर्वेण पूर्वेण तेषु चाङ्के परे परे ।
एकस्वरादिसंख्या स्यात्क्रमेण प्रतिमूर्च्छनम् ॥ ६१ ॥

एवमेकसप्तत्यधिकानि पञ्च शतानि क्रमा भवन्ति । पुनरुक्ताश्चैकाशीत्यधिक सहस्र-चतुष्टयम् । एतेषामैक्ये चत्वारि सहस्राणि षट् शतानि द्वापञ्चाशत् (४६५२) । क्रमपुनरुक्तसहितकूटतानसख्या तु लक्षत्रय द्वाविशति' सहस्राणि पञ्च शतानि द्वयशीतिश्च (३२२५८२) । क्रमपुनरुक्तापनयने तु लक्षत्रय सप्तदश सहस्राणि नव शतानि त्रिशच्च (३१७९३०) पूर्णापूर्णा कूटताना सपन्ना' । ननु यथा पञ्चमो ग्रामद्वये भेदकश्चतुःश्रुतिकत्वात्त्रिश्रुतिकत्वाच्च, तथा त्रिश्रुतिकत्वाच्चतु-श्रुतिकत्वाच्च धैवतः कथ भेदको न भवति? ब्रूमः—यद्यपि धैवत षड्जग्रामे त्रिश्रुतिर्मध्यमग्रामे च चतुःश्रुति, तथा ऽपि स्वस्थान न परित्यजति, केवल तु मध्यमग्रामे पञ्चमान्त्यश्रुतिग्रहणमात्रम् । ततश्च यदा पञ्चमसहचरितो धैवत उच्चार्यते तदैव तस्य विकृतत्वप्रतीतिर्नान्यदेति न किचिदेतत् । कूटतानाना बहुत्वात्स्वरूपपरिज्ञानं दुःसपादमिति लाघवेन परिज्ञानोपाय वक्तु प्रतिजा-नीते—ज्ञानोपाय इति ॥ ५८–५९- ॥

(क०) परिगणितपूर्णापूर्णतानसंख्यापरिज्ञानोपायमाह — **अङ्कानेकादिसप्तान्तानिति** । तेषु सप्तस्वङ्केषु परे परे द्व्यङ्कादौ पूर्वेण पूर्वेणैकाङ्का-दिना हते गुणिते सति । अयमर्थ —प्रथम पूर्वेणैकाङ्केन परे द्व्यङ्के गुणिते द्विसख्या जायते । ततो जातं द्विसंख्याऽङ्कं पूर्व कृत्वा तेन परे त्र्यङ्के गुणिते षट्सख्या जायते । षट्सख्यया परे चतुरङ्के गुणिते चतुर्विशतिसख्या जायते । तया परे पञ्चाङ्के गुणिते विशत्युत्तरशतसख्या जायते । तया परे षडङ्के गुणिते सविशति सप्तशती जायते । तया परे सप्ताङ्के गुणिते चत्वारिंशदुत्तरपञ्चसहस्रसख्या जायते । एवमुक्तरीत्या गुणितव्यम् । एव कृते

क्रमं न्यस्य स्वरः स्थाप्यः पूर्वः पूर्वः परादधः ।
स चेदुपरि तत्पूर्वः पुरस्तूपरिवर्तिनः ॥ ६२ ॥
मूलक्रमक्रमात्पृष्ठे शेषाः प्रस्तार ईदृशः ।

सति प्रतिमूर्च्छनं क्रमेणैकस्वरादिसंख्या स्यात्, एकस्वरादितानानां संख्या भवेत् ॥ -६०, ६१ ॥

(सु०) सख्यापरिज्ञानोपाय कथयति—**अङ्कानिति** । एकादिसप्तान्तानङ्कानूर्ध्वमूर्ध्व लिखेत् । प्रथममेकाङ्को लेखनीयः, तस्योर्ध्वप्रदेशे द्व्यङ्क., ततस्त्र्यङ्कः, ततश्चतुरङ्क', ततः पञ्चाङ्क', ततः षडङ्क', ततः सप्ताङ्क इति । ततः परे परे तूर्ध्वस्थे ऽङ्के पूर्वेणाधःस्थितेनाङ्केन हते गुणिते सति प्रतिमूर्च्छनमेकस्वरद्विस्वरादिसंख्या स्यात् । एकेन द्व्यङ्के गुणिते द्वावेव, 'एकेन गुणित तदेव भवति' इति न्यायात् । द्वाभ्या त्र्यङ्के गुणिते षट् । षड्भिश्चतुरङ्के गुणिते चतुर्विंशति । चतुर्विंशत्या पञ्चाङ्के गुणिते विंशत्युत्तर शतम् । विंशत्युत्तरेण शतेन षडङ्के गुणिते विंशत्युत्तरा सप्तशती । विंशत्युत्तरया सप्तशत्या सप्ताङ्के गुणिते पञ्च सहस्राणि चत्वारिंशदुत्तराणि भवन्ति । एषैवैकस्वरादिसख्या ॥ -६०–६१ ॥

(क०) उक्तसंख्यानिदर्शनार्थमुद्देशक्रमेण प्रस्तारं लक्षयति—**क्रमं न्यस्येति** । क्रमं षष्ट्युत्तरपञ्चशतसंख्यया परिगणितेषु पूर्णापूर्णक्रमेष्वन्यतमं न्यस्य लिखित्वा पूर्व पूर्व. स्वर परादधः स्थाप्य इति । उत्तरमन्द्राया तावत् सरिगमेति चतु.स्वर क्रम लिखित्वा तस्मिन्क्रमे पूर्व' षड्ज. परादृषभादधः स्थाप्य. । अत्र पूर्व पूर्व इति वीप्सा ऽऽ प्रस्तारपरिसमाप्ते' प्रतितानं सकृत्करणविषया ऽवगन्तव्या नैकतानविषया । एकतानविषयत्वे तु पुरस्तूपरिवर्तिन इत्यस्य क्वचिदपि न संभव । तेन परिगणिततानभेदा अपि न संभवेयुः । तस्मादेकवारमेव पूर्वः स्वरः परादधः स्थाप्यः । स चेदुपरि

तत्पूर्व इत्यस्य लक्षणाशस्य नायं विषय । **पुरस्त्विति** । लिखितस्वरापेक्षया तत्पङ्क्तौ क्रमेण लेखनोचिते देशे लिखितो यस्तस्य दक्षिणभाग इत्यर्थः । उपरिवर्तिन· पुरोदेशस्योर्ध्वपङ्क्तिस्थिता स्थाप्या इत्यूह्यम् । अनेनात्र षड्जानन्तरं गमौ स्थाप्यौ । पृष्ठे प्रथममधोलिखितस्वरस्य पश्चाद्देशे लिखितो यस्तस्य वामभाग इत्यर्थ· । शेषा क्रमापेक्षया लिखितेभ्यो ऽवशिष्टाः स्वराः, मूलक्रमक्रमात्, मूलक्रम , उत्तरमन्द्राया क्रमेण षड्जादिसप्त-स्वराद्या. क्रमा सप्त, तत्र षड्जाद्य क्रमो मूलक्रम , तस्मिन्स्वराणा य क्रमो व्यवहितत्वेनाव्यवहितत्वेन वा तस्मात्, स्थाप्या इति शेषः । शेषा इति बहुवचनं संभवद्विषयम् । अनेनात्रावशिष्ट ऋषभ पृष्ठे लिख्यते । एवं च सति रिसगमेति प्रथम कूटतान. प्रस्तारे निष्पद्यते । अथास्मिस्ताने यद्यप्यृषभात्षड्ज पूर्वस्तथा ऽपि स चेदुपरि, स पूर्व उपरि चेदुपरितन्यामेव पङ्क्तावुत्तरत्र वर्तते चेत्, तदा तत्पूर्व उपरि वर्तमानात्पूर्व स्थाप्य इति । अत्रोपरि वर्तमानात्षड्जादस्मिन्क्रमे पूर्वाभावादेवर्षभषड्जयोरधः स्थाप्यौ न संभवतः । गाधारस्याधस्तान्मूलक्रमापेक्षयर्षभस्य पूर्वत्वात्तस्योपरि वर्तमान-त्वाभावाच्चर्षभ· स्थाप्य. । पुरस्तूपरिवर्तिन इत्यृषभानन्तरं मध्यम स्थाप्य । अत्रापि बहुवचनं सभवद्विषयम् । मूलक्रमक्रमादिति पृष्ठे षड्जगाधारौ स्थाप्यौ । तदा सगरिमेति द्वितीय· कूटतान. । एवं मूलक्रमावरोहावधि प्रस्तारे क्रियमाणे तत्तत्क्रमोक्तसंख्याकाः कूटताना उत्पद्यन्ते । ततः प्रस्तार एव न संभवति ॥ ६२, ६३- ॥

(सु०) सप्तस्वरक्रमरूपपरिज्ञानार्थं प्रस्तार कथयति—क्रमं न्यस्येति । क्रम प्रथमतो न्यस्य स्थापयित्वा । सरिगमपधनीति क्रमः । क्रमापेक्षया पूर्व. पूर्वः स्वरः परादधो ऽधः स्थापनीयः । पूर्वः पूर्व इति वीप्सया लभ्यमर्थं विशदयति—स चेदिति । स पूर्वः स्वर उपरिभागे वर्तते चेत्तदा तस्यापि पूर्वः स्वरो लेखनीयः । सो ऽपि चेदग्रे वर्तते तदा तत्पूर्वः । सो ऽपि चेत्परवर्ती

तदा तस्यापि पूर्वः। एव निषादमारभ्य षड्जपर्यन्त विचारणीयम्। तत्रापि षड्जपर्यन्ता. स्वराः पुरस्तात्तिष्ठन्ति चेत्त स्वर विहाय द्वितीये स्वरे प्रस्तारश्चिन्तनीयः। तत्रापि षड्जपर्यन्ता स्वरा पुरस्तात्तिष्ठन्ति चेत्तदा ऽन्यस्मिन्स्वरे प्रस्तारश्चिन्तनीय'। एव विचार्य पूर्वस्मिन्स्वरे दत्ते, उपरिवर्तिन स्वराः सन्ति चेत्पुर प्रदेशे त एव देयाः। शेषा अवशिष्टा. स्वरा मूलक्रमक्रमेण पृष्ठे पूर्वप्रदेशे देयाः। अवशिष्टेषु स्वरेषु मूलक्रमेण यः पूर्व स पूर्व देयः। यस्तु ततो ऽनन्तरः स तदनन्तर देय.। ईदृशो ऽय प्रस्तारो बोद्धव्यः। तत्र दृष्टान्तार्थं चतुःस्वरः प्रस्तारः प्रदर्श्यते—सरिगमेति पूर्व क्रम' सस्थाप्य। षड्जस्याधस्तात्पूर्वस्वराभावात्स्वरो न स्थाप्यते। ऋषभस्य त्वधस्तात्तत्पूर्व' षड्जो देय'। उपरिगौ गाधारमध्यमौ पुरो देयौ। अवशिष्ट ऋषभः पश्चाद्देय। एवं रिसगमेति द्वितीयो भेदः। तत ऋषभस्याधस्तात्षड्जो देयत्वेनासीत्। स चोपर्यग्रे वर्तते। तेनर्षभान्न प्रस्तार। षड्जस्य पूर्वस्वराभावात्ततो ऽपि न प्रस्तारः। तेन गाधारस्याधस्तादृषभो देयः। पुरस्तूपरिवर्ती मध्यमो देय'। पूर्वशून्यक्रमे मूलक्रमात्षड्जगाधारौ देयौ। ततः सगरिमेति तृतीयो भेदः। ततो ऽनन्तरं गाधारस्याधस्तात्पूर्वमृषभो देयो भवति। पर तु स पुरस्ताद्विद्यते। तस्य पूर्व' षड्जो देय'। पुरो रिमौ पश्चाद्ग'। एव गसरिमेति चतुर्थो भेद। तत ऋषभस्याधस्तात्षड्जो देय'। पुरो म। पश्चाद्रिगौ। एव रिगसमेति पञ्चमो भेदः। ततो ऽनन्तर गाधारस्याधस्तादृषभ'। पुरः समौ। पश्चाद्ग'। एव गरिसमेति षष्ठो भेदः। ततो मध्यमस्याधस्ताद्गाधार। पश्चात्सरिमाः। एव सरिमगेति सप्तमो भेदः। तत ऋषभस्याधस्तात्षड्जः। पुरो मगौ। पश्चाद्रिः। एव रिसमगेत्यष्टमो भेदः। ततो मध्यमस्याधस्तादृषभः। पुरो गः। पश्चात्समौ। एव समरिगेति नवमो भेदः। ततो मध्यमस्याधस्तात्षड्जः। पुरो रिगौ। पश्चान्म। एवं मसरिगेति दशमो भेदः। तत ऋषभस्याधस्तात्षड्ज.। पुरो गः। पश्चाद्रिमौ। एव रिमसगेत्येकादशो भेद.। ततो मध्यमस्याधस्तादृषभः। पुर' सगौ। पश्चान्म'। एव मरिसगेति द्वादशो भेद'। ततो गाधारस्याधरतादृषभः। पश्चात्सगमा। एव सगमरीति त्रयोदशो भेदः। ततो गाधारस्याधस्तात्षड्जः। पुरो मरी। पश्चाद्गः। एव गसमरीति चतुर्दशो भेद'। ततो मध्यमस्याधस्ताद्गाधारः। पुरो रिः। पश्चात्समौ। एव समगरीति पञ्च-

सप्ताद्येकान्तकोष्ठानामधो ऽधः सप्त पङ्क्तयः ॥ ६३ ॥

दशो भेद । ततो मध्यमस्याधस्तात्षड्ज' । पुरो गरी । पश्चान्म. । एव मसगरीति षोडशो भेद । ततो गाधारस्याधस्तात्षड्ज । पुरो रिः । पश्चाद्गमौ । एव गमसरीति सप्तदशो भेद । ततो मध्यमस्याधस्ताद्गाधार' । पुर' सरी । पश्चान्म । एव मगसरीत्यष्टादशो भेद. । तत ऋषभस्याधस्तात्षड्जः । पश्चाद्रिगमा । एव रिगमसेत्यूनविशतितमो भेद. । ततो गाधारस्याधस्तादृषभ' । पुरो मसौ । पश्चाद्गः । एव गरिमसेति विशतितमो भेद । ततो मध्यमस्याधस्ताद्गाधारः । पुर सः । पश्चाद्रिमौ । एव रिमगसेत्येकविशतितमो भेद । ततो मध्यमस्याधस्तादृषभ । पुरो गसौ । पश्चान्मः । एव मरिगसेति द्वाविशतितमो भेदः । ततो गाधारस्याधस्तादृषभ । पुरः सः । पश्चाद्गमौ । एव गमरिसेति त्रयोविशतितमो भेद' । ततो मध्यमस्याधस्ताद्गाधार । पुरो रिसौ । पश्चान्मः । एव मगरिसेति चतुर्विशतितमो भेद' । ततो विपरीतक्रमसद्भावात्प्रस्तारलक्षणाभावाच्च प्रस्तारो नास्ति । अनेनैव प्रकारेण पञ्चस्वरादिषु प्रस्तार. कर्तव्य. । तत्र सरिगमपेति पञ्चस्वरप्रस्तारे पान्ताश्चतुर्विशतिः । ततो मान्ताश्चतुर्विशतिः । ततो गान्ताश्चतुर्विशति' । ततो र्यन्ताश्चतुर्विशति । ततः सान्ताश्चतुर्विशति' । एव पञ्चस्वरप्रस्तारे विशत्युत्तर शत भेदा भवन्ति । सरिगमपधेति षट्स्वरप्रस्तारे धान्ता विशत्युत्तर शतम् । पान्ताश्च विशत्युत्तर शतम् । मान्ताश्च विशत्युत्तर शतम् । गान्ताश्च विशत्युत्तर शतम् । र्यन्ताश्च विशत्युत्तर शतम् । सान्ताश्च विशत्युत्तर शतम् । एव विशत्युत्तराणि सप्त शतानि षट्स्वरभेदा भवन्ति । सरिगमपधनीति सप्तस्वरप्रस्तारे तु निषादान्ता विशत्युत्तराणि सप्त शतानि । ततो धान्ता विशत्युत्तराणि सप्त शतानि । ततः पान्तास्तावन्ति । ततो मान्तास्तावन्ति । ततो गान्तास्तावन्ति । तत ऋषभान्तास्तावन्ति । ततः सान्तास्तावन्ति । एव सप्तस्वरप्रस्तारे चत्वारिशदुत्तराणि पञ्च सहस्राणि भेदा भवन्ति ॥ ६२, ६३- ॥

(क०) एवं प्रस्तुतेषु कूटेषु नष्टोद्दिष्टतानबोधार्थं खण्डमेरुं लक्षयति— **सप्तादीति** । सप्ताद्येकान्तकोष्ठानाम्, सप्तादयो येषा ते सप्तादय ,

तास्वाद्यायामाद्यकोष्ठे लिखेदेकं परेषु खम् ।
वेद्यतानस्वरमितान्न्यस्येत्तेष्वेव लोष्टकान् ॥ ६४ ॥

एको ऽन्तो येषा त एकान्ता इति तद्गुणसविज्ञानो बहुव्रीहिः । सप्तादयश्च त एकान्ताश्च कोष्ठा इति तत कर्मधारय· । तेषा सप्त पङ्क्तयो ऽधो ऽध· क्रमेण लेखनीया इति शेष· । अयमर्थ —आदौ सप्तकोष्ठान्विता तिर्यक्पङ्क्ति लिखेत् । तदधोऽध आदिमैकैककोष्ठह्रासात्क्रमेण षट् पङ्क्ती-र्लिखेत् । तदा सप्ताद्येकान्तकोष्ठाना सप्त तिर्यक्पङ्क्तयो भवन्ति । अत्रैव चैकादिसप्तान्तकोष्ठानामूर्ध्वाध स्थिता· पङ्क्तयश्च सप्त दृश्यन्ते । तासु तिर्यक्पङ्क्तिष्वाद्याया सप्तकोष्ठाया पङ्क्तावाद्यकोष्ठ एकमेकसंख्याऽङ्क लिखेत् । परेषु द्वितीयादिषु तत्पङ्क्तिकोष्ठेषु ख शून्याङ्कम्, बिन्दु-मित्यर्थ । खमिति जातावेकवचनम् । तेष्वेवाद्यपङ्क्तिकोष्ठेष्वेव वेद्यतान-स्वरमितान्, नष्टत्वेन वोद्दिष्टत्वेन वा जिज्ञास्यो वेद्य, तस्य तानस्य यावन्त· स्वरास्तैर्मितास्तत्समसख्याकान् । लोष्टकानिति चालनोचितद्रव्योप-लक्षणम् ॥ -६३, ६४ ॥

(सु०) एवं प्रस्तारमुक्त्वा प्रस्तारणे ऽप्यशक्तस्य लघूपायेन भेदपरि-ज्ञानार्थं नष्टोद्दिष्टे विवक्षुस्तदुपायभूत खण्डमेरु कथयति—सप्ताद्येकान्तेति । सप्त पङ्क्तयो ऽधोऽधस्तात्स्थापनीयाः । कियता कोष्ठकानामित्यपेक्षायामाह—सप्ताद्ये-कान्तकोष्ठानामधो ऽधः सप्त पङ्क्तयः स्थाप्याः । उत्कृष्टापकृष्टसख्याकथने-नार्थतो मध्यसख्यासिद्धि. । ततश्च सप्तकोष्ठिका प्रथमा पङ्क्तिः कर्तव्या । द्वितीया तस्या अधस्तात्षट्कोष्ठिका । तृतीया तस्या अधस्तात्पञ्चकोष्ठिका । चतुर्थी तस्या अधस्ताच्चतुःकोष्ठिका । पञ्चमी तस्या अधस्तात्त्रिकोष्ठिका । षष्ठी तस्या अधस्ताद् द्विकोष्ठिका । सप्तमी तस्या अधस्तादेककोष्ठिका । एव खण्डमेरुसंस्थान-मुक्त्वा ऽङ्कनिवेशनार्थमाह—तास्वाद्यायामिति । तासु सप्तसु पङ्क्तिषु मध्य आद्याया सप्तकोष्ठिकाया पङ्क्तावाद्यकोष्ठ एकाङ्कं लिखेन्निवेशयेत् । परेषु कोष्ठेषु

प्राक्पङ्क्त्यन्त्याङ्कसंयोगमूर्ध्वाधःस्थितपङ्क्तिषु ।
शून्यादधो लिखेदेकं तं चाधो ऽधः स्वकोष्ठकान् ॥ ६५ ॥
कोष्ठसंख्यागुणं न्यस्येत्खण्डमेरुरयं मतः ।

ख शून्य लिखेत् । तेष्वेव प्रथमपङ्क्तिकोष्ठकेषु लोष्टकान्कर्करान्न्यस्येत्स्थापयेत् । कियतो लोष्टकान्? वेद्यतानस्वरमितान्, वेद्यो यस्तानस्त्रिस्वरश्चतुःस्वरः पञ्चस्वरः षट्स्वरः सप्तस्वरो वा तत्स्वरसख्याकान् । यदि त्रिस्वरो जिज्ञासितस्तदा ऽऽदित आरभ्य त्रिषु कोष्ठकेषु त्रीँल्लोष्टकान्न्यस्येत् । यदि चतुःस्वरो जिज्ञासितस्तदा ऽऽदित आरभ्य चतुर्षु कोष्ठकेषु चतुरो लोष्टकान्न्यस्येत् । यदि पञ्चस्वरो जिज्ञासितस्तदा पञ्चेत्यादि द्रष्टव्यम् । लोष्टन्यसनोपयोगमनुपदमेव वक्ष्यति ॥ ६३, ६४ ॥

(क०) ऊर्ध्वाध.स्थितपङ्क्तिषूर्ध्वाध स्थितकोष्ठाना पङ्क्तिषु । अत्र स्थितेति विशेषणपदस्य विशेष्यकोष्ठपदसापेक्षत्वेन समास । प्राक्पङ्क्त्यन्त्याङ्कसंयोगम्, प्राक्पङ्क्ते. प्राक्पङ्क्त्यो प्राक्पङ्क्तीना वा यथासंभवमन्त्याङ्कस्यान्त्याङ्कयोरन्त्याङ्काना वा संयोगम्, संयोगोत्पन्नमङ्कान्तरमित्यर्थ. । संनिहितपरपङ्क्तौ शून्याद् बिन्द्वाक्रान्तकोष्ठादध.कोष्ठे लिखेत् । एतदुक्तं भवति—द्वितीयपङ्क्तौ प्राक्पङ्क्त्यन्त्याङ्कस्यैकत्वेन संयोगस्याभावादेकाङ्कमेव लिखेत् । तृतीयपङ्क्तौ तु प्राक्पङ्क्त्योरन्त्याङ्कयो संभवेन तत्संयोगोत्पन्न द्व्यङ्कं शून्यादधो लिखेदिति । तं च द्व्यङ्कादिक च स्वकोष्ठकात्स्वेनाधिष्ठितं कोष्ठमारभ्याधो ऽध , कोष्ठसंख्यागुणम्, कोष्ठयो· कोष्ठाना वा संख्या कोष्ठसंख्या, तस्या गुणो यस्मिन्कर्मणीति क्रियाविशेषणम् । अयमर्थः—तृतीयपङ्क्तौ द्व्यङ्काधिष्ठितकोष्ठेन सहाध.कोष्ठस्य द्वितीयस्य सभवात्तत्र द्व्यङ्कं द्विगुणीकृत्य चतुरङ्कं लिखेत् । चतुर्थपङ्क्तावपि प्राक्पङ्क्तीनामन्त्याङ्काना संयोगिनां षडङ्कं तत्र शून्यादधो लिखेत् । ततः सनिहिताधः-

कोष्ठे त कोष्ठसंख्यया द्विगुणीकृत्य द्वादशाङ्कं लिखेत् । ततो ऽप्यध कोष्ठे त षडङ्कमेव कोष्ठसंख्यया त्रिगुणीकृत्याष्टादशाङ्कं लिखेत् । एवं पञ्चम्यादिषु पङ्क्तिषु प्राक्पङ्क्त्यन्त्याङ्कसंयोगादिप्रकारेण लिखेदिति ॥ ६५, ६५- ॥

(सु०) द्वितीयपङ्क्तावङ्कविन्यास कथयति—प्राक्पङ्क्तीति । ऊर्ध्वाध.-स्थितपङ्क्तिष्वध·स्थिता या. पङ्क्तयस्तासु प्राक्पङ्क्त्यन्त्याङ्कसयोग लिखेत् । यद्येका प्राक्पङ्क्तिस्तर्हि तस्या अन्त्याङ्को लेख्य. । यदि प्राक्पङ्क्ती द्वे तदा तयोः सयोगो लेख्य· । यदि बह्व्य· प्राक्पङ्क्तयस्तदा तासा सयोगो लेख्य । क्व लेख्य इत्यपेक्षायामाह—शून्यादध इति । त चान्त्याङ्कसयोगरूपमङ्क स्वकोष्ठकात्, यत्रासावङ्क स्थापितस्तत्स्वकोष्ठकम्, तस्मादधो ऽधो ऽधराधरकोष्ठकेषु कोष्ठ-सख्यागुणितं न्यस्येत् । द्वितीयकोष्ठके द्विगुण तृतीयकोष्ठके त्रिगुण चतुर्थकोष्ठके चतुर्गुण पञ्चमकोष्ठके पञ्चगुण षष्ठकोष्ठके षड्गुणमिति । ततश्च षट्कोष्ठिकाया द्वितीयपङ्क्तेः प्रथमकोष्ठे प्राक्पङ्क्तेरेकस्या अन्त्याङ्क एकाङ्को देय· । अध· कोष्ठा-भावाद् द्वैगुण्यादि नास्ति । तस्या एव पङ्क्तेर्द्वितीयकोष्ठे द्वयोः प्राक्पङ्क्त्योरन्त्याङ्क एक एकश्च, अनयो सयोगे द्व्यङ्को देय· । तस्याध कोष्ठके तमङ्क द्विगुण चतुरङ्क दद्यात् । तृतीयकोष्ठके प्राक्पङ्क्तयस्तिस्र· । तासामन्त्याङ्का एक एकश्चत्वार· । तेषा सयोगात्षडङ्को देय· । द्वितीयाध कोष्ठके द्विगुणः षड् द्वादशाङ्को देयः । तदध -कोष्ठके त्रिगुणः षडष्टादशाङ्को देय· । द्वितीयपङ्क्तिचतुर्थकोष्ठके प्राक्पङ्क्तयश्च-तस्रः । तासामन्त्याङ्का एक एकश्चत्वारो ऽष्टादश । तेषा सयोगे चतुर्विंशतिर्देया । तदधो द्वितीयकोष्ठके द्विगुणा ऽष्टाचत्वारिंशत् । तदधस्तृतीयकोष्ठके त्रिगुणा द्वासप्तति । तदधश्चतुर्थकोष्ठके चतुर्गुणा षण्णवतिः । द्वितीयपङ्क्तिपञ्चमकोष्ठके प्राक्पङ्क्तयः पञ्च । तासामन्त्याङ्का एक एकश्चत्वारो ऽष्टादश षण्णवतिः । तेषा सयोगे विंशत्युत्तर शत देयम् । तदधो द्वितीयकोष्ठके द्विगुण चत्वारिंशदधिक शतद्वय देयम् । तृतीयकोष्ठके त्रिगुण षष्ट्यधिक शतत्रयम् । चतुर्थकोष्ठके चतुर्गुण-मशीत्यधिक शतचतुष्टयम् । अध कोष्ठके पञ्चमे पञ्चगुण षट्शती । द्वितीय-पङ्क्ते. षष्ठकोष्ठे प्राक्पङ्क्तयः षट् । तासामन्त्याङ्का एक एकश्चत्वारो ऽष्टादश षण्णवति· षट्शती । तेषा सयोगे विंशत्युत्तरा सप्तशती देया । तदधो द्वितीयकोष्ठके द्विगुणा सा चत्वारिंशदधिकानि चतुर्दश शतानि देयानि । तृतीयकोष्ठके त्रिगुणा

स	रि	ग	म	प	ध	नि
१	०	०	०	०	०	०
	१	२	६	२४	१२०	७२०
		४	१२	४८	२४०	१४४०
			१८	७२	३६०	२१६०
				९६	४८०	२८८०
					६००	३६००
						४३२०

इति खण्डमेरु

स्वरान्मूलक्रमस्यान्त्यात्पूर्वं यावतिथः स्वरः ॥ ६६ ॥
उद्दिष्टान्त्यस्तावतिथे कोष्ठे ऽधो लोष्टकं क्षिपेत् ।
लोष्टचालनमन्त्यात्स्यात्त्यक्त्वा लब्धं क्रमो भवेत् ॥ ६७ ॥
लोष्टाक्रान्ताङ्कसंयोगादुद्दिष्टस्य मितिर्भवेत् ।

षष्ट्यधिकान्येकविंशतिः शतानि । चतुर्थकोष्ठके चतुर्गुणान्यशीत्यधिकान्यष्टाविंशतिः शतानि । तदधः पञ्चमकोष्ठके पञ्चगुणानि षट्त्रिंशच्छतानि । अध. षष्ठकोष्ठे षड्गुणानि विंशत्यधिकानि त्रिचत्वारिंशच्छतानि । एवविधो ऽय खण्डमेरुर्ज्ञातव्य. ॥ ६५, ६५- ॥

(क०) अस्मिन्खण्डमेरावुद्दिष्टनष्टयोर्बोधोपाय दर्शयति—**स्वरानित्यादिना** । स्वरूपमुक्त्वा कतमो ऽयमिति संख्याविषयत्वेन य पृच्छ्यते स उद्दिष्टस्वरूपत्वादुद्दिष्टसंज्ञकस्तान । उद्दिष्टान्त्य स्वरो मूलक्रमस्य मूर्च्छनाप्रथमस्वरमारभ्य प्रवृत्तस्योत्तरमन्द्राया सरिगमेति चतु स्वरक्रमस्य तावदन्त्यात्स्वरान्मध्यमात्पूर्वं पृष्ठतो मगसरीत्युद्दिष्टतानस्यान्त्य ऋषभो यावतिथ इति विचार्यमाणस्तृतीयो भवति । अधस्तावतिथे तृतीये कोष्ठे द्वादशाङ्काङ्किते 'लोष्टचालनमन्त्यात्स्यात्' इति नियमेनोर्ध्वाधःस्थितपङ्क्तिषु चतुर्थ-

पङ्क्तौ बिन्दुकोष्ठस्थितं लोष्टकं क्षिपेत्। अनन्तरं लब्धं कोष्ठस्थाङ्क-प्रापकत्वेन चरितार्थमृषभं त्यक्त्वा शिष्टाना स्वराणा सगमेति क्रमो भवेत्। तदोद्दिष्टे ऽपि लब्धत्यागान्मगसेत्युद्दिष्टो भवेत्। पुनरप्युद्दिष्टान्त्य षड्ज पूर्वोक्तरीत्या तृतीयो यतस्तेन तृतीयपङ्क्तिबिन्दुस्थितं लोष्टक-मधस्तृतीये चतुरङ्काङ्किते क्षिपेत्। तदा षड्जे लब्धे तमपि त्यक्त्वा गमेति क्रम स्यात्। मगेत्युद्दिष्टो ऽपि स्यात्। पुनरप्युद्दिष्टान्त्यस्य गाधारस्योक्तरीत्या द्वितीयत्वाद्द्वितीयपङ्क्तिबिन्दुस्थितं लोष्टकमधो द्वितीये कोष्ठ एकाङ्काङ्किते क्षिपेत्। ततो मूलक्रमोद्दिष्टयोरवशिष्टस्य मध्यमस्यैक-त्वात्प्रथमपङ्क्तेरध· कोष्ठाभावाच्च मौलिकाङ्कस्थितो लोष्टो न चलति। यत्र पुनर्मूलक्रम उद्दिष्टताने च स्वराणामन्त्यत्वादिना साम्यं तत्रापि न लोष्टचालनम्। एव च सति 'लोष्टाक्रान्ताङ्कसंयोगादुद्दिष्टस्य मितिर्भवेत्' इति प्रकृतस्य मगसरीत्यस्याष्टादशत्वं प्रमितं भवति। एवं सर्वतानेष्वपि द्रष्टव्यम् ॥ -६६—६७- ॥

(सु०) एव नष्टोद्दिष्टपरिज्ञानोपाय खण्डमेरुमुक्त्वोद्दिष्टपरिज्ञानमाह—**स्वरादिति**। मूलक्रमस्यान्त्यात्स्वरादुद्दिष्टस्यान्त्यः स्वरः पूर्व गणने सति याव-तिथो यावत्सख्यापूरणस्तावतिथे तावत्सख्यापूरणे ऽधः कोष्ठके लोष्टक क्षिपेत्स्था-पयेत्। इद लोष्टचालनं कस्मात्प्रभृति कर्तव्यमित्यपेक्षायामाह—**लोष्टचालन-मन्त्यात्स्यादिति**। अन्त्यादिति ल्यब्लोपे पञ्चमी। अन्त्यमारभ्य लोष्टचालनं स्यात्। एव लोष्टचालने कृते लब्ध लब्धसंज्ञक स्वर त्यक्त्वा लुप्त्वा तेन हीन· क्रमो भवेदिति कर्तव्य इत्यर्थ·। तत्रापि क्रमे मूलक्रमस्यान्त्यादित्यादि-पूर्वोक्तप्रकारः कर्तव्यः। एवं कृते येषु येष्वङ्केषु लोष्टकानि यान्ति तेषामङ्काना संयोगादुद्दिष्टस्य मान भवति। तत्र च त्रिस्वरकूटतानपरिज्ञाने त्रिकोष्ठक एव खण्डमेरुः। चतुःस्वरपरिज्ञाने चतु·कोष्ठकः। पञ्चस्वरपरिज्ञाने पञ्चकोष्ठक। षट्स्वरपरिज्ञाने षट्कोष्ठकः। सप्तस्वरपरिज्ञाने सप्तकोष्ठक इति ज्ञातव्यम्।

स्वरप्रमाणान्येव लोष्टकानि देयानि। दृष्टान्तार्थमुद्दिष्टपरिज्ञानप्रकारो दर्श्यते। नष्टोद्दिष्टप्रश्ने सरिगमेति क्रमो लेख्य'। मगरिसेत्युद्दिष्टम्। तत्रोद्दिष्टस्यान्त्यः षड्जो मूलक्रमस्यान्त्यान्मध्यमात्पूर्वगणने सति चतुर्थ'। तस्माच्चतुर्थकोष्ठक-शून्यस्थ लोष्टकमधश्चतुर्थकोष्ठके ऽष्टादशाङ्कस्थाने क्षिपेत्। उद्दिष्टे मूलक्रमे च षड्जो लोप्यः। तत उद्दिष्टान्त्य ऋषभो मूलक्रमस्यान्त्यान्मध्यमात्तृतीयः। तस्मात्तृतीयकोष्ठशून्यस्थ लोष्टकमधस्तृतीयकोष्ठके चतुरङ्कस्थाने क्षिपेत्। ऋषभो लोप्य'। तत उद्दिष्टान्त्यो गाधारो मूलक्रमस्यान्त्यान्मध्यमाद् द्वितीयः। तस्माद् द्वितीयकोष्ठस्थ लोष्टकमधो द्वितीयकोष्ठक एकाङ्कस्थाने क्षिपेत्। तत उद्दिष्टान्त्यो मूलक्रमस्यान्त्यात्प्रथम एव। तत्र लोष्टाभावाच्चालनं नास्ति। एषामङ्काना सयोगे सति चतुर्विंशतिसख्या लभ्यते। तस्मान्मगरिसेति चतुर्विंशतितमो भेद सिद्धो भवति। एव सप्तस्वरप्रस्तारे मगसरिधनिपेति किसख्याको भेद इति पृच्छाया सरिगमपधनीति मूलक्रमः स्थापनीय। उद्दिष्टान्त्य. पञ्चमो मूलक्रमस्यान्त्यान्निषादात्तृतीय। ततश्च सप्तमपङ्क्तौ शून्यादधस्तृतीयकोष्ठके चत्वारिंशदुत्तर-चतुर्दशशतस्थाने लोष्टकः स्थाप्यः। पञ्चम उभयत्रापि लोप्य'। तत उद्दिष्टान्त्यो निषादो मूलक्रमस्यान्त्यान्निषादात्प्रथम एव। ततश्चालन नास्ति। षष्ठपङ्क्तौ शून्यस्थान एव लोष्टकावस्थितिः। तथैवोद्दिष्टे मूलक्रमे च निषादो लोप्य। तत उद्दिष्टान्त्यो धैवतो मूलक्रमस्यान्त्याद्धैवतात्प्रथम एव। ततश्चालन नास्ति। ततश्च पञ्चमकोष्ठे शून्यस्थान एव लोष्टकावस्थितिः। मूलक्रम उद्दिष्टे च पूर्वव-द्धैवतो लोप्यः। तत उद्दिष्टान्त्य ऋषभो मूलक्रमस्यान्त्यान्मध्यमात्तृतीय। ततश्च चतुर्थपङ्क्तौ शून्याधस्तृतीयकोष्ठके द्वादशाङ्कस्थाने लोष्टक. स्थाप्यः। मूलक्रम उद्दिष्टे च ऋषभो लोप्य'। ततश्चोद्दिष्टान्त्यः षड्जो मूलक्रमस्यान्त्यान्मध्य-मात्तृतीय.। ततस्तृतीयकोष्ठस्थचतुर्थपङ्क्तौ शून्यादधस्तृतीयकोष्ठके चतुरङ्क-स्थाने स्थाप्य.। उद्दिष्टे मूलक्रमे च षड्जो लोप्यः। तत उद्दिष्टान्त्यो गाधारो मूलक्रमस्यान्त्यान्मध्यमाद् द्वितीयः। ततश्च द्वितीयपङ्क्तौ शून्यादध एकाङ्कस्थाने लोष्टकः स्थापनीयः। मूलक्रम उद्दिष्टे च गाधारो लोप्य। ततश्च मध्यमस्यैक्या-ल्लोष्टचालन नास्ति। लोष्टाक्रान्तानामङ्काना सयोगे चाष्टापञ्चाशदधिकानि चतुर्दश शतानि भवन्ति। तावत्सख्याको मगसरिधनिपेत्येव भेदो बोध्यः। एवमेव षट्स्वरादिष्वप्युद्दिष्टपरिज्ञानप्रकार ऊह्यः॥ -६६—६७- ॥

यैरङ्कैर्नष्टसंख्या स्यान्मौलैकाङ्कसमन्वितैः ॥ ६८ ॥
तेषु लोष्टं क्षिपेन्मूले[1] लोष्टस्थानमितं भवेत् ।
नष्टतानस्वरस्थानं ततो यावतिथे पदे ॥ ६९ ॥

(क०) एतावतिथ इति संख्याविशेषमुक्त्वा किरूप इति स्वरूपं विषयीकृत्य यः पृच्छ्यते सो ऽप्रतीयमानरूपत्वान्नष्ट इत्युच्यते । नष्टसंख्या नष्टतानसंख्या । उत्तरमन्द्राया चतुःस्वरक्रमे तावदष्टादशस्तान इत्युक्त्वा मौलैकाङ्कसमन्वितैः, तिर्यक्पङ्क्तिष्वाद्या सप्तकोष्ठिका पङ्क्तिर्मूलम्, तत्र भवो मौल·, स चासावेकाङ्कश्च, तत्राद्यकोष्ठस्थित इति यावत्, तेन समन्वितै , यैरङ्कैर्भिन्नपङ्क्तिकोष्ठस्थितै·, चतुर्थपङ्क्तौ द्वादशाङ्केन तृतीय-पङ्क्तौ चतुरङ्केण द्वितीयपङ्क्तावेकाङ्केन चैतैर्मिलितैरष्टादशसंख्या स्यात्, तेष्वङ्केषु लोष्ट प्रत्येक क्षिपेत् । नष्टतानस्वरस्थानं नष्टतानस्वरस्य प्रापकं स्थानम्, चालितलोष्टाक्रान्तकोष्ठ इत्यर्थ । मूले तिर्यगाद्यपङ्क्तौ, लोष्टस्था-नमितम्, लोष्टस्थानं बिन्दुकोष्ठस्तेन मितम् । बिन्दुकोष्ठेन सह परिगणित-मित्यर्थ । अन्यथा स्वकोष्ठकात्कोष्ठसंख्यागुणमित्यत्रोक्तनियमो ऽत्रापि प्रसरे-दित्येवमुक्तम् । ततो ऽनन्तरम्, अधः क्रमाद्यावतिथे पदे लोष्टो ऽस्ति क्रमा-न्तिमस्वरात्पूर्वस्तावतिथ. स्वरो भवेदिति । प्रकृते ऽष्टादशे ताने ऽन्त्यलोष्टस्य तृतीयकोष्ठस्थितत्वात्क्रमान्तिमस्वरात्पूर्वस्तृतीय ऋषभो नष्टतानान्तिमत्वेन लभ्यते । लब्धत्यागादि पूर्ववदित्यतिदेश. । तदुद्दिष्टोक्तप्रकारेण कर्तव्यमि-त्यर्थः । तथा च कृते सति, ऋषभ त्यक्त्वा सगमेति क्रमो भवति । तद्वदुपान्त्यलोष्टस्यापि तृतीयकोष्ठस्थितत्वात्क्रमान्तिमस्वरात्पूर्वस्तृतीय षड्जो नष्टोपान्त्यत्वेन लभ्यते । ततो ऽपि गमेति क्रमो द्वितीयलोष्टस्य द्वितीयकोष्ठ-स्थितत्वात्क्रमान्तिमाद् द्वितीयो गाधारो नष्टद्वितीयत्वेन लभ्यते । तत पारि-

[1] क्षिपेन्मौल,

अधःक्रमादस्ति लोष्टः स्वरस्तावतिथो भवेत् ।
क्रमान्तिमस्वरात्पूर्वो लब्धत्यागादि पूर्ववत् ॥ ७० ॥

शेष्यान्मध्यमस्तानपूरकत्वेन नष्टादिमो लभ्यते । तदा मगसरीति नष्टतानरूपं स्यात् । कि च यत्र यत्रान्ते मध्ये वा लोष्टचालनं नास्ति तत्र तत्र मूलक्रमान्त्यादिः स्वरो नष्टो ऽपि तादृशो लभ्यत इत्यवगन्तव्यम् ॥-६८—७०॥

(सु०) नष्टपरिज्ञानप्रकार कथयति—**यैरङ्कैरिति** । नष्टसख्या यैरङ्कैरेकीभूतैर्भवेत्प्रथमपङ्क्तिप्रथमकोष्ठस्थमौलैकाङ्कसहितै , तेषु कोष्ठाङ्केषु लोष्टकं क्षिपेत् । मौल सर्वासा पङ्क्तीना शून्यसयुक्तप्रथमकोष्ठस्थमिति लोष्टविशेषणम् । एकस्या पङ्क्तौ कोष्ठद्वये लोष्टक न स्थापयेदित्याह—**लोष्टस्थानमिति** । नष्टतानस्वराणा स्थान लोष्टस्थानमित लोष्टकस्थानप्रमाणकम् । यावन्ति लोष्टस्थानानि तावन्त्येव स्वरस्थानानि । ततश्च प्रतिपङ्क्तयेकैकस्मिन्कोष्ठके लोष्टक स्थापयित्वा प्रथमपङ्क्तिस्थैकाङ्केन सम नष्टसख्या पूरणीया । एवं लोष्टकेषु स्थापितेषु कि वर्तत इत्यपेक्षायामाह—**तत इति** । ततो ऽनन्तर यावतिथे पदे कोष्ठके ऽधःक्रमादधो गणने शून्यस्थानाल्लोष्टक तिष्ठति क्रमस्यान्तिमस्वरात्तावत्सख्याकः स्वरो बोद्धव्य । **लब्धत्यागादि पूर्ववदिति** । य· स्वरो लब्ध स लोप्य । आदिशब्देन सप्तस्वरनष्टविचारः सप्तकोष्ठपङ्क्तिषु, षट्स्वरनष्टविचारः षट्कोष्ठपङ्क्तिषु, पञ्चस्वरनष्टविचार. पञ्चकोष्ठपङ्क्तिष्वित्यादि बोद्धव्यम् । अयमत्र परिज्ञानक्रमः—सहस्रतमो भेदः सप्तस्वरप्रस्तारे कीदृगिति प्रश्ने, सप्तम्या पङ्क्तौ शून्यादधो द्वितीयकोष्ठके सविशतिकसप्तशतस्थाने लोष्टक· स्थाप्यः । षष्ठपङ्क्तौ शून्यादधस्तृतीयकोष्ठके चत्वारिशदधिकशतद्वयस्थाने लोष्टक· स्थापनीयः । पञ्चमपङ्क्तौ शून्यादधो द्वितीयकोष्ठके चतुर्विशत्यङ्कस्थाने लोष्टक स्थापयेत् । चतुर्थपङ्क्तौ तृतीयकोष्ठके द्वादशाङ्कस्थाने लोष्टक स्थापयेत् । तृतीयपङ्क्तौ शून्यादधो द्वितीयकोष्ठके द्व्यङ्कस्थाने लोष्टक स्थापयेत् । द्वितीयपङ्क्तौ शून्यादधो द्वितीयकोष्ठक एकाङ्कस्थाने लोष्टक स्थापयेत् । एतैरङ्कैर्मौलिकाङ्कसमन्वितै. सहस्रसख्या पूर्यते । ततः सप्तमपङ्क्तौ द्वितीयकोष्ठके लोष्टकस्तिष्ठतीति मूलक्रमस्यान्त्यान्निषादाद् द्वितीयो

इडा पुरुषमेधश्च श्येनो वज्र इषुस्ततः ।
अङ्गिराः कङ्क इत्येताः सपहीनाभिधाः क्रमात् ॥ ८३ ॥
ज्योतिष्टोमस्ततो दर्शो नान्द्याख्यः पौर्णमासकः ।
अश्वप्रतिग्रहो रात्रिः सौभरः सप्तमः स्मृतः ॥ ८४ ॥
एता निषादगांधारहीनानामभिधाः क्रमात् ।
सौभाग्यकृच्च कारीरी शान्तिकृत्पुष्टिकृत्तथा ॥ ८५ ॥
वैनतेयोच्चाटनौ च वशीकरणसंज्ञकः ।
पञ्चमर्षभहीनानां तानानामभिधा इमाः ॥ ८६ ॥

इति षाड्जग्रामिकैकविंशत्यौडुवताननामानि ।

त्रैलोक्यमोहनो वीरः कंदर्पबलशातनः ॥ ८७ ॥
शङ्खचूडो गजच्छायो रौद्राख्यो विष्णुविक्रम. ।
तानानां रिधहीनानां नामान्येतान्यनुक्रमात् ॥ ८८ ॥
भैरवः कामदाख्यश्चावभृथो ऽष्टकपालकः ।
स्विष्टकृच्च वषट्कारो मोक्षदः सप्तमो मतः ॥ ८९ ॥
संज्ञा निषादगांधारहीनानामिति संमताः ।

इति माध्यमग्रामिकचतुर्दशौडुवताननामानि ।

क्रमात्, द्व्यङ्कमिश्रणे द्विस्वरतानसंख्या त्र्यङ्कमिश्रणे त्रिस्वरतानसंख्येत्यादि· क्रमस्तस्मात् । कूटतानोपयोगित्वेन खण्डमेरुं निरूप्य प्रसङ्गाच्छुद्धतानाना-मदृष्टफलसंबन्धं च कथयिष्यस्तेषा यज्ञानामभिधेयत्वं वक्तुमुपक्रमते— **अथात्रेत्यादिना** । शुद्धतानाना यज्ञफलसबन्धे कि प्रमाणमित्यत आह—

यद्यज्ञनामा यस्तानस्तस्य तत्फलमिष्यते ॥ ९० ॥
गान्धर्वे मूर्च्छनास्तानाः श्रेयसे श्रुतिचोदिताः ।
गाने स्थानस्य लाभेन ते कूटाश्चोपयोगिनः ॥ ९१ ॥

गान्धर्व इति । गान्धर्वं वक्ष्यमाणलक्षणो गीतविशेषस्तत्र । **मूर्च्छनास्ताना** इति । ताना शुद्धतानाः । ते च शुद्धा इति प्रकरणाल्लभ्यते । तत्साहचर्यान्मूर्च्छना अपि शुद्धा एव विवक्षिता । श्रेयसे ऽदृष्टफलाय । **श्रुतिचोदिता** इति । श्रुतिशब्देन तदनुगृहीता स्मृतयो ऽप्युपलक्ष्यन्ते, ताभिश्चोदिता । तद्यथा—

'उत्तरमन्द्राऽनुगता गायेत्तिस्रो मुदा युक्तः ।
गाधारा रक्षोघ्नीत्यौद्गात्रे मूर्च्छना विहिता ॥
आग्निष्टोमिकतानेन गीतं साम शृणोति यः ।
स सर्वपातकैर्मुक्तो लोकाञ्जयति दुर्जयान् ।
दक्षप्रोक्तं पठेद्यस्तु वर्णयञ्शुद्धषड्जया ।
प्रत्यहं सध्ययो स्तोत्रं नाकलोकं स गच्छति ॥
आग्निष्टोमिकतानेन यैर्नरै स्तूयते शिवः ।
ते भुक्त्वा विपुलान्भोगाञ्शिवसायुज्यमाप्नुयुः ॥'

इति । कूटतानाना तु केवलं दृष्टफलत्वेनोपयोगमाह—**गान** इति । गानं च वक्ष्यमाणलक्षणं तस्मिन् । स्थानस्य तत्तन्मूर्च्छनावशेन सारिताना स्वराणामाधारश्रुतेर्लाभेन परिज्ञानेन ॥ ७१–९१ ॥

(सु०) खण्डमेरुणैव लाघवेन सख्यापरिज्ञानमाह—**तानस्वरेति**। तानस्वरप्रमिता या ऊर्ध्वाध·पङ्क्तयः, तद्गता ये ऽन्त्याङ्का·, तेषा मिश्रणादैक्येनैकस्वरादितानाना सख्या सजायते। पङ्क्तिद्वयान्त्याङ्कमिश्रणाद् द्विस्वरसख्या द्वौ। पङ्क्तित्रयान्त्याङ्कमिश्रणात्त्रिस्वरसख्या षट्। पङ्क्तिचतुष्टयान्त्याङ्कमिश्रणाच्चतुःस्वरसख्या चतुर्विंशति.। पङ्क्तिपञ्चकान्त्याङ्कमिश्रणात्पञ्चस्वरसख्या विंशत्युत्तर शतम्। पङ्क्तिषट्कान्त्याङ्कमिश्रणात् षट्स्वरसख्या सप्त शतानि विंशत्युत्तराणि। सर्वासामन्त्याङ्कमेलनेन सप्तस्वरसख्या पञ्च सहस्राणि चत्वारिंशदुत्तराणि॥ तानाना नामानि कथयितु प्रतिजानीते—**अथात्रेति**। षाड्जग्रामिकषड्जहीनषाडवताननामानि कथयति—**अग्निष्टोम** इति। षाड्जग्रामिकर्षभहीनषाडवताननामानि कथयति—**स्विष्टकृदित्या**दि। षाड्जग्रामिकपञ्चमहीनषाडवताननामानि कथयति—**अश्वक्रान्त** इति। षाड्जग्रामिकनिषादहीनषाडवताननामानि कथयति—**चातुर्मास्य** इति। इति षाड्जग्रामिकाष्टाविंशतिषाडवताननामानि॥ माध्यमग्रामिकषड्जहीनषाडवताननामानि कथयति—**सावित्रीत्यादि**। माध्यमग्रामिकर्षभहीनषाडवताननामानि कथयति—**अग्निचिदिति**। माध्यमग्रामिकगाधारहीनषाडवताननामानि कथयति—**सर्वस्वदक्षिणेत्यादि**। इति माध्यमग्रामिकैकविंशतिषाडवताननामानि॥ षाड्जग्रामिकषड्जपञ्चमहीनौडुवताननामानि कथयति—**इडा पुरुषमेधश्चेत्यादि**। षाड्जग्रामिकनिषादगाधारहीनौडुवताननामानि कथयति—**ज्योतिष्टोम** इत्यादि। षाड्जग्रामिकपञ्चमर्षभहीनौडुवताननामानि कथयति—**सौभाग्यकृदित्यादि**। इति षाड्जग्रामिकैकविंशत्यौडुवताननामानि॥ माध्यमग्रामिकधैवतर्षभहीनौडुवताननामानि कथयति—**त्रैलोक्यमोहन** इत्यादि। माध्यमग्रामिकनिषादगाधारहीनौडुवताननामानि कथयति—**भैरव** इति। इति माध्यमग्रामिकचतुर्दशौडुवताननामानि॥ ताननामप्रयोजनमाह—**यद्यज्ञेति**। यस्य तानस्य यस्याग्निष्टोमादेर्नाम तस्य तानस्य सम्यक्प्रयोगे तस्य यज्ञस्य फलमिष्यते मन्यते पूर्वाचार्यै·। मूर्च्छनातानाना प्रयोजनमाह—**गान्धर्व** इति। मूर्च्छनास्तानाश्च गान्धर्वे मार्गगाने श्रुतिचोदिताः श्रुत्या विहिता.। श्रेयसे ऽभ्युदयाय नि श्रेयसार्थम्। ततश्च शुद्धमूर्च्छनातानादिप्रयोगस्य धर्मत्वमपि सूच्यते, 'यतो ऽभ्युदयनि श्रेयससिद्धि· स धर्मः' इत्यङ्गीकारात्। गान इति। गाने देशीगाने ते शुद्धमूर्च्छनास्तानाः कूटतानाश्च स्थानस्य लाभेन रञ्जकस्थायविशेषलाभेन चोपयोगिनो

अथ पञ्चमं साधारणप्रकरणम्

साधारणं भवेद् द्वेधा स्वरजातिविशेषणात् ।
स्वरसाधारणं तत्र चतुर्धा परिकीर्तितम् ॥ १ ॥
काकल्यन्तरषड्जैश्च मध्यमेन विशेषणात् ।
साधारणः काकली हि भवेत्षड्जनिषादयोः ॥ २ ॥
साधारण्यमतस्तस्य यत्तत्साधारणं विदुः ।

भवन्ति । अथ वा मन्द्रमध्यताराख्यस्थानप्राप्तय उपयोगिनो भवन्ति । सगीत-समयसारे ऽप्युक्तम्—'ननु तानाना यज्ञाना च कथमेकत्र व्यवहार' ? उच्यते—एकस्मिन्नपि तान उच्चारिते ऽग्निष्टोमादियागानामेकैकस्य फलोपलब्धेर्गायकाना यज्ञस्तानादेव सिध्यति' इति । अतो नासगतम् ॥ ७१-९१ ॥

इति प्रथमे स्वरगताध्याये चतुर्थं ग्राममूर्च्छनाक्रमशुद्धतानकूटतानप्रकरणम् ॥ ४ ॥

(क०) गीते विकृतस्वरप्रयोगेण वैचित्री क्वचिद्गानसाम्य च दर्शयितुं साधारणमवधारयति—**साधारणमित्यादिना** । **स्वरजातिविशेषणादिति** । स्वरसाधारण जातिसाधारणमित्येवमित्यर्थ । तत्र तयोर्मध्ये स्वरसाधारणं चतुर्धा । काकल्यन्तरषड्जैश्च मध्यमेन विशेषणादिति । काकलिसाधारणमन्तरसाधारणं षड्जसाधारणं मध्यमसाधारणमित्येवमित्यर्थ ॥ अनेकाश्रयत्वेन लोकसिद्ध साधारणशब्दार्थ प्रकृते योजयति—**साधारणः काकलीत्यादिना** । हि यस्मात्कारणात्काकली विकृतश्चतु श्रुतिको निषाद षड्जनिषादयो शुद्धयो साधारणो भवेत्तदुभयश्रुतिसंबन्धित्वेन, अत कारणात्तस्य काकलिनो यत्साधारण्यं तत्साधारणं विदु । तदेव साधारण्यं साधारणमिति पदेनापि विदुरित्यर्थः । धर्मपरत्वेन साधारणमिति नपुंसक-

अन्तरस्यापि गमयोरेवं साधारणं मतम् ॥ ३ ॥
प्रयोज्यौ षड्जमुच्चार्य काकलीधैवतौ क्रमात् ।
एवं मध्यममुच्चार्य प्रयुञ्जीतान्तरर्षभौ ॥ ४ ॥
षड्जकाकलिनौ यद्वोच्चार्य षड्जं पुनर्व्रजेत् ।
तत्परान्यतमं चैवं मध्यमं चान्तरस्वरम् ॥ ५ ॥
प्रयुज्य मध्यमो ग्राह्यस्तत्परान्यतमो ऽथ वा ।
अल्पप्रयोगः सर्वत्र काकली चान्तरः स्वरः ॥ ६ ॥

निर्देश । अत. 'साधारण भवेद्द्वेधा' इत्यादिषु साधारणपदस्य साधारण्य-पदपर्यायत्वमवसेयं माधुर्ये मधुरमिति प्रयोगवत् ॥ १–२- ॥

(सु०) इदानीं साधारणलक्षण कथयति—**साधारणमिति** । तत्र स्वरजा-त्यन्यतरत्वमेव साधारणसामान्यलक्षणमिति मन्वानो विशेषणद्वयमेव विभज्य निरूपयति—साधारणं द्वेधा द्विप्रकार भवेत्स्वरजात्योर्विशेषणात् । ततश्चैक स्वरसाधारणमेक जातिसाधारणमिति । तत्र स्वरसाधारणस्य भेदानाह—**स्वर-साधारणमिति** । स्वरसाधारण चतुर्धा चतु प्रकार काकलिसाधारणमन्तरसाधारण षड्जसाधारण मध्यमसाधारण चेति । वक्ष्यमाणलक्षणस्य साधारण्यस्य कथ समानशब्दपर्यायशब्दवाच्यत्वम् ? अत आह—**साधारण** इति । काकली स्वरः षड्जनिषादयोः साधारणस्तुल्यावस्थितिर्भवति, निषादस्य षड्जस्य च श्रुति-द्वयग्रहणात् । अत· कारणात्तस्य काकलिन उभयोर्निषादषड्जयोर्यत्साधारण्य तत्साधारण विदुः सगीतज्ञाः । साधारणशब्दाद्भावे ष्यञ्प्रत्यये साधारणस्य भाव. साधारण्यमिति ॥ १–२- ॥

(क०) **अन्तरस्यापीति** । अन्तरस्य विकृतत्वेन चतु श्रुतिकस्य गाधारस्यापि एवमुक्तप्रकारेणोभयाश्रयत्वेन गमयो शुद्धयो श्रुतिसंबन्धि-त्वेन साधारणं साधारण्य मतमिष्टम् । स्वरसाधारणविशेषधर्मत्वेन काकल्य-

निषादो यदि षड्जस्य श्रुतिमाद्यां समाश्रयेत् ।
ऋषभस्त्वन्तिमां प्रोक्तं षड्जसाधारणं तदा ॥ ७ ॥
मध्यमस्यापि गपयोरेवं साधारणं मतम् ।
साधारणं मध्यमस्य मध्यमग्रामगं ध्रुवम् ॥ ८ ॥

न्तरयोरुपात्तयोस्तत्संबन्धवशादुद्देशक्रममुल्लङ्घ्यापि तयो प्रयोग दर्शयति—**प्रयोज्यावित्यादिना** । **काकलीधैवताविति** । अत्र काकलीति स्त्रीलिङ्ग-निर्देश । **तत्परान्यतममिति** । तस्मात्षड्जात्परेषु स्वरेष्वन्यतमम्, संनिहित परो यदि लोप्य स्यात्तदा तं विहाय तत्संनिहितमेव परमित्यर्थ । काकलिप्रयोगे ऽभिहितं प्रकारमन्तरप्रयोगे ऽप्यतिदिशति—**एवं मध्यम-मिति** ॥ -३—६ ॥

(सु०) काकल्युक्त साधारणशब्दप्रवृत्तिप्रकारमन्तरे ऽप्यतिदिशति—**अन्तरस्यापीति** । अन्तर. स्वरो हि गाधारमध्यमयोः साधारण', गाधारस्य मध्यमस्य च श्रुतिद्वयग्रहणात् । तस्यान्तरस्य गाधारमध्यमयोर्यत्साधारणत्व तत्साधारणमित्यर्थ' । काकल्यन्तरयोः प्रयोगनियममाह—**प्रयोज्याविति** । षड्ज-मुच्चार्य काकलिधैवतौ प्रयोक्तव्यौ । क्रमादित्यवरोहक्रमात् । ततश्च पूर्व काकली पश्चाद्धैवतः प्रयोक्तव्य । एव मध्यममुच्चार्यान्तरर्षभाववरोहक्रमेण प्रयोक्तव्यौ । एतयोर्विकल्पेनान्यथाप्रयोगनियम कथयति—**षड्जकाकलिनाविति** । षड्ज का-कलिन चोच्चार्य तत. पुन' षड्ज व्रजेदुच्चारयेत् । तत्परान्यतम च, तस्मा-त्षड्जात्परे ये, ऋषभगाधारमध्यमपञ्चमधैवतास्तेष्वन्यतममेकमुच्चारयेत् । एव मध्यममन्तरस्वर च प्रयोज्योच्चार्य पुनरपि मध्यमो ग्राह्यः । तस्मान्मध्यमात्परे ये पञ्चमधैवतनिषादषड्जर्षभास्तेष्वन्यतमश्च ग्राह्य. । **अल्पप्रयोग** इति । काकल्यन्तर स्वरश्च सर्वत्र जातिरागादावल्पप्रयोगः ॥ -३–६ ॥

(क०) एवं काकलिसाधारणमन्तरसाधारण च सप्रयोगमुक्त्वा षड्जमध्यमसाधारणे लक्षयति—**निषादो यदीत्यादिना** । स्वरसाधारण-

साधारणे कैशिके ते केशाग्रवदणुत्वतः ।
ते एव कैश्चिदुच्येते ग्रामसाधारणे बुधैः ॥ ९ ॥
एकग्रामोद्भवास्वेकांशासु जातिषु यद्भवेत् ।
समानं गानमार्यास्तज्जातिसाधारण जगुः ॥ १० ॥
जातिसाधारणं केचिद्रागानेव प्रचक्षते ।

चतुष्टयस्यापि ग्रामद्वये प्रसक्तौ विकृतत्वे ऽपि स्वराणा पञ्चश्रुतित्वमनिष्टमिति मत्वा मध्यमसाधारणं मध्यम एव नियमयति—**साधारणं मध्यमस्येति** ॥ षड्जमध्यमसाधारणयोर्व्यपदेशान्तरे सप्रवृत्तिनिमित्त दर्शयति—**साधारणे** इति । ते साधारणे षड्जमध्यमसाधारणे । केशाग्रवदणुत्वत , चतु श्रुतिकस्य च्युतत्वेन द्विश्रुतिकत्वापत्त्या ऽल्पत्वात्कैशिके इत्युच्येते । ते एव षड्जमध्यमसाधारणे एव ग्रामप्रतिनियतत्वात्कैश्चिद् बुधैर्ग्रामसाधारणे इत्युच्येते इत्यर्थः ॥ जातिसाधारणं लक्षयति—**एकग्रामेति** । **जातिसाधारणमिति** । जात्योर्वा जातिषु वा वर्णसाम्येन गानस्य यत्साधारण तदेव तथोक्तम् ॥ ७—१०- ॥

(सु०) काकलिसाधारणलक्षणमन्तरसाधारणलक्षणं च काकल्यन्तरस्वरलक्षणेनैवोक्त मूर्च्छनाप्रकरणे 'श्रुतिद्वय चेत्षड्जस्य' इत्यादिना । अतः षड्जसाधारण मध्यमसाधारण च लक्षयति—**निषाद** इति । निषादो यदि षड्जस्याद्या श्रुति समाश्रयति, ऋषभश्चान्तिमा श्रुति तदा षड्जसाधारणम् । एव गाधारो यदा मध्यमस्याद्या श्रुति समाश्रयति पञ्चमश्चान्तिमा श्रुति तदा मध्यमसाधारणम् । षड्जसाधारणे निषादस्त्रिश्रुतिर्ऋषभश्चतुःश्रुतिः । मध्यमसाधारणे गाधारस्त्रिश्रुतिः पञ्चमश्चतुःश्रुतिः ॥ ७, ७- ॥ साधारणे ग्रामयोर्नियमयति—**साधारणमिति** ।

अथ षष्ठं वर्णालंकारप्रकरणम्

गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः ।
स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम् ॥ १ ॥
स्थित्वा स्थित्वा प्रयोगः स्यादेकस्यैव स्वरस्य यः ।
स्थायी वर्णः स विज्ञेयः परावन्वर्थनामकौ ॥ २ ॥
एतत्संमिश्रणाद्वर्णः संचारी परिकीर्तितः ।

मध्यमसाधारण मध्यमग्राम एव । साधारणयोर्मध्ये मध्यमग्रामे मध्यमसाधारणमेव । ततश्च षड्जग्राम एव षड्जसाधारणमिति गम्यते । ते द्वे साधारणे कैशिके इत्युच्येते । केशाग्रवदणुत्वत इति कैशिकशब्दस्य प्रवृत्तिनिमित्त दर्शितम् । ते एव षड्जमध्यमसाधारणे कैश्चिदाचार्यैर्ग्रामसाधारणे इत्युच्येते । जातिसाधारण लक्षयति—एकग्रामेति । समानग्रामोद्भवास्वेकाशस्वरासु जातिषु यत्समान गान भवेत्तदार्या मान्या आचार्या भरतादयो जातिसाधारणमवादिषुः । मतभेदेनान्यथा जातिसाधारण लक्षयति—जातीति । केचिद्रागा एव शुद्धकैशिकमध्यमादयो जातिसाधारणमित्याहु. ॥ ७–१०- ॥

इति प्रथमे स्वरगताध्याये पञ्चमं साधारणप्रकरणम् ॥ ५ ॥

(क०) जातिसाधारणनिरूपणे गानसंबन्धित्वेन प्रसक्तं वर्णं सप्रभेदं लक्षयति—**गानक्रियेति** । गानक्रियाया वर्णत्वं स्वरपदादेर्वर्णनाद्विस्तार-करणात् । **एकस्यैवेति** । एकैकस्येति वा । तत्रादौ 'सासासा रीरीरी' इत्येवमादिप्रयोग । द्वितीये 'सारीगामा' इत्येवमादिरूप· । **परावन्वर्थ-नामकाविति** । परावारोह्यवरोहिणावन्वर्थनामकौ । 'सरिगमपधनि 'इत्यारो-हादारोही । 'निधपमगरिस 'इत्यवरोहादवरोहीत्येवम् । एतत्समिश्रणात्,

विशिष्टं वर्णसंदर्भमलंकारं प्रचक्षते ॥ ३ ॥

एतेषा स्थाय्यादीना त्रयाणा वर्णानाम् 'सारी सारीगा सनिधा सारीगा' इत्येव यथायोग मिश्रणात्सचारी वर्ण परिकीर्तित. । यत्र गानक्रियाया यस्य वर्णस्य बाहुल्यं दृश्यते तत्र तेन व्यपदेश· कर्तव्य इति मन्तव्यम् ॥ १–२ ॥

(सु०) वर्ण लक्षयति—**गानक्रियेति** । स्वराणा वक्ष्यमाणप्रकारेण गानक्रिया गानकरणम्, उच्चारणमिति यावत् । सा वर्णशब्देनोच्यते । स च वर्णश्चतुर्धा भवति—स्थाय्यारोह्यवरोही सचारी चेति । तत्र स्थायिवर्णलक्षणमाह—**स्थित्वा स्थित्वेति** । यत्रैकस्यैव स्वरस्य स्थित्वा स्थित्वा विलम्ब्य विलम्ब्य प्रयोग उच्चारण स स्थायिवर्णो विज्ञेय· । यथा षड्जस्य 'सासासासा', मध्यमस्य 'मामामामा' इति । परावारोहिवर्णावरोहिवर्णौ, अन्वर्थनामकौ, अर्थमनुगतमन्वर्थं नाम ययोस्तावन्वर्थनामकौ । नामार्थ एव तयोर्लक्षणम्—यत्र स्वराणामारोहः स आरोही वर्ण·, यत्रावरोह· सो ऽवरोही वर्ण इति । एतेषा त्रयाणा संमिश्रणात्परस्परलक्षणसचरणात्सचारी वर्ण उक्त· । मतङ्गेन त्वेव सचारिवर्णलक्षणमुक्तम्—

"यत्र ताने सचरन्ति स्वरा अन्त्यान्त्यसहिता ।
एकैकशो द्विशो वा स सचारी वर्ण उच्यते ॥

यथा मालवकैशिके—'सा सा स नि म म नि म प नि रि रि पा पनीपानिध' एवमादि ॥" १–२- ॥

(क०) उक्तवर्णग्रथनविशेषरूपमलंकार प्रतिवर्ण सविभागं लक्षयति—**विशिष्टं वर्णसंदर्भमित्यादिना** । वर्णसंदर्भो ऽलकार इत्येतावत्युक्ते वर्णविशेषे सचारिणि व्यभिचार· स्यात्, स मा भूदिति विशिष्टमिति विशेषणम् । वैशिष्ट्य च नियतकलाऽऽदियुक्तत्वम् । इह प्रसन्नादिप्रभृतीनामलकारत्वं गीतिरेतैरलक्रियत इति करणव्युत्पत्त्या, यथा लोके हारादि-

तस्य भेदास्तु बहवस्तत्र स्थायिगतान्ब्रुवे ।
येषामाद्यन्तयोरेकः स्वरस्ते स्थायिवर्णगाः ॥ ४ ॥
प्रसन्नादिः प्रसन्नान्त प्रसन्नाद्यन्तसंज्ञकः ।
ततः प्रसन्नमध्यः स्यात्पञ्चमः क्रमरेचितः ॥ ५ ॥
प्रस्तारो ऽथ प्रसादः स्यात्सप्तैते स्थायिनि स्थिताः ।
मन्द्रः प्रकरणे ऽत्र स्यान्मूर्च्छनाप्रथमः स्वरः ॥ ६ ॥
स एव द्विगुणस्तारः पूर्वः पूर्वो ऽथ वा भवेत् ।
मन्द्रः परस्ततस्तारः प्रसन्नो मृदुरित्यपि ॥ ७ ॥
मन्द्रस्तारस्तु दीप्तः स्यान्मन्द्रो बिन्दुशिरा भवेत् ।
ऊर्ध्वरेखाशिरास्तारो लिपौ त्रिर्वचनात्प्लुतः ॥ ८ ॥
मन्द्रद्वयात्परे तारे प्रसन्नादिरुदीरितः ।
सं सं सं । (१)

भिर्नारी काव्ये वा ऽनुप्रासादिभी रसादिस्तद्वत् । तथा चाह भरतः प्रकारान्तरेण—

'शशिना रहितेव निशा विजलेव नदी लता विपुष्पेव ।
अविभूषितेव कान्ता गीतिरलंकारहीना स्यात् ॥' इति ।

येषामाद्यन्तयोरिति । येषामलंकाराणामाद्यन्तयो कलानामुपक्रमोपसंहारयोरेकः स्वरो मूर्च्छनावशेन षड्जादीना मध्ये यस्तूपक्रान्त उपसंहारे स्थानान्तरगतो ऽपि स एवेत्यर्थ । एतेन स्थायिवर्णादिवृत्तिरेतेषु दर्शिता । अतस्ते स्थायिवर्णगाः स्थाय्यलंकाराः ॥ उक्तेष्वेव मन्द्रादिस्थानेष्वलंकार-

लक्षणार्थं प्रतिमूर्च्छनं तारमन्द्रव्यवहारमन्यथा ऽनेकधा करोति—**मन्द्रः प्रकरण** इति । द्विगुणो ऽष्टमः ॥ -३—८ ॥

(सु०) वर्णमुक्त्वा तदनुगतालंकारलक्षणमाह—**विशिष्टमिति** । केनचिल्लक्षणविशेषेण विशिष्ट वर्णसदर्भ वर्णसमुदायमलकार प्रचक्षते भरतादयः । मतङ्गेनाप्यलकारस्य लक्षणव्युत्पत्ती कथिते । यथा—"नन्वलकारशब्देन किमुच्यते, व्युत्पत्तिर्वा तस्य कीदृशी? उच्यते—अलकारशब्देन मण्डनमुच्यते । यथा कटककेयूरादिना ऽलकारेण नारी पुरुषो वा मण्डितः शोभामावहेत्तथैतैरलकारैः प्रसन्नादिभिरलकृता वर्णाश्रया गीतिर्गातृश्रोतॄणा सुखावहा भवतीति । व्युत्पत्तिश्च यथा—'डुकृञ् करणे' इत्यस्माद्धातोरलशब्दपूर्वाद् घञ्प्रत्यये ऽलकारशब्दः" इति ॥ तस्य बहुभेदत्वे ऽपि कियताचित्कथनार्थं प्रतिजानीते—**तस्येति** ॥ स्थायिवर्णालकारालॅलक्षयति—**येषामिति** । आदावन्ते च येषामेक एव स्वरस्ते स्थायिवर्णालकाराः । तान्परिगणयति—**प्रसन्नादिरिति** । एते सप्त स्थायिनि वर्णे स्थिताः, स्थाय्यलकारा इत्यर्थ ॥ अलकारप्रकरणोपयोगिनीं परिभाषामाह—**मन्द्र इति** । अत्रास्मिन्नलकारप्रकरणे मूर्च्छनायाः प्रथमः स्वरो मन्द्रशब्देनोच्यते । स एव मूर्च्छनाप्रथमस्वरो द्विगुणस्तारशब्देनोच्यते । यदा मूर्च्छनाप्रथमस्वरो मन्द्रो भवति तदा स एव मध्यस्तारशब्देनोच्यते । यदा तु मूर्च्छनाप्रथमस्वरो मध्यस्तदा स एव तारस्तारशब्देनोच्यते । विकल्पेनान्यथा मन्द्रतारादिशब्दवाच्यत्वमाह—**पूर्वः पूर्व इति** । पूर्वस्थानस्थः स्वरो मन्द्रः परस्थानस्थस्तार इति । यदा मन्द्रस्थानस्थः पूर्वस्तदा मध्यस्थानस्थस्तारः । यदा मध्यस्थानस्थः पूर्वस्तदा तारस्थानस्थस्तारः । अत्र मूर्च्छनाऽऽदिस्वरेणैव पूर्वेण भवितव्यमिति नियमो नास्तीति पूर्वमुक्तात्पक्षाद्भेदः । मन्द्रतारपर्यायानाह—**प्रसन्न इति** । प्रसन्नमृदुमन्द्रशब्दैर्मन्द्रो ऽभिधीयते । दीप्ततारशब्दाभ्या तारः । मन्द्रतारयोर्लिपिविशेष कथयति—**मन्द्र इति** । लिपौ मन्द्रः स्वरो बिन्दुशिराः शिरसि बिन्दुसहितो लेखनीयः, तारस्तु शिरस्यूर्ध्वरेखया सहितः । त्रिर्वचनात्स्वरः प्लुत इत्युच्यते । स त्रिरुच्चारणीय इत्यर्थः ॥ -३—८ ॥

तद्वैलोम्ये प्रसन्नान्तः
सं सं सं । (२)
प्रसन्नद्वयमध्यगे ॥ ९ ॥
दीप्ते प्रसन्नाद्यन्तः स्यात्
सं सं सं । (३)
तारयोर्मध्यगे पुनः ।
मन्द्रे प्रसन्नमध्याख्यमलंकारं विदो विदुः ॥ १० ॥
सं सं सं । (४)
आद्यन्तयोर्मूर्च्छनाऽऽदिश्चेत्स्वरो ऽन्तर्द्वितीयकः ।
सैका कला ऽथ चेन्मध्ये स्तस्तृतीयचतुर्थकौ ॥ ११ ॥
सा द्वितीया पञ्चमाद्यास्त्रयो ऽन्तश्चेत्कला परा ।
एवं कलात्रयेणोक्तो ऽलंकारः क्रमरेचितः ॥ १२ ॥

(क०) उद्देशक्रमेण त्रिषष्टिमलंकारान्दर्शयति—**मन्द्रद्वयात्पर** इत्यादिना **त्रिषष्टिरुदिता मयेत्यन्तेन** । इह ग्रन्थकारेण दिङ्मात्रप्रदर्शनार्थमुत्तरमन्द्रामधिकृत्य प्रसिद्धालकाराणा प्रस्तारो लिखित । तद्वन्मूर्च्छनाऽऽन्तरेष्वप्यलंकारप्रस्तारा द्रष्टव्या ॥ ९—६३ ॥

(सु०) प्रसन्नादि लक्षयति—**मन्द्रद्वयादिति** । मन्द्रस्वरद्वयमुच्चार्य यदि सकृत्तारस्वर उच्चार्यते तदा प्रसन्नादिरलकारः । **तद्वैलोम्य** इति । तस्य प्रसन्नादेर्विपरीतत्वे पूर्व सकृत्तारः पश्चाद् द्विर्मन्द्रश्चेत्, तदा प्रसन्नान्त' । **प्रसन्नद्वयेति** । यदि पूर्व मन्द्रः पश्चाद्दीप्त. पुनरपि मन्द्रस्तदा प्रसन्नाद्यन्त । **तारयोरिति** । यदि पूर्व तारः पश्चान्मद्र' पुनरपि तारस्तदा प्रसन्नमध्य' ॥ ९, १० ॥ क्रमरेचित लक्षयति—**आद्यन्तयोरिति** । मूर्च्छनायाः प्रथमः स्वरो यद्यादावन्ते च तिष्ठति, द्वितीयः स्वरो मध्ये, एवमेका कला, द्वितीयकलाया तु मूर्च्छनाप्रथमस्वर एवा-

संरिसं संगमसं संपधनिसं । (५)
दीप्तान्तश्चेत्प्रतिकलं प्रस्तारः सो ऽभिधीयते ।
संरिसं संगमसं संपधनिसं । (६)
तारमन्द्रविपर्यासात्तं प्रसादं प्रचक्षते ॥ १३ ॥
संरिसं संगमसं संपधनिसं । (७)

इति स्थायिगतालंकाराः ।

स्यातां विस्तीर्णनिष्कर्षौ बिन्दुरभ्युच्चयः[1] परः ।
हसितप्रेङ्खिताक्षिप्तसंधिप्रच्छादनास्तथा ॥ १४ ॥
उद्गीतोद्वाहितौ तद्वत्त्रिवर्णौ वेणिरित्यमी ।
द्वादशारोहिवर्णस्थालंकाराः परिकीर्तिताः ॥ १५ ॥
मूर्च्छनाऽऽदेः स्वराद्यत्र क्रमेणारोहणं भवेत् ।
स्थित्वा स्थित्वा स्वरैर्दीर्घैः स विस्तीर्णो ऽभिधीयते ॥ १६ ॥
सा री गा मा पा धा नी । (१)

द्यन्तयो', मध्ये तृतीयचतुर्थौ, तृतीयस्या तु कलाया प्रथम' स्वर एवाद्यन्तयोः, मध्ये पञ्चमषष्ठसप्तमस्वराः, एव कलात्रयेण क्रमरेचितो ऽलंकारो भवति ॥११, १२॥ दीप्तान्त इति । क्रमरेचितस्य तिसृष्वपि कलासु यद्यन्तिमो दीप्तो भवति तदा प्रस्ताराख्यो ऽलंकारः ॥ १२- ॥ तारेति । प्रस्तारस्य तारमन्द्रविपर्यासात्प्रसादालंकार । क्रमरेचितस्य कलात्रये पूर्वस्तारो ऽन्तिमस्तु मन्द्र एवेति ॥-१३॥ इति स्थायिगतालंकाराः ॥ आरोह्यलंकारान्परिगणयति—स्यातामिति ॥ १४, १५ ॥ विस्तीर्णालंकार लक्षयति—मूर्च्छनाऽऽदेरिति । मूर्च्छनायाः प्रथमस्वराद्दीर्घै' स्वरैः स्थित्वा स्थित्वा विलम्ब्य विलम्ब्य क्रमेण यत्रारोहणं भवेत्स विस्तीर्णालंकारः ।

[1] ०रभ्युच्छ्रय

ह्रस्वैः स्वरैः स निष्कर्षो द्विर्द्विरुक्तैर्निरन्तरैः ।
सस रिरि गग मम पप धध निनि । (२)
त्रिश्चतुर्वा स्वरोच्चारे गात्रवर्णमिमं विदुः ॥ १७ ॥
ससस रिरिरि गगग ममम पपप धधध निनिनि ॥
ससससस रिरिरिरि गगगग मममम पपपप धधधध निनिनिनि । (२)
निष्कर्षस्यैव भेदौ द्वौ केचिदेतौ बभाषिरे ।
प्लुतं ह्रस्वं प्लुतं ह्रस्तं प्लुतं ह्रस्वं प्लुतं स्वरम् ॥ १८ ॥
कुर्वन्क्रमाद्यदा ऽऽरोहेत्तदा बिन्दुरयं मतः ।
स३रि ग३म प३ध नि३ । (३)
एकान्तरस्वरारोहमाहुरभ्युच्चयं[1] बुधाः ॥ १९ ॥
सगपनि । (४)
यत्रैकोत्तरवृद्धाभिरावृत्तिभिरुदीरिताः ।
आरुह्यन्ते स्वराः प्राह हसितं तं शिवप्रियः ॥ २० ॥

स्वराणा दीर्घत्वाद्विलम्बितत्वाच्च क्रमाद्भेदः ॥ १६ ॥ ह्रस्वैरिति । ह्रस्वैः स्वरैर्द्विर्द्विरुक्तैः क्रमेणोच्चारितैर्निष्कर्षालकारः ॥ १६- ॥ त्रिरिति । स्वराणा त्रिश्चतुर्वोच्चारणे गात्रवर्णालकारः ॥ -१७ ॥ मतान्तरेण गात्रवर्णस्य निष्कर्षान्तर्भावमाह— निष्कर्षस्यैवेति । एतौ द्वौ भेदौ त्रिश्चतु स्वरोच्चारणरूपौ ॥ १७- ॥ प्लुतमिति । प्रथमस्वर त्रिरुच्चार्य द्वितीयस्वर सकृत्, तृतीयस्वर त्रिः, चतुर्थस्वर सकृत्, पञ्चमस्वर त्रिः, षष्ठस्वर सकृत्, सप्तमस्वर त्रिरुच्चारयेत्, तदा बिन्द्वाख्यो ऽलकारः ॥ -१८, १८- ॥ एकान्तरेति । एकान्तरस्वरारोहणेनाभ्युच्चयाख्यो ऽलकारः ॥ -१९ ॥ यत्रेति । यत्र स्वराणामेकोत्तरवृद्ध्या ऽऽवृत्तिः, प्रथमः स्वरः सकृत्, द्वितीयो द्वि, तृतीयस्त्रिः, चतुर्थश्चतुः, पञ्चमः पञ्चकृत्व, षष्ठः षट्कृत्व, सप्तमः सप्तकृत्व उच्चार्यते तमलकार शिवप्रिय शार्ङ्गदेवो हसितमिति

[1] ०रभ्युच्छ्रयम् .

स रिरि गगग मममम पपपपप धधधधध निनिनिनि-
निनिनि । (५)

स्वरद्वयं समुच्चार्य पूर्वं पूर्वयुतं परम् ।
यदान्दोलितमारोहेत्प्रेङ्खितो ऽसौ क्रमो ऽथ वा ॥ २१ ॥

सरि रिग गम मप पध धनि । (६)

एकान्तरं स्वरयुगं तादृक्पूर्वयुतं परम् ।
क्रमादारोहति यदा तदा ऽऽक्षिप्तं प्रचक्षते ॥ २२ ॥

सग गप पनि । (७)

त्रिस्वरा ऽऽद्या कला ऽन्ये च पूर्वपूर्वान्तिमादिमे ।
कले स्तस्त्रिस्वरे यत्र संधिप्रच्छादनस्तु सः ॥ २३ ॥

सरिग गमप पधनि । (८)

यदा ऽऽद्याद्यस्त्रिरावृत्तः कलयोस्त्रिस्वरात्मनोः ।
तदोद्गीतः

ससस्रिग मममपध । (९)

ब्रूते ॥ २० ॥ स्वरद्वयमिति । पूर्वं स्वरद्वयमुच्चार्य पर पूर्वयुतम्, पूर्वापेक्षया परो द्वितीय. स्वरस्तद्युत पर तृतीयमारोहेत् । पुनरपि तृतीययुत चतुर्थ चतुर्थयुत पञ्चम पञ्चमयुत षष्ठ षष्ठयुत सप्तममान्दोलयन्यदा ऽऽरोहति तदा ऽसावलकार' प्रेङ्खितनामा ऽथ वा क्रमनामा भवति ॥ २१ ॥ आक्षिप्त लक्षयति—एकान्तरमिति । पूर्वोक्तरीत्या यदैकान्तरं स्वरयुगमारोहति, प्रथमसहित तृतीयं तृतीयसहितं पञ्चमं पञ्चमसहित सप्तम यदा ऽऽरोहति तदा ऽऽक्षिप्तालकारः ॥२२॥ संधिप्रच्छादन लक्षयति—त्रिस्वरेति । आद्या कला त्रिस्वरा, अन्ये द्वे कले पूर्वपूर्वान्तिमादिमे, पूर्वस्या' पूर्वस्याः कलाया यो ऽन्तिमः स्वर' स आदिमो ययोस्ते तथाविधे त्रिस्वरे यस्मिन्स त्रिकलः सधिप्रच्छादनः ॥ २३ ॥ उद्गीत लक्षयति—यदेति । त्रिस्वरयोः कलयोर्यदा ऽऽद्याद्यः स्वरस्त्रिरावर्तते तदोद्गीता-

मध्यमेन तादृशोद्वाहितो मतः ॥ २४ ॥

सरिरिरिग मपपपध । (१०)

अन्त्यस्य तु त्रिरावृत्तौ त्रिवर्णं वर्णयन्त्यमुम् ।

सरिगगग मपधधध । (११)

त्रयाणां तु त्रिरावृत्तौ पृथग्वेणिरुदीरितः ॥ २५ ॥

ससस रिरिरि गगग, ममम पपप धधध । (१२)

इत्यारोह्यलकाराः ।

अवरोहक्रमादेते द्वादशाप्यवरोहिणि ।

इत्यवरोह्यलकारा ।

मन्द्रादिर्मन्द्रमध्यश्च मन्द्रान्तः स्यादतः परम् ॥ २६ ॥

प्रस्तारश्च प्रसादो ऽथ व्यावृत्तस्खलितावपि ।

परिवर्ताक्षेपबिन्दूद्वाहितोर्मिसमास्तथा ॥ २७ ॥

प्रेङ्खनिष्कूजितश्येनक्रमोद्घट्टितरञ्जिता. ।

संनिवृत्तप्रवृत्तो ऽथ वेणुश्च ललितस्वरः ॥ २८ ॥

ख्यो ऽलकारः । एतस्मिन्नलकारे मूर्च्छनाया' षडेव स्वरा व्याप्यन्ते । सप्तमस्य समाप्तिर्नास्ति ॥ २३- ॥ अधुनोद्वाहित वर्णयति—मध्यमेनेति । त्रिस्वरयोः कलयोर्मध्यमेन स्वरेण तादृशा त्रिरावृत्तेन तूद्वाहिताख्यो ऽलंकार' ॥ -२४ ॥ त्रिवर्ण लक्षयति—अन्त्यस्येति । त्रिस्वरयोः कलयोरन्त्यस्य त्रिरावृत्तौ त्रिवर्णाख्यो ऽलकारः ॥ २४- ॥ पृथग्वेणिमाचष्टे—त्रयाणामिति । त्रिस्वरयोः कलयोस्त्रयाणामपि स्वराणा त्रिरावृत्तौ पृथग्वेणिरलकारः । एतेषु त्रिष्वप्यलकारेषु सप्तस्वरावृत्तिर्नास्ति ॥ -२५ ॥ इत्यारोह्यलकारा' ॥ अवरोह्यलकारांल्लक्षयति—अवरोहेति । एत एवावरोहक्रमेणोच्चारिता अवरोह्यलकारा भवन्ति ॥ २५- ॥ इत्यवरोह्यलकाराः ॥ सचार्यलंकारान्परिगणयति—मन्द्रादिरिति । मन्द्राद्यादयः

हुंकारो ह्रादमानश्च ततः स्यादवलोकित. ।
स्युः संचारिण्यलंकाराः पञ्चविंशतिरित्यमी ॥ २९ ॥
त्रिस्वरा ऽद्या कलैकैकमन्द्रत्यागेन चापराः ।
त्रिस्वराश्चेत्कला मन्द्राद्या मन्द्रादिस्तदा भवेत् ॥ ३० ॥
सगरि रिमग गपम मधप पनिध । (१)
ताः कला मन्द्रमध्यान्ताः क्रमाच्चेदपरौ तदा ।
मन्द्रमध्यो यथा—
गसरि मरिग पगम धमप निपध । (२)
मन्द्रान्तो यथा—
रिगस गमरि मपग पधम धनिप । (३)
त्यक्तान्तरं स्वरयुग त्यक्तादारभ्यते पुनः ॥ ३१ ॥
युगं तादृक्समारोहेत्तदा प्रस्तार उच्यते ।
सग रिम गप मध पनि । (४)
पूर्वः पूर्वः परस्योर्ध्वाधोवर्ती क्रियते स्वरः ॥ ३२ ॥

पञ्चविंशतिरलंकारा' सचारिणः ॥ -२६-२९ ॥ तत्र मन्द्रादि लक्षयति—त्रिस्वरेति । आद्या कला त्रिस्वरा प्रथमतृतीयद्वितीयस्वरयुक्ता, अन्या अपि मन्द्राद्याः कला एकैकमन्द्रत्यागेन यदि भवन्ति तदा मन्द्रादिरलंकारः ॥ ३० ॥ मन्द्रमध्यमन्द्रान्तौ लक्षयति—ता इति । तास्वेव पञ्चसु कलासु मन्द्रो मध्ये भवति चेन्मध्यश्चादौ तदा मन्द्रमध्यो ऽलंकार' । तास्वेव मन्द्रो ऽन्ते भवति चेदन्तिमश्चादौ तदा मन्द्रान्तो ऽलंकारः ॥ ३०- ॥ प्रस्तार लक्षयति—त्यक्तान्तरमिति । त्यक्तान्तर स्वरयुग प्रथमतृतीयस्वरयुगमारुह्य त्यक्ताद् द्वितीयस्वरादारभ्य तादृक्त्यक्तान्तर स्वरयुग द्वितीयचतुर्थस्वरयुगम्, एव तृतीयपञ्चमस्वरयुग चतुर्थषष्ठस्वरयुग पञ्चमसप्तमस्वरयुगं च यद्यारोहति तदा प्रस्ताराख्यो ऽलंकारः ॥ -३१, ३१- ॥ प्रसादं लक्षयति । पूर्व इति । पूर्व पूर्वः स्वरः

यदा तदा प्रसादं तमाह श्रीकरणेश्वरः ।

सरिस रिगरि गमग मपम पधप धनिध । (५)

चतुःस्वरा कला तत्राद्यात्तृतीयं द्वितीयकात् ॥ ३३ ॥

तुर्यं गत्वा ऽऽदिमं गच्छेदेवमेकैकहानतः ।

चतुःस्वराः परा यत्र स व्यावृत्तः स्मृतो बुधैः ॥ ३४ ॥

सगरिमस रिमगपरि गपमधग मधपनिम । (६)

कलां प्रयुज्य मन्द्रादेर्द्विरुक्तोर्ध्वस्वरान्विताम् ।

अवरुह्येत चेदेष स्खलिताख्यस्तदा भवेत् ॥ ३५ ॥

सगरिममरिगस रिमगपपगमरि गपमधधमपग

मधपनिनिपधम । (७)

स्वरं द्वितीयमुज्झित्वा त्रिस्वरा ऽऽद्या कला यदि ।

त्यक्तादारभ्य तादृश्यो ऽन्यास्तदा परिवर्तकः ॥ ३६ ॥

सगम रिमप गपध मधनि । (८)

त्रिस्वराश्चेत्कला पूर्वपूर्वत्यागोर्ध्वसंक्रमैः ।

परस्य द्वितीयस्वरस्योर्ध्वाधोवर्त्याद्यन्तवर्ती यदि क्रियते तदा प्रसादाख्यो ऽलकार ॥ -३२, ३२- ॥ व्यावृत्त लक्षयति—चतुःस्वरेति । एतस्मिन्कला चतु स्वरा । तस्या प्रथमतृतीयद्वितीयचतुर्थाद्याः स्वरा उच्चार्या, प्रथमस्वरपरित्यागेनान्यदेवमेव कलात्रय यत्र स व्यावृत्ताख्यो ऽलकारः ॥ -३३, ३४ ॥ स्खलित लक्षयति—कलामिति । मन्द्रादेरलकारस्य प्रथमतृतीयद्वितीयस्वरयुक्ता त्रिस्वरा कला प्रयुज्योर्ध्व स्वर चतुर्थ स्वर द्विरुच्चार्य सकलावरोहेण चेदुच्चार्येत तदा ऽष्टस्वरकलः स्खलिताख्यो ऽलकार ॥ ३५ ॥ परिवर्तक लक्षयति—स्वरमिति । द्वितीयस्वरमुज्झित्वा प्रथमतृतीयचतुर्थस्वरैस्त्रिस्वरा प्रथमा कला, त्यक्ताद् द्वितीयस्वरादारभ्यैवमेवान्याः कला यत्र स परिवर्तकाख्यो ऽलकारः ॥३६॥ आक्षेप लक्षयति—त्रिस्वरा इति । त्रिस्वराः कलाः पूर्वपूर्वपरित्यागेनोर्ध्वस्वर-

तदा ऽऽक्षेपः

सरिग रिगम गमप मपध पधनि । (९)

अथ बिन्दुः स यत्र प्लुतमधःस्वरम् ॥ ३७ ॥

कृत्वा ऽग्निवत्परं स्पृष्ट्वा ऽधः स्पर्शेनाखिलाः कलाः ।

स३रिस रि३गरि ग३मग म३पम प३धप ध३निध । (१०)

कलायां त्रीन्स्वरान्गीत्वा ऽवरुह्यैकं पराः कलाः ॥ ३८ ॥

यत्रैकैकोज्झिता गीतास्तद्वदुद्वाहितस्तु सः ।

सरिगरि रिगमग गमपम मपधप पधनिध । (११)

मूर्च्छनाऽऽदेः स्वरात्तुर्यं प्लुतीकृत्याद्यमेत्य च ॥ ३९ ॥

तुर्यगाने कलैकैकहानाद्यत्रापरास्तथा ।

स ऊर्मिः स्यात्

सम३सम रिप३रिप गध३गध मनि३मनि । (१२)

स तु समः कला यत्र चतुःस्वराः ॥ ४० ॥

व्याप्त्या च यदि क्रियन्ते तदा ऽऽक्षेपालंकारः ॥ ३६- ॥ बिन्दु लक्षयति—अथ बिन्दुरिति । अधःस्वर पूर्वस्वरं प्लुत कृत्वा त्रिरुच्चार्य पर द्वितीयमग्निवत्सकृत्स्पृष्ट्वा ऽऽद्यः सकृदुच्चारणीयः । एव द्वितीयस्वराद्याः पञ्चस्वराः कला यत्र स बिन्द्वाख्यो ऽलंकारः ॥ -३७, ३७- ॥ उद्वाहित लक्षयति—कलायामिति । त्रीन्स्वरान्गीत्वैक स्वरमवरोहेत्, पूर्वस्वरपरित्यागेनैवमेव द्वितीयस्वराद्या अन्याः कलास्तदोद्वाहिताख्यो ऽलकारः ॥ -३८, ३८- ॥ ऊर्मि लक्षयति—मूर्च्छनाऽऽदेरिति । मूर्च्छनाऽऽदे स्वरात्तुरीय चतुर्थ स्वर प्लुतीकृत्य त्रिरुच्चार्याद्य सकृद्गीत्वा पुनरपि चतुर्थं स्वर सकृद्गायेत, प्रथमस्वरपरित्यागेन चैवमेवान्याः कला यत्र स ऊर्म्यलकारः ॥ -३९, ३९- ॥ सम लक्षयति—स तु सम इति । यस्मिन्कलाया चत्वारः स्वराः क्रमेणारुह्यन्ते ऽवरुह्यन्ते च, अन्या अपि

[1] ऽग्रिमस्वर.

तुल्यारोहावरोहैकैकहानादपरास्तथा ।
सरिगममगरिस रिगमपपमगरि गमपधधपमग मपधनिनि-
धपम । (१३)
कला गतागतवती द्विस्वरैकैकहानतः ॥ ४१ ॥
यत्रान्यास्तादृशः स स्यात्प्रेङ्खः
सरिरिस रिगगरि गममग मपपम पधधप धनिनिध । (१४)
निष्कूजितः पुनः ।
प्रसादस्य कलां गीत्वा तत्कलाऽऽदेस्तृतीयकम् ॥ ४२ ॥
गत्वा ऽऽद्यगानाद्भवति
सरिसगस रिगरिमरि गमगपग मपमधम पधपनिप । (१५)
श्येनः संवादियुग्मकैः ॥ ४३ ॥
क्रमात्सरिगमाद्यैः स्यात्
सप रिध गनि मस । (१६)
कला द्वित्रिचतुःस्वराः ।
आद्यस्वराद्यास्तिस्रः स्युर्द्वितीयाद्यादयस्तथा ॥ ४४ ॥
यत्रासौ क्रम इत्युक्तः

कलाः प्रथमैकैकस्वरपरित्यागेन, स समाख्यो ऽलकार' ॥ -४०, ४०- ॥ प्रेङ्ख लक्षयति—कलेति । द्विस्वरा कला, गतागते आरुह्यते ऽवरुह्यते चेत्यारोहावरोहौ तद्वती, प्रथमैकैकस्वरपरित्यागाच्चान्याः कला यत्र स प्रेङ्खो ऽलकार' ॥ -४१, ४१- ॥ निष्कूजित लक्षयति—निष्कूजित इति । प्रसादालकारस्य कला प्रथम-द्वितीयस्वरयुक्ता गीत्वा ऽऽदिस्वरात्तृतीय तत आद्य यदि गायेत्तदा निष्कूजिता-लकार' ॥ -४२, ४२- ॥ श्येन लक्षयति—श्येन इति । सवादिना युग्मचतुष्टयेन षड्जर्षभगाधारमध्यमादिना श्येनालकार । अत्र षड्जपञ्चमयोर्ऋषभधैवतयो-र्गाधारनिषादयोर्मध्यमषड्जयोश्च युग्मचतुष्टयम् ॥ -४३, ४३- ॥ क्रमाख्यमलकार

सरिसरिगसरिगम रिगरिगमरिगमप गमगमपगमपध
मपमपधमपधनि । (१७)

स तूद्घट्टित उच्यते ।

यत्र स्वरद्वयं गीत्वा पञ्चमाच्चतुरः स्वरान् ॥ ४५ ॥
अवरोहेत्कला गायेत्तथैकैकोज्झनात्पराः ।
सरिपमगरि रिगधपमग गमनिधपम । (१८)

द्विरुक्ता यदि मन्द्रान्ता मन्द्रादेः स्युः कलास्तदा ॥ ४६ ॥
रञ्जितः
सगरिसगरिस रिमगरिमगरि गपमगपमग मधपमधपम
पनिधपनिधप । (१९)

अथ भवेदेष संनिवृत्तप्रवृत्तकः ।
यत्राद्यपञ्चमौ गीत्वा तुर्यात्त्रीनवरोहति ॥ ४७ ॥
क्रमात्कला सा यत्रान्यास्तद्वदेकैकहानतः ।
सपमगरि रिधपमग गनिधपम । (२०)

लक्षयति—कला इति । प्रथमस्वरमारभ्य तिस्रः कला गेयाः । एका द्विस्वरा, एका त्रिस्वरा, एका चतुःस्वरा । एव द्वितीयतृतीयचतुर्थस्वरमारभ्य तिस्रः कला यत्र गीयन्ते स क्रमाख्यो ऽलकार ॥ -४४, ४४- ॥ उद्घट्टित लक्षयति—स त्विति । आदित आरभ्य स्वरद्वय गीत्वा पञ्चमस्वराच्चतुरः स्वरानवरोहेत् , एव द्वितीय तृतीय च स्वरमारभ्येत्येव कलात्रय यत्र स उद्घट्टिताख्यो ऽलकारः ॥ ४५, ४५- ॥ रञ्जित लक्षयति—द्विरुक्ता इति । मन्द्रादे. प्रथमतृतीयद्वितीयस्वर-युक्तस्य कला यदि द्विरुच्चार्यते, अन्ते च मन्द्रो मूर्च्छनाप्रथमस्वरो निक्षिप्यते, तदा रञ्जिताख्यो ऽलकार ॥ -४६, ४६- ॥ सनिवृत्तप्रवृत्तक लक्षयति-- अथ भवेदिति । यत्र प्रथम पञ्चम च स्वर गीत्वा तुर्यात्स्वरात्त्रीन्स्वरानवरोहेण गायेत्, एवमेका कला, प्रथमैकैकस्वरपरित्यागाच्चान्यत्कलाद्वयम् , स सनिवृत्तप्रवृत्ताख्यो

यत्राद्यः स्याद् द्विर्द्वितीयचतुर्थकतृतीयकाः ॥ ४८ ॥
सकृत्कला ऽन्याश्चैकैकहानाद्वेणुरसौ मतः ।
ससरिमग रिरिगपम गगमधप ममपनिध । (२१)
गीत्वा ऽऽद्यौ द्वौ चतुर्थं च यस्यां तावववरोहति ॥ ४९ ॥
सा कला ऽन्याश्च तादृश्यो यत्रासौ ललितस्वरः ।
सरिमरिस रिगपगरि गमधमग मपनिपम । (२२)
आदिमेन कला यत्र द्विस्वरा ऽऽद्या गतागतैः ॥ ५० ॥
स्वरैरेकोत्तरं वृद्धैः स हुकारो निगद्यते ।
सरिस सरिगरिस सरिगमगरिस सरिगमपमगरिस
सरिगमपधपमगरिस सरिगमपधनिधपमगरिस । (२३)
ह्रादमाने प्रसन्नान्ता मन्द्रादेस्तु कला मताः ॥ ५१ ॥
सगरिस रिमगरि गपमग मधपम पनिधप । (२४)
यदा ऽऽरोहे ऽवरोहे च स्वद्वितीयं परित्यजेत् ।

ऽलकार' -४७, ४७- ॥ वेणु लक्षयति—यत्रेति । यस्मिन्नाद्यः स्वरो द्विर्गीयते, द्वितीयचतुर्थतृतीयस्वराश्च सकृद्गीयन्ते सैका कला, प्रथमैकैकस्वरपरित्यागाच्चान्याः कलाः, स वेणुरलकार' ॥ -४८, ४८- ॥ ललितस्वर लक्षयति—गीत्वेति । प्रथमस्वरद्वय गीत्वा तदनन्तर चतुर्थ गीत्वा तौ प्रथमद्वितीयाववरोहेत् । सैका कला भवति । अन्याश्च द्वितीयतृतीयतुर्यस्वराद्यास्तिस्र कला' । स ललित-स्वराख्यो ऽलकार ॥ -४९, ४९- ॥ हुकार लक्षयति—आदिमेनेति । आदिमेन प्रथमेन स्वरेण द्विस्वरा कला गतागतैरारोहावरोहै , ततस्त्रिस्वरा, ततश्चतुःस्वरा, ततः पञ्चस्वरा, ततः षट्स्वरा, ततः सप्तस्वरा, आरोहावरोहैर्यत्र गीयन्ते स हुकाराख्यो ऽलकार ॥ -५०, ५०- ॥ ह्रादमान लक्षयति—ह्रादमान इति । मन्द्रादे' प्रथमद्वितीयतृतीयस्वरयुक्तस्य प्रसन्नान्ता. प्रथमस्वरान्ता कला यदि गीयन्ते तदा ह्रादमानाख्यो ऽलकारः ॥ -५१ ॥ अवलोकित लक्षयति—यदेति ।

चतुःस्वरा समकला तदा स्यादवलोकितः ॥ ५२ ॥
सगममरिस रिमपपगरि गपधधमग मधनिनिपम । (२५)
एवं संचार्यलंकारा आरोहेण प्रदर्शिताः ।
एतानेवावरोहेण प्राह श्रीकरणाग्रणीः ॥ ५३ ॥

इति सचार्यलंकाराः ।

अन्ये ऽपि सप्तालंकारा गीतज्ञैरुपदर्शिताः ।
तारमन्द्रप्रसन्नश्च मन्द्रतारप्रसन्नकः ॥ ५४ ॥
आवर्तकः संप्रदानो विधूतो ऽप्युपलोलकः ।
उल्लासितश्चेति तेषामधुना लक्ष्म कथ्यते ॥ ५५ ॥
कलास्तेषां द्वितीयाद्याः पूर्वैकैकप्रहाणतः ।
अष्टमस्वरपर्यन्तमारुह्याद्यं व्रजेद्यदि ॥ ५६ ॥
तारमन्द्रप्रसन्नो ऽयमलंकारस्तदोच्यते ।
संरिगमपधनिसंसं । (१)
मन्द्रादष्टममुत्प्लुत्य सप्तकस्यावरोहणे ॥ ५७ ॥

यदा चतुःस्वरा समालंकारस्य कला ऽऽरोहे ऽवरोहे च द्वितीयस्वर परित्यजति तदा ऽवलोकिताख्यो ऽलंकारः ॥ ५२ ॥ एवमिति । एवमनेन प्रकारेण सचार्यलंकारा आरोहेण कथिताः । एतान्श्रीकरणाग्रणी शार्ङ्गदेवो ऽवरोहेणापि प्राह कथितवान् ॥ ५३ ॥ इति सचार्यलंकाराः ॥ गीतज्ञै प्रदर्शितालोकप्रसिद्धानन्यान्सप्तालंकारान्कथयति—अन्ये ऽपीति ॥ ५४, ५५ ॥ लाघवार्थं सर्वेषा साधारण लक्षणमाह—कलास्तेषामिति । एतेषा प्रथमकलालक्षणमेव वक्ष्यति—द्वितीयस्वराद्याः पूर्वैकैकस्वरपरित्यागात्कला ज्ञातव्याः ॥ ५५- ॥ तारमन्द्रप्रसन्नादि विशदयति —अष्टमस्वरेति । प्रथमस्वरमारभ्याष्टमस्वरपर्यन्तमारोहेण गीत्वा प्रथमस्वर यदि गायेत्तदा तारमन्द्रप्रसन्नाख्यो ऽलंकारः ॥ -५६, ५६- ॥ मन्द्रतारप्रसन्नं

मन्द्रतारप्रसन्नाख्यमाह माहेश्वरोत्तमः ।

संसनिधपमगरिसं । (२)

आद्यं द्वितीयमाद्यं च द्विर्द्विर्गीत्वा द्वितीयकम् ॥ ५८ ॥

सकृदाद्यं यत्कलायां गायेदावर्तकस्तु सः ।

ससरिरिससरिस रिरिगगरिरिगरि गगममगगमग ममपप-
ममपम पपधधपपधप धधनिनिधधनिध । (३)

एतस्यैव कला ऽन्त्यौ द्वौ स्वरौ संत्यज्य गीयते ॥ ५९ ॥

यदा तदा संप्रदानमलंकारं विदुर्बुधाः ।

ससरिरिसस रिरिगगरिरि गगममगग ममपपमम पपधधपप
धधनिनिधध । (४)

युग्ममेकान्तरितयोस्त्यक्तादप्येवमेव चेत् ॥ ६० ॥

द्विर्द्विः प्रयुज्येत तदा विधूतो बुधसंमतः ।

सगसग रिमरिम गपगप मधमध पनिपनि । (५)

कलायामाद्ययोर्युग्मं चेत्तृतीयद्वितीययोः ॥ ६१ ॥

लक्षयति—मन्द्रादिति । मन्द्रादष्टमस्वर गीत्वा यदि सप्त स्वरा अवरोहेण गीयन्ते तदा मन्द्रतारप्रसन्नाख्यो ऽलकारः ॥-५७, ५७-॥ आवर्तक लक्षयति—आद्यमिति । आद्य स्वर द्वितीय पुनराद्य च द्विर्द्विवार गीत्वा पुनर्द्वितीयमाद्य च यदि सकृद्गायेत्तदा ऽऽवर्तकाख्यो ऽलकार· ॥ -५८,५८- ॥ सप्रदान लक्षयति—एतस्यैवेति । एतस्यावर्तकस्यान्त्य स्वरद्वय विहाय यदि कला गीयन्ते तदा सप्रदानाख्यो ऽलकारः ॥ -५९,५९- ॥ विधूतालकार लक्षयति—युग्ममिति । एकान्तरित स्वरद्वय द्विर्गायेत्, त्यक्तमारभ्यैकान्तरित स्वरद्वय द्विर्गायेत्, एव चतुःस्वरः पञ्चकलो विधूताख्यो ऽलकार· ॥ -६०,६०- ॥ उपलोल लक्षयति—कलायामिति । प्रथमस्वरयोर्युग्म द्विर्गीत्वा तृतीयद्वितीयस्वरयोर्युग्म द्विर्गीयते यदा

द्विर्द्विः प्रयुज्यते तज्ज्ञैरुपलोलस्तदोच्यते ।

सरिसरिगरिगरि रिगरिगमगमग गमगमपमपम मपमपधपधप
पधपधनिधनिध । (६)

द्विर्गीत्वा ऽऽद्यं तृतीयं च प्रथमं च तृतीयकम् ॥ ६२ ॥
सकृद्गायेद्यत्कलायां तमुल्लासितमूचिरे ।

ससगसग रिरिमरिम गगपगप ममधमध पपनिपनि । (७)

इति सप्तालकारा. ।

इति प्रसिद्धालंकारास्त्रिषष्टिरुदिता मया ॥ ६३ ॥
अनन्तत्वात्तु ते शास्त्रे न सामस्त्येन कीर्तिता ।
रक्तिलाभः स्वरज्ञानं वर्णाङ्गानां विचित्रता ॥ ६४ ॥

इति प्रयोजनान्याहुरलंकारनिरूपणे ।

तदोपलोलाख्यो ऽलकार ॥ -६१,६१- ॥ उल्लासित लक्षयति—द्विरिति । यस्य कलायामाद्य स्वर द्विर्गीत्वा तृतीय प्रथम पुनस्तृतीय च सकृद्गीयते तमुल्लासितमूचिरे सगीताचार्या ॥ ६२, ६२- ॥ इति सप्तालकारा. ॥ समस्तालकारकथनमशक्यमित्याह—इतीति ॥ -६३, ६३- ॥ अलकारप्रयोजनमाह—रक्तिलाभ इति । स्वराणा रञ्जकत्वज्ञान स्वरूपज्ञान स्थाय्यादिवर्णाना वैचित्र्य चालकारनिरूपणे प्रयोजनम् ॥ -६४, ६४- ॥

इति प्रथमे स्वरगताध्याये षष्ठ वर्णालकारप्रकरणम् ॥ ६ ॥

अथ सप्तमं जातिप्रकरणम्

शुद्धाः स्युर्जातय सप्त ताः षडजादिस्वराभिधाः ।
षाड्ज्यार्षभी च गांधारी मध्यमा पञ्चमी तथा ॥ १ ॥
धैवती चाथ नैषादी शुद्धतालक्ष्म कथ्यते ।
यासां नामस्वरो न्यासो ऽपन्यासो ऽंशो ग्रहस्तथा ॥ २ ॥
तारन्यासविहीनास्ताः पूर्णाः शुद्धाभिधा मताः ।

(क०) गानक्रियाऽऽत्मकवर्णालंकारनिरूपणानन्तरमलंकार्यतया प्रतीत-गीताद्यनुगतत्वेन प्रसक्ताना जातीना लक्षणमुद्दिष्ट विवेक्तुकामस्तल्लक्ष्यत्वेना-क्षिप्ता जाती. सप्रभेदं लक्षयितुमुद्दिशति—**शुद्धाः स्युरित्यादिना । जातय** इति । यथायोगं ग्रामद्वयाज्जायन्त इति जातय । अत एवानित्यतया साकल्येन सामान्यरूपजातिलक्षणाभावे ऽप्यनेकगेयव्यक्तिष्वनुवृत्तत्वमात्रेण गोत्वादिजातिवज्जातय इति वा, गीतजातं तस्योपरञ्जन वा ऽऽभ्यो जायत इति जातय इति वा जातिशब्दव्युत्पत्तिर्मतङ्गाद्यभिमता द्रष्टव्या । जातयः शुद्धा वक्ष्यमाणशुद्धत्वलक्षणोपेता सप्त स्यु । ताः षड्जादिस्वराभिधा. , षड्जादिस्वराणामभिधा इवाभिधा यासा ता इत्युपमानपूर्वपदो बहुव्रीहि , यद्वा षड्जादिस्वरवाचका षड्जादिशब्दा प्रकृतित्वेनाभिधा संज्ञा यासां ता । अत्राभिधाशब्दस्यावृत्ति कर्तव्या । तथैवोद्दिशति—**षाड्जीत्या-दिना** । तासा शुद्धत्व किमित्यत आह—**शुद्धतालक्ष्मेति** । यासा षाड्ज्या-दीना नामस्वरः षड्जादिरेव वक्ष्यमाणलक्षणन्यासत्वाद्यवस्थाऽऽपन्नो भवति, याश्च तारन्यासविहीनास्तारस्थाने न्यासरहिता इति विशेषनिषेध· शेषाभ्यनुज्ञा गमयतीति मन्द्रमध्यस्थानयोर्यथायोगं न्यासविधिरिष्यते । यदपि भरतेन 'न्यासः शुद्धासु मन्द्रे स्यात्' इत्युक्तं तत्तारनिषेधपर द्रष्टव्यम् । अन्यथा

विकृता न्यासवर्जैतल्लक्ष्महीना भवन्त्यमूः ॥ ३ ॥

षाड्ज्या मध्यषड्जन्यासत्वं मतङ्गोक्तं लक्ष्ये विरुध्येत । पूर्णा. सप्तस्वरयुक्ता· । शुद्धाभिधा शुद्धा इति संज्ञा यासा ता ॥ १—२- ॥

(सु०) जातीर्निरूपयति—**शुद्धाः स्युरिति** । शुद्धाः सप्त जातयो भवन्ति । तासा कि नामेत्यपेक्षायामाह—**ता· षड्जादिस्वराभिधा** इति । षड्जादय· सप्त स्वरास्तासा नाम्नि कारणभूताः । तासा तान्येव स्वरसबन्धीनि नामानि कथयति—**षाड्जीति** । तासा शुद्धतालक्षण प्रतिज्ञाय कथयति—**शुद्धतेति** । यासा जातीना नामस्वर एव न्यासो ऽपन्यासो ऽंशो ग्रहश्च भवति, न्यासस्वरश्च तारो न भवति ता· शुद्धा जातयो ज्ञातव्या· । न्यासादिलक्षण वक्ष्यति ॥१—२-॥

(क०) अमू शुद्धाः षाड्ज्यादय एव । **न्यासवर्जैतल्लक्ष्महीना** इति । जातीना शुद्धतायामभिहितेषु नामस्वरस्यैव न्यासापन्यासाशग्रहत्वेषु ससपूर्णत्वेषु पञ्चसु लक्षणेषु मध्ये न्यासवर्ज न्यासनियमस्यैकस्य सङ्ग परिहृत्यैतल्लक्ष्मभिरपन्यासाशग्रहपूर्णत्वैर्हीना नियतैरेतैर्वर्जिता । अयमर्थ·— नामस्वरमेव न्यासं कृत्वा ऽपन्यासादीन्स्वरान्तराणि कुर्यादिति । एव कृता यदि, तदा विकृता विकृतावस्थाऽऽपन्ना भवन्ति, न तु विकृतससर्गजात-जातिवद्व्यपदेशान्तरभाज इत्यर्थ । अत्र न्यासनियमस्य परित्यागो नेष्ट , तस्मिन्नपि परित्यक्ते सति विकृतासु जात्यन्तरभेदकत्वेन प्रधानभूतावयवाननु-वृत्तौ तासा तत्तच्छुद्धजातिभेदत्वप्रतीतिर्न स्यात् ॥ -३ ॥

(सु०) विकृता जातीः कथयति—**विकृता** इति । न्यास विनोक्तलक्षण-हीना विकृता । न्यासलक्षणहीनत्व तारन्यासत्वम् । तत्कि विकृताना न संभवति ? न । तदुक्त मतङ्गेन—'याः शुद्धास्तासु नामकारी न्यासो नियमेन मन्द्रो भवति, या विकृतास्तासु नामकारी मन्द्रो भवतीत्यनियमः । तत्र शुद्धाना

संपूर्णत्वग्रहांशापन्यासेष्वेकैकवर्जनात् ।
भवन्ति भेदाश्चत्वारो द्वयोस्त्यागे तु षण्मताः ॥ ४ ॥
त्यागे त्रयाणां चत्वार एकस्त्यक्ते चतुष्टये ।
भेदाः पञ्चदशैवैते षाड्ज्याः सद्भिर्निरूपिताः ॥ ५ ॥
तत्राष्टौ पूर्णताहीनाः सप्त त्वितरवर्जिताः ।
द्विधा स्युः पूर्णताहीनाः षाडवौडुवभेदतः ॥ ६ ॥
अतो ऽष्टावधिका आर्षभ्यादिष्वौडुवजातिषु ।
अतस्त्रयोविंशतिधा षट्सु प्रत्येकमीरिताः ॥ ७ ॥

जातीना शुद्धत्व विकृतत्व च रूपद्वयमस्ति, षड्जकैशिक्यादीनामेकादशजातीना तु विकृतत्वमेव, न शुद्धत्वम् ।' इति । जातिशब्दव्युत्पत्तिस्तु मतङ्गेनोक्ता— 'श्रुतिस्वरग्रामसमूहाज्जायन्त इति जातय , यद्वा ग्रहादिभ्यो जायन्त इति जातय', अथ वा जायते रसप्रतीतिराभ्य इति जातय., यद्वा सकलस्य रागादेर्जन्महेतुत्वाज्जातयः, अथ वा यथा नराणा ब्राह्मणत्वादयो जातय' शुद्धा विकृताश्च, एवमेता अपीति जातयः ॥' इति ॥ -३ ॥

(क०) न्यासव्यतिरिक्तसंपूर्णत्वादिषु चतुर्षु लक्षणेष्वेकद्व्यादिपरित्यागेन संभूतान्भेदान्षाडज्यादिषु यथासभवं परिगणयति—**संपूर्णत्वेत्यादिना**। एकैकवर्जनादिति संपूर्णत्वादीना स्वरूपनिषेधो न क्रियते, जात्यनुत्पत्तिप्रसङ्गात्, अपि तु नियतस्वरपर्युदासात्स्वरान्तरविधिर्विज्ञायते । **भवन्ति भेदाश्चत्वार** इति । सपूर्णत्ववर्जने कृते ग्रहाशापन्यासयुक्त एक , ग्रहवर्जने सपूर्णत्वाशापन्यासवान्द्वितीय , अशवर्जने सपूर्णत्वग्रहापन्यासवास्तृतीय , अपन्यासवर्जने सपूर्णत्वग्रहाशयुक्तश्चतुर्थो भेद , इति चत्वारो भेदा । **द्वयोस्त्यागे तु षण्मता** इति । संपूर्णत्वग्रहाभ्या सपूर्णत्वाशाभ्या संपूर्णत्वापन्यासाभ्या ग्रहाशाभ्या ग्रहापन्यासाभ्यामशापन्यासाभ्या त्यक्ताभ्या षड्

भेदा भवन्ति । **त्यागे त्रयाणां चत्वार** इति । सपूर्णत्वग्रहाशै· सपूर्णत्व-ग्रहापन्यासै· संपूर्णत्वाशापन्यासैर्ग्रहाशापन्यासैस्त्यक्तैश्चत्वारो भेदा । चतुष्टये त्यक्त एको भेद इत्येते पञ्चदशैव भेदा षाड्ज्या निरूपिता· ॥ संपूर्ण-ताहीनानामवान्तरभेदं वक्तु विभजते—**तत्राष्टाविति** । तत्र पञ्चदशसु मध्ये ऽष्टौ भेदा पूर्णताहीना सपूर्णत्वरहिता । सप्त त्वितरवर्जिता । संपूर्णत्व-युक्तत्वे सतीतरेषु ग्रहाशापन्यासेषु यथायोगमेकेन द्वाभ्या त्रिभिर्वा वर्जिता द्विधा स्यु· । पूर्णताहीना अष्टौ भेदा षाडवौडुवभेदतो द्विधा स्यु षोडश भवन्तीत्यर्थ । ननु पूर्णताहीनाना भेदाना चतु स्वरादिभिरपि भेदैः सह षड्विधत्वे संभवति कथं द्वैविध्यमिति चेत्, उच्यते—पूर्णताहीना इत्यनेन चतु स्वरादीना च प्रतीतौ सत्यामपि नञिवयुक्तन्यायेन जातिरागसंपाद-कत्वात्संपूर्णत्वसदृशप्रतिपत्त्या षाडवौडुवयोरेवात्र ग्रहणमिति । चतु स्वर-प्रयोगस्तु भरतेनापकृष्टध्रुवायामेवोक्त । त्रिस्वरादीना प्रयोगस्तु सामव्य-तिरिक्तगादौ[1] द्रष्टव्य· । षाड्ज्यपेक्षया ऽऽर्षभ्यादिषु षट्सु जातिषु भेदा-धिक्य दर्शयति—**अतो ऽष्टाविति** । अतो ऽस्या पूर्णताहीनेषु षोडशस्वष्टा-भिरेव षाडवभैदै पूर्णतायुक्तैरितरवर्जितै· सप्तभि सह पञ्चदशभेदवत्त्वे-नोक्ताया षाड्ज्या इतरास्वार्षभ्यादिष्वौडुवजातिष्वौडुवावस्थया ऽपि युक्ता-स्वष्टावौडुवभेदा अधिका । अत कारणात्ता आर्षभ्यादय षड् जातय· प्रत्येकं त्रयोविशतिधेरिता इति सप्तसु जातिषु विकृतभेदा मिलितास्त्रिपञ्चा-शदुत्तरं शत भवन्ति ॥ ४—७ ॥

(सु०) विकृतभेदान्गणयति— संपूर्णत्वेति । शुद्धजातीना चत्वारि लक्षणानि—नामस्वग्रहत्व नामस्वराशत्व नामस्वरापन्यासत्व सपूर्णत्व चेति । तत्र संपूर्णत्वपरित्यागेनैको विकृतभेद·, ग्रहपरित्यागेनैक·, अशपरित्यागेनैकः,

[1] सामगाधर्क्षु

विकृतानां तु संसर्गाज्जाता एकादश स्मृताः ।
स्यात्षड्जकैशिकी षड्जोदीच्यवा षड्जमध्यमा ॥ ८ ॥
गांधारोदीच्यवा रक्तगांधारी कैशिकी तथा ।
मध्यमोदीच्यवा कार्मारवी गांधारपञ्चमी ॥ ९ ॥
तथा ऽऽन्ध्री नन्दयन्तीति तद्धेतूनधुना ब्रुवे ।
षाड्जीगांधारिकायोगाज्जायते षड्जकैशिकी ॥ १० ॥

अपन्यासपरित्यागेनैकः, एवमेकैकपरित्यागे चत्वारो भेदा' । सपूर्णत्वग्रहपरित्यागेनैक', सपूर्णत्वाशपरित्यागेनैकः, सपूर्णत्वापन्यासपरित्यागेनैक , ग्रहाशपरित्यागेनैक', ग्रहापन्यासपरित्यागेनैकः, अशापन्यासपरित्यागेनैक , एव लक्षणद्वयपरित्यागे षड् भेदा विकृता भवन्ति । सपूर्णत्वग्रहाशपरित्यागेनैक', सपूर्णत्वग्रहापन्यासपरित्यागेनैक', सपूर्णत्वाशापन्यासपरित्यागेनैक , ग्रहाशापन्यासपरित्यागेनैक', एव लक्षणत्रयपरित्यागे चत्वारो भेदा विकृता भवन्ति । लक्षणचतुष्टयपरित्याग एक एव भेद' । एव षाड्ज्या पञ्चदश भेदा भवन्ति । तेषु पूर्णताहीना अष्टौ, इतरलक्षणहीना सप्त । षाड्ज्या षाडवत्वेनैवासपूर्णत्वम् । अन्यासा षाडवत्वेनौडुवितत्वेन च भेदाधिक्य कथयितुमाह—द्विधा स्युरिति । पूर्णताहीना भेदाः षट्स्वरत्वेन पञ्चस्वरत्वेन च द्विविधा । अत आर्षभ्यादिषु षट्सु जातिष्वष्टौ भेदा अधिका विकृता भवन्ति । अत प्रत्येक तासा त्रयोविशतिर्विकृता भेदाः । एतासा मिलिता विकृतभेदास्त्रिपञ्चाशदधिक शत भवन्ति ॥ ४—७ ॥

(क०) उक्तविकृतभेदसंसर्गोत्पन्नाना व्यपदेशान्तरभाजा विकृतजातीना संख्यामाह—**विकृतानां त्विति** । तुशब्दो भिन्नक्रम'—विकृताना ससर्गाज्जातास्त्विति । उक्ता विकृता शुद्धजातीनामेवावस्थाऽन्तराणि, एताः पुनस्तद्विकृतभेदससर्गोत्पन्नत्वान्न तथेति तुशब्दार्थ ॥ ता उद्दिश्य तासा निमित्तभूतं विकृतावस्थाऽऽपन्नषाड्ज्यादिसंसर्गं दर्शयति—**स्यात्षड्जकै-**

षाड्जिकामध्यमाभ्यां तु जायते षड्जमध्यमा ।
गांधारीपञ्चमीभ्यां तु जाता गांधारपञ्चमी ॥ ११ ॥
गांधार्यार्षभिकाभ्यां तु जातिरान्ध्री प्रजायते ।
षाड्जी गांधारिका तद्वद्धैवती मिलितास्त्विमा. ॥ १२ ॥
षड्जोदीच्यवतीं जाति कुर्युः कार्मारवीं पुनः ।
उत्पादयन्ति नैषादीपञ्चम्यार्षभिका युताः ॥ १३ ॥
नन्दयन्तीं तु गांधारीपञ्चम्यार्षभिका युताः ।
गांधारी धैवती षाड्जी मध्यमेति युतास्त्विमाः ॥ १४ ॥
गांधारोदीच्यवां कुर्युर्मध्यमोदीच्यवां पुनः ।
एता एव विना षाड्ज्या पञ्चम्या सह कुर्वते ॥ १५ ॥
कुर्युस्ता रक्तगांधारीं नैषादी च न धैवती ।
आर्षभीं धैवतीं त्यक्त्वा पञ्चभ्यः कैशिकी भवेत् ॥ १६ ॥

शिकीत्यादिना पञ्चभ्यः कैशिकी भवेदित्यन्तेन । अत्राष्टादशसु जातिसंज्ञासु षाड्ज्यादीना कासाचिदन्वर्थतया योगरूढता, कार्मारव्यादीना तु कतिपयाना केवलरूढतैवेति मन्तव्यम् ॥ ८—१६ ॥

(सु०) विकृतससर्गाज्जाता एकादश जातीर्नित्यविकृता कथयति—विकृताना त्विति । एतासामेकादशाना विकृताना जातीना कारणभूता जाती कथयति—**षाड्जीति** । षाड्जीगाधारिकाभ्या षड्जकैशिकी जायते । षाड्जीमध्यमाभ्या षड्जमध्यमा । गाधारीपञ्चमीभ्या गाधारपञ्चमी । गाधार्यार्षभिकाभ्यामान्ध्री । षाड्जीधैवतीगाधारीभ्यः षड्जोदीच्यवती । नैषादीपञ्चम्यार्षभीभ्यः कार्मारवी । गाधारीपञ्चम्यार्षभीभ्यो नन्दयन्ती । गाधारीधैवतीषाड्जीमध्यमाभ्यो गाधारोदीच्यवा । गाधारीधैवतीमध्यमापञ्चमीभ्यो मध्यमोदीच्यवा । गाधारी-

चतस्रः षड्जशब्दिन्यो नैषादी धैवती तथा ।
आर्षभी चेति सप्तैताः षड्जग्रामस्य जातयः ॥ १७ ॥
शेषाः स्युर्मध्यमग्रामे पूर्णत्वाद्यधुनोच्यते ।
कार्मारव्यथ गांधारपञ्चमी षड्जकैशिकी ॥ १८ ॥
मध्यमोदीच्यवेत्येता नित्यपूर्णाः प्रकीर्तिताः ।
षाड्जी च नन्दयन्त्यान्ध्री गांधरोदीच्यवेत्यमूः ॥ १९ ॥
संपूर्णषाडवाः प्राह चतस्रः काश्यपो मुनिः[1] ।
दशावशिष्टा संपूर्णषाडवौडुविता मताः ॥ २० ॥

नैषादीमध्यमापञ्चमीभ्यो रक्तगाधारी । षाड्जीगाधारीमध्यमापञ्चमीनैषादीभ्यः कैशिकी ॥ ८—१६ ॥

(क०) सर्वासामपि जातीना ग्रामविभागं दर्शयति— **चतस्र** इत्यादिना । अष्टादशसु जातिषु मध्ये यथायोगं संपूर्णत्वादिना साधर्म्यमाह— **पूर्णत्वादीत्या**दिना । पूर्णत्वादीत्यादिशब्देन षाडवत्वमौडुवत्व च गृह्यते । नित्यपूर्णा नित्यं सदा पूर्णा , न कदाचिदपि षाडवौडुवावस्थाऽऽपन्ना इत्यर्थ । सपूर्णषाडवा , संपूर्णाश्च ता षाडवाश्च । षाड्जीनन्दयन्त्यान्ध्रीगाधारोदीच्यवाश्चतस्रो जातयो भरतादिमतपर्यालोचनया संपूर्णत्वेन षाडवत्वेन च नियमिता इति निश्चित्य कथ्यन्त इत्यर्थ । एव च सति यदा गाता ताः षाडवीकर्तुमिच्छति, तदा वक्ष्यमाणलक्षणानुसारेण षाड्ज्या निषादलोपेन, नन्दयन्त्यान्ध्र्यो षड्जलोपेन गाधारोदीच्यवायामृषभलोपेन च षाडवत्वं नियतं द्रष्टव्यम् ॥ **दशावशिष्टा** इति । अवशिष्टा नित्यपूर्णाभ्यश्चतसृभ्यः सपूर्णषाडवाभ्यश्चतसृभ्यश्च व्यतिरिक्ता दश—

[1] सोढलात्मज .

पञ्चमीमध्यमाषड्जमध्यमाऽऽख्यासु जातिषु ।
स्वरसाधारणं प्रोक्तं मुनिभिर्भरतादिभिः ॥ २१ ॥

आर्षभी गाधारी मध्यमा पञ्चमी धैवती नैषादी षड्जोदीच्यवा षड्जमध्यमा रक्तगाधारी कैशिकी चेति । सपूर्णषाडवौडुविता , सपूर्णाश्च षाडवाश्चौडुविताश्च ता इति कर्मधारय , दशाप्येता संपूर्णत्वादिव्यवस्थाऽऽपन्ना इत्यर्थ । तद्यथा—आर्षभी षड्जलोपात्षाडवा, सपलोपादौडुवा । गाधारीरक्तगाधारीकैशिक्यो रिलोपेन षाडवा , रिधलोपेनौडुवा । मध्यमापञ्चम्यौ गलोपेन षाडवे, निगलोपेनौडुवे । धैवतीनैषाद्यौ पलोपेन षाडवे, सपलोपेनौडुवे । षड्जोदीच्यवा रिलोपेन षाडवा, परिलोपेनौडुवा । षड्जमध्यमा निलोपेन षाडवा, निगलोपेनौडुवेति ॥ १७—२० ॥

(सु०) एतासा कियत्यः कस्मिन्ग्राम इत्यपेक्षायामाह—**चतस्र** इति । एतासा जातीना मध्ये षड्जशब्दवत्यश्चतस्रो जातयः षाड्जी षड्जकैशिकी षड्जमध्यमा षड्जोदीच्यवा चेति, तथा नैषादी धैवत्यार्षभी चेत्येता. सप्त षड्जग्रामोत्पन्ना' , शेषा एकादश मध्यमग्रामोत्पन्ना' ॥ जातीना पूर्णत्वषाडवत्वौडुवितत्वानि प्रतिज्ञाय कथयति—पूर्णत्वादीति । कार्मारवीगाधारपञ्चमीषड्जकैशिकीमध्यमोदीच्यवाना पूर्णत्वमेव, षाडवत्वमौडुवितत्व च नास्ति । षाड्जीनन्दयन्त्यान्ध्रीगाधारोदीच्यवाना सपूर्णत्व षाडवत्व च विद्यते, औडुवितत्व नास्ति । अवशिष्टाना दशाना सपूर्णत्व षाडवत्वमौडुवितत्व चास्ति ॥ १७—२० ॥

(क०) तत्र कासुचिज्जातिषु भरताद्युक्तं स्वरसाधारणप्रयोगे नियमं दर्शयति—**पञ्चमीत्या**दिना ॥ अनेनैव वचनेन पञ्चमीमध्यमाषड्जमध्यमासु तिसृषु जातिषु यथायोगं षड्जमध्यमपञ्चमानामन्यतमस्याशत्वे स्वरान्तरस्याशत्वे चोभयत्र स्वरसाधारणे प्राप्ते, स्वरान्तराशत्वपक्षनिवृत्त्यर्थं स्वर-

अंशेषु समपेष्वेतद्यथास्वनियमाद्भवेत्[1] ।
एतदल्पनिगास्वाहुः कम्बलाश्वतरादयः ॥ २२ ॥
अल्पद्विश्रुतिके रागभाषाऽऽदावपि तन्मतम् ।
निगयोरंशयोः षड्जमध्यमायां न तद्भवेत् ॥ २३ ॥
विकृता एव तत्रापि स्वरसाधारणाश्रयाः ।

साधारण परिसंख्याति—**अंशेषु समपेष्विति** । एतत्स्वरसाधारणम् । यथास्वनियमात्, स्वनियम. 'प्रयोज्यौ षड्जमुच्चार्य' इत्यादिनोक्त., तमनतिक्रम्य । अत्रेयं व्यवस्था—पञ्चम्या पञ्चमे ऽंशे, मध्यमाषड्ज-मध्यमयो प्रत्येकं षड्जमध्यमपञ्चमेष्वंशेषु साधारणप्रयोग इति कम्बलाश्व-तरादय' । एतत्स्वरसाधारणम् । काकल्यन्तरावित्यर्थ । अल्पनिगासु लोप्यनिषादगाधारासु जातिषु पञ्चमीमध्यमाषड्जमध्यमाऽऽख्यासु । एत-दुक्तं भवति—निषादगाधारयोरन्यतरस्मिन्नशे ऽन्यस्य तत्संवादित्वेन लोप्य-त्वाभावात्काकल्यन्तरप्रयोगो न कर्तव्य इति । अल्पद्विश्रुतिके लोप्यनिषाद-गाधारे । **रागभाषाऽऽदावपीति** । अत्र रागशब्देन ग्रामरागोपरागरागास्त्रयो ऽपि गृह्यन्ते, भाषाशब्देन भाषाविभाषाऽन्तरभाषास्तिस्रो गृह्यन्ते, आदि-शब्देन पुना रागाङ्गभाषाऽङ्गक्रियाङ्गोपाङ्गचतुष्टय गृह्यत इति दशविधो ऽपि रागप्रपञ्चो गृहीत । तत्रापिशब्देन न केवलमल्पद्विश्रुतिकासु जातिष्वेव, कि त्वल्पद्विश्रुतिके रागादौ सर्वत्रापीति द्योत्यते । तत्काकल्यन्तरसाधारणं मतं भरतादीना संमतम् ॥ उक्तमर्थं व्यतिरेकेणाप्युदाहृत्य द्रढयन्नाह—**निगयोरंशयोरिति** । 'पञ्चमीमध्यमा' इति भरतमतानुसारिणा वचनेन, 'एतदल्पनिगासु-' इति कम्बलाश्वतरादिमतानुसारिणा वचनेन चोपात्तासु

[1] यथास्व नियमाद्भवेत

एकांशा नन्दयन्ती च मध्यमोदीच्यवा तथा ॥ २४ ॥
गांधारपञ्चमीत्येतास्तिस्रो द्व्यंशास्तु धैवती ।
गांधारोदीच्यवा चाथ पञ्चमीत्युदिता इमाः ॥ २५ ॥

पञ्चमीमध्यमाषड्जमध्यमाषाड्जीषु चतसृषु षड्जमध्यमाया विकृतसंसर्गजत्वेन केवलविकृतत्वाच्छुद्धताया अभावे ऽपीतरासा तिसृणा शुद्धावस्थाया विकृतावस्थाया चाविशेषेण स्वरसाधारणे प्राप्ते नियमयति—**विकृता एवेति।** **तत्रापीति।** तत्र पञ्चमीमध्यमाषाड्जीषु तिसृषु। अयमभिसधि —षाड्ज्यादिषु शुद्धावस्थाया विकृतस्वरप्रयोगो न कर्तव्य इति ॥ २१—२३- ॥

(सु०) **पञ्चमीति।** पञ्चमीमध्यमाषड्जमध्यमासु जातिषु स्वरसाधारण प्रयोक्तव्यमित्युक्त श्रीभरतादिभि ॥ २१ ॥ **अंशेष्विति।** षड्जमध्यमपञ्चमेष्वशेष्वेतत्स्वरसाधारण नियमात्कर्तव्यम्। कथम्? यथास्व स्वकीय स्थानमनतिक्रम्य। यदा षड्जो ऽशस्वरस्तदा षड्जसाधारणम्, यदा मध्यमपञ्चमौ तदा मध्यमसाधारणमिति। एतत्स्वरसाधारणमल्पनिषादगाधारासु जातिषु भवतीति कम्बलाश्वतरादय आहु.। अल्पनिषादगाधारे रागभाषाऽऽदावपि स्वरसाधारणं प्रयोक्तव्यमिति तेषा कम्बलाश्वतरादीना मतम् ॥ २२, २२- ॥ **निगयोरिति।** यदा षड्जमध्यमाया निषादगाधारावशौ तदा तत्स्वरसाधारण न प्रयोक्तव्यम्। प्रायस्तु विकृता एव स्वरसाधारणयोगिन्य' ॥-२३, २३-॥

(क०) अथाष्टादशसु जातिषु यथायोगमेकाशकादिसप्ताशकान्तं वक्ष्यमाणलक्षणाशस्वरसंबन्धकथनेन संभूतामशसख्यामवधारयति—**एकांशा** इत्यादिना **जातिष्वष्टादशस्विम** इत्यन्तेन। एकाशा एक स्वरो ऽशो यासा ता। नन्दयन्तीमध्यमोदीच्यवागाधारपञ्चमीना तिसृणा वक्ष्यमाणलक्षणानुसारेण प्रत्येकं पञ्चमो ऽशो वेदितव्य। **द्व्यंशास्त्विति।** धैवतीगाधारोदीच्यवापञ्चम्यो द्व्यशा'। तत्र धैवत्यामृषभधैवतावशौ, गाधारोदीच्यवाया षड्ज-

नैषाद्यार्षभिकाषड्जकैशिक्यस्त्र्यंशिका मताः ।
आन्ध्रीकार्मारवीषड्जोदीच्यवाश्चतुरंशिकाः ॥ २६ ॥
पञ्चांशा रक्तगांधारी गांधारी मध्यमा तथा ।
षाड्जीत्येताश्चतस्रः स्युः षडंशैकैव कैशिकी ॥ २७ ॥
सप्तांशा सूरिभिः षड्जमध्यमा परिकीर्तिता ।
इति त्रिषष्टिरंशाः स्युर्जातिष्वष्टादशस्विमे ॥ २८ ॥

मध्यमौ, पञ्चम्यामृषभपञ्चमौ । **त्र्यंशिका मता** इति । नैषाद्यार्षभिकाषड्जकैशिक्यस्त्र्यंशिकाः । तत्र नैषाद्या निषादषड्जगाधारास्त्रयो ऽंशा , आर्षभ्यामृषभनिषादधैवताः, षड्जकैशिक्या षड्जगाधारपञ्चमाः । **चतुरंशिका** इति। आन्ध्रीकार्मारवीषडजोदीच्यवाश्चतुरशिका । तत्रान्ध्र्यामृषभगाधारपञ्चमनिषादाश्चत्वारो ऽंशा , कार्मारव्यामृषभपञ्चमधैवतनिषादा , षड्जोदीच्यवाया षड्जमध्यमधैवतनिषादा । **पञ्चांशा** इति । रक्तगाधारीगांधारीमध्यमाषाड्ज्यश्चतस्र पञ्चाशा । तत्र रक्तगाधार्या सगमपनिषादाः पञ्चाशा , गाधार्यामपि तद्वत्, मध्यमाया सरिमपधा , षाड्ज्या सगमपधाः । **षडंशेति** । एकैव कैशिकी षडशा । तत्रर्षभव्यतिरिक्ताः षट् स्वरा अंशाः । **सप्तांशेति** । षड्जमध्यमा सप्ताशा । तस्या षड्जादयः सप्त स्वरा अंशा स्युः ॥ -२४—२८ ॥

(सु०) **अंशान्संख्याति—एकाशा इति**। नन्दयन्तीमध्यमोदीच्यवागाधारपञ्चमीष्वेक एको ऽशः, धैवतीगाधारोदीच्यवापञ्चमीषु द्वौ द्वावशौ, नैषाद्यार्षभीषड्जकैशिकीषु त्रयस्त्रयो ऽशाः, आन्ध्रीकार्मारवीषड्जोदीच्यवासु चत्वारश्चत्वारो ऽंशाः; रक्तगाधारीगाधारीमध्यमाषाड्जीषु पञ्च पञ्चाशाः, कैशिक्येकैव षडशा, षड्जमध्यमा सप्ताशा । एवमष्टादशसु जातिषु त्रिषष्टिरशा भवन्ति । इय तु संख्या जातीना सपूर्णत्वे । षाडवत्वे तु सप्तचत्वारिंशदशा भवन्ति । तदुक्तं

ग्रहांशतारमन्द्राश्च न्यासापन्यासकौ तथा ।
अपि संन्यासविन्यासौ बहुत्वं चाल्पता ततः ॥ २९ ॥
एतान्यन्तरमार्गेण सह लक्ष्माणि जातिषु ।
षाडवौडुविते क्वापीत्येवमाहुस्त्रयोदश ॥ ३० ॥

मतङ्गेन—"योज्याः सप्ताधिकास्ते च चत्वारिंशच्च षाडवे । अस्यार्थ —षाडव-विधौ क्रियमाणे सप्तचत्वारिंशदंशा भवन्ति । कथम्? चतसृणा जातीना नित्यपूर्णाना नवाशाः पातनीयास्त्रिषष्टिमध्ये । एषु नवाशेषु पातितेषु चतुष्पञ्चा-शदशा अवशिष्यन्ते । तत्रापि षड्जमध्यमा षाड्जी षड्जोदीच्यवा कैशिकी रक्तगाधारीत्यासा सप्ताशा अपवादभूताः पातनीया' । तेषु सप्ताशेषु पातितेषु सप्तचत्वारिंशदशा भवन्ति ।" इति । औडुवविधौ तु त्रिंशदशा भवन्ति । तदुक्त मतङ्गेन—"तथा ऽपवादनिर्मुक्तास्त्रिंशदौडुविते तु ते । अस्यार्थः" पूर्ववत् । षोडशसु पातितेषु नित्यपूर्णषाडवाना द्वादश पातनीयाः । अन्ये चापवादभूताः पञ्च । एव त्रिंशदौडुविते ते ऽशा भवन्ति । तथा चाह भरत —

'पञ्चस्वरमौडुवित विज्ञेय दशविधप्रयोगज्ञैः ।
त्रिंशत्प्रकारविहित पूर्वोक्त लक्षण तस्य ॥'

इति । अपकृष्टध्रुवासु जातीना चतु स्वरप्रयोगो ऽप्युक्तो भरतेन—

'षट्स्वरस्य प्रयोगो ऽस्ति तथा पञ्चस्वरस्य च ।
चतुःस्वरप्रयोगो ऽपि ह्यपकृष्टध्रुवास्वथ ॥'

इति ॥-२४—२८ ॥

(क०) अथ 'त्रयोदशविधं जातिलक्ष्म' इत्युद्देशे लक्ष्यत्वेनोपात्त-जातिनिरूपणावसरे तदवयवत्वेन च प्राप्तास्त्रयोदशापि ग्रहादीन्विभज्य क्रमेण लक्षयति—**ग्रहांशतारमन्द्राश्चेत्यादिना** । **षाडवौडुविते क्वापीति** । नित्यपूर्णाभ्यो ऽन्यासु यथायोगमित्यर्थः । यद्यपि भरतमतङ्गादिभिः संन्यासविन्यासयोर्विदार्याश्रितत्वादपन्यासे ऽन्तर्भावेणान्तरमार्गस्याप्यंशाद्यवय-

गीतादिनिहितस्तत्र स्वरो ग्रह इतीरितः ।
तत्रांशग्रहयोरन्यतरोक्तावुभयग्रहः ॥ ३१ ॥
यो रक्तिव्यञ्जको गेये यत्संवाद्यनुवादिनौ ।
विदार्यां बहुलौ यस्मात्तारमन्द्रव्यवस्थितिः ॥ ३२ ॥
यः स्वयं यस्य संवादी चानुवादी स्वरो ऽपरः ।
न्यासापन्यासविन्यासंसंन्यासग्रहतां गतः ॥ ३३ ॥
प्रयोगे बहुलः स स्याद्वाद्यंशो योग्यतावशात् ।
बहुलत्वं प्रयोगेषु व्यापकं त्वंशलक्षणम् ॥ ३४ ॥

वानामन्योन्यसंघटनात्मकस्याशादिसंबन्धाधीनसिद्धेः पृथगुद्देशो नापेक्षित इति दशकं जातिलक्षणमित्युक्तम्, तथा ऽपि संन्यासविन्यासयो पृथगवयवत्वेनान्तरमार्गस्य तु सत्स्वशादिष्ववयवेषु तेन विना प्रयोगासिद्धेस्तस्यावश्यिकत्वाल्लक्षणेषु पृथगुद्दिश्य त्रयोदशेत्युक्तं ग्रन्थकारेण ॥ **गीतादिनिहित** इति । तत्र तेषु त्रयोदशसु मध्ये, गीतादिनिहित, गीतस्य रञ्जकस्वरसंदर्भस्यादावुपक्रमे निहित । गृहीत इति येन गीतं गृह्यत इति वा ग्रहः । तत्राशग्रहयोरित्यत्र तत्रेति गीतगानलक्षण इत्यर्थ । अंशग्रहयोरन्यतरोक्तौ, यत्र क्वचिदश एवोच्यते न ग्रहः, यत्र च ग्रह एवोच्यते न त्वंशः, तत्रोभयग्रह उभयोर्ग्रहाशयोर्ग्रहो ग्रहणं भवति । अयमर्थः—यत्र गीतलक्षणे यस्य स्वरस्याशत्वमुक्तं नान्यस्य ग्रहत्व तत्र तस्यैव ग्रहत्वमप्युक्तम्, यस्य च ग्रहत्वमुक्तं नान्यस्याशत्वं तत्रापि तस्यैवाशत्वमप्युक्तमिति। एतेनैतदुक्त भवति—यस्या जातौ ये यावन्तो ऽंशास्तत्र ते तावन्त एव ग्रहा इति । सर्वासु जातिषु ग्रहा अपि त्रिषष्टिरित्यर्थ । तथा चोक्तं भरतेन—

'त्रिषष्टिरंशा विज्ञेयास्तासा चैवाशवद् ग्रहाः' इति ।

मतङ्गेनापि— 'सो ऽंशवत्त्रिषष्टिभेदभिन्नो बोद्धव्य ' इति ॥ **यो रक्ती-**त्याद्यंशलक्षणम् । रक्तिव्यञ्जकत्वादिधर्मयुक्तो य स्वर स संगीतभागत्वादश इति व्यपदिश्यते गेये । रक्तिव्यञ्जक इत्येतावत्युच्यमाने स्वरगतरक्ति-मात्रव्यञ्जकत्व स्वरान्तराणामप्यविशिष्टमितीह स्वरसदर्भभेदप्रतिनियतरक्ति-विशेषव्यञ्जकत्वस्य विवक्षितत्वाद्देय इति विशेषणं यथा वाक्यार्थभूतरसा-दिव्यञ्जकत्वं विवक्षितान्यपरवाच्ये ऽसंलक्ष्यक्रमध्वनौ स्वार्थमभिदधत पदस्य । यत्सवाद्यनुवादिनौ । यस्याशत्वेन लिलक्षयिषितस्य[1] स्वरस्य । अस्मिल्लक्षणे प्रतिवाक्यं यच्छब्दो विधेयाशस्वरपर· । सवाद्यनुवादिनौ पूर्वोक्तलक्षणौ स्वरौ विदार्यो गीतखण्डे बहुलौ प्रचुरप्रयोगौ, यस्मात्तारमन्द्रव्यवस्थिति·, यम-वधि कृत्वोत्तरस्वरारोहेण तारव्यवस्था ऽधस्तनस्वरावरोहेण मन्द्रव्यवस्था च भवति, य स्वय यस्य सवादी, यस्य वादिव्यपदेशवत स्वस्य स्वयमेव कदाचित्सवादी च भवति, अत्र चकार एवार्थे संवाद्येवेति, अनुवादी स्वरो ऽपर, यस्यानुवादी त्वपर एव स्वरो भवति, न कदाचिदपि स्वस्य स्वयमनुवादीत्यर्थ , यथा लोके राजा प्रयोजनवशात्कचिदमात्य-कृत्यकारी भवति न कदाचिदपि भृत्यकृत्यकारी, तद्वत , यश्च न्यासापन्यास-विन्याससंन्यासग्रहता गत सन्प्रयोगे बहुलो भवति, तस्य न्यासादि-रूपापत्ति. प्रयोगबाहुल्ये हेतु , स वादी योग्यतावशादश· स्यात् । योग्यता नामात्र यथायोगं रक्तिव्यञ्जकत्वाद्युक्तलक्षणार्हत्वम् । तथा ऽऽह भरतः—

'रागश्च यस्मिन्वसति यस्माच्चैव प्रवर्तते ।
नेता च तारमन्द्राणा यो ऽत्यर्थमुपलभ्यते ॥
ग्रहापन्यासविन्याससंन्यासन्यासयोगत ।
अनुवृत्तश्च यश्चेह सो ऽंश· स्याद्दशलक्षण ॥'

[1] विवक्षितस्य

इति। नन्वंशो ग्रह इति भरतादेशेन सर्वेष्वप्यशधर्मेषु ग्रहस्य प्राप्तेषु ग्रहाशयो को विशेष इति चेत्, उच्यते—ग्रहस्याशातिदेशतस्तु प्राप्तं न केवलं वादित्वमेव धर्म, अपि तु वादित्वादिचतुष्टयमपीति तयोर्भेद इति। यथोक्तं मतङ्गेन—'अशो वाद्येव परं ग्रहस्तु वाद्यादिभेदभिन्नश्चतुर्विध' इति॥ दशानामपि लक्षणाना सप्तषष्टिरूपत्वाद्बहुलत्वमेवाशस्य नियतं लक्षणमित्याह—**बहुलत्वमिति**। प्रयोगे बहुलत्वं व्यापकमंशलक्षणमिति संबन्ध·। **व्यापकमिति**। यो ऽंश· स बहुल इत्यविनाभावात्॥ २९—३४॥

(सु०) त्रयोदशविध जातिलक्षण विभजते—**ग्रहाशेति**। **षाडवौडुविते क्वापीति**। याः कार्मारव्यादयश्चतस्रो नित्यपूर्णास्ता विहायेत्यर्थः। ग्रहलक्षण कथयति—**गीतादीति**। गीतस्य जात्यादेरादौ य स्वर प्रयुज्यते स ग्रह इत्युच्यते। तत्रेति। तत्र 'य. स्वरो ऽश. स एव ग्रह' इति नियमादशग्रहयोरेकोक्तावुभय लभ्यते। नन्वेव तर्हि ग्रहाशयो· को भेदः? उच्यते—अशो वाद्येव परम्, ग्रह·तु वाद्यादिभेदभिन्नश्चतुर्विध·, अशश्च रागजनकत्वात्प्रधानम्, ग्रहस्त्वप्रधानमिति तयोर्भेद·॥ २९—३१॥ अशलक्षण कथयति—**यो रक्तिव्यञ्जक इति**। यो गीते रञ्जकत्वं व्यनक्ति, यस्य सवाद्यनुवादी च विदार्या बहुल·। ननु विदारीशब्देन किमुच्यते? विदार्यते खण्ड्यते गीत पद वा यया सा विदारी। सा द्विविधा गीतविदारी पदविदारी चेति। सा विशेषेण तालाध्याये निरूपयिष्यते। यमवधि कृत्वा मन्द्रताख्यवस्था, यो वा यस्य सवाद्यनुवादी वा न्यासत्वमपन्यासत्व विन्यासत्व संन्यासत्व ग्रहत्व च प्राप्नोति, यस्य जात्यादिप्रयोगे बाहुल्य सवाद्यशश्चेत्युच्यते। **योग्यतावशादिति**। प्राधान्याद्वादिशब्दवाच्यत्वमन्यैर्लक्षणैरशशब्दवाच्यत्वमिति। प्रयोगे बाहुल्यमेव मुख्य लक्षणमशस्येति कथयति—**बहुलत्वमिति**। ननु कथमस्याशशब्दवाच्यत्वम्? अशशब्देन भाग उच्यते, अयमपि जातिरागादिविभागकारित्वादशशब्देनोच्यते, कारणे कार्यवदुपचारात्॥ ३२—३४॥

मध्यमे सप्तके ऽंशः स्यात्तस्मात्तारस्थितात्परान् ।
स्वरांश्चतुर आरोहेदेष तारावधिः परः ॥ ३५ ॥
अर्वाक्तु कामचारः स्यात्तारे लुप्तो ऽपि गण्यते ।
आतारषड्जमारोहो नन्दयन्त्यां प्रकीर्तितः ॥ ३६ ॥

(क०) अथ तारव्यवस्थामाह—**मध्यमे सप्तके ऽंश स्यादिति** । मध्यमे सप्तके, मध्यस्थानस्थितेषु षड्जादिषु सप्तसु स्वरेष्वित्यर्थ । अंश स्यात्, षड्जमध्यमग्रामयोः प्राधान्यात्प्राबल्याच्च यस्मिन्ग्रामे यश्चतु·श्रुतिको ऽंशः षड्जो वा मध्यमो वा भवेत् । तारस्थिताद् द्विगुणात्तस्मात्षड्जाद्वा मध्यमाद्वा पराश्चतुर. स्वरान् । मध्यमग्रामे तावत्तस्मादिति तारमध्यमपरामर्शे तस्मादिति ल्यब्लोपे पञ्चमी । तमारभ्येत्यर्थ । तेन सह पराश्चतुरो मपधनीनारोहेदित्यर्थ । षड्जग्रामे तु तस्मादिति तारषड्जपरामर्शे तस्मादित्यवधौ पञ्चमी । तत पराश्चतुर स्वरान्रिगमपानारोहेदिति । एष तारावधि·, एष उक्तप्रकारस्तारावधि । परो निरतिशय· । कुत ? मध्यमग्रामे तारनिषादात्परस्य स्वरस्यासभवादेव, षड्जग्रामे तु तारपञ्चमात्परयोर्धैवतनिषादयो· संभवे, शक्तौ च सत्यामपि तत्र प्रयोगे रक्तेरभावादिति ॥ **अर्वाक्त्विति** । अर्वाङ् न्यूनतारावधित्वेनोक्तयोर्निषादपञ्चमयोरधस्तात्तारे स्थितेषु यस्य कस्यचिदवधित्वे तु कामचार, गातुरशक्त्येच्छया वा प्रवर्तनम् । **तारे लुप्तो ऽपि गण्यत** इति । तारे तारव्यवस्थाविषये । चतुर आरोहेदित्यत्र चतुर्षु मध्ये प्रयोगलक्षणवशादेकस्य स्वरस्य लोपे सत्यप्यारोहगणनाया सो ऽपि गृह्यते । नन्दयन्त्या जातेरपि मध्यमग्रामीणत्वात्तारव्यवस्थाया चतु स्वरारोहे तारमध्यमस्य प्रारम्भावधित्वे प्राप्ते, तदपवादत्वेन तारषड्जस्य भरतादिमतात्परावधित्वं रुद्रटादिमतात्पूर्वावधित्व च विहितमित्यभिसधाय तन्त्रेणाह—**आतारषड्जमिति** । परावधित्व आ तार-

षड्जात्तारषड्जपर्यन्तमारोह प्रकीर्तितो भरतादिभिरित्यर्थ । यथा ऽऽह भरतः—

'तारगत्या तु षड्जं च कदाचिन्नातिवर्तते'

इति । तत्पूर्वावधित्वे त्वातारषड्जं तारषड्जमारभ्यारोह सामान्यतः प्राप्त-चतुर्थस्वरारोह । सामान्यत प्रकीर्तितो रुद्रटादिभिरित्यर्थः । यथा यावत्षड्जमेव तारगतिर्मध्यमस्याप्यत्र सवादित्वादनाशित्वाच्च तारगती रुद्रटेन कृता मध्यमस्येति न दोष इति मतङ्गोक्तम् । अयमाशयः—नन्दयन्त्या हृष्यकामूर्च्छनाऽन्वितत्वेन पञ्चमाशत्वान्मन्द्रव्यापकत्वेन तारगतेः संकोच-स्त्वाचार्यै कृत इति । सामान्या तारव्यवस्था तु भरतोक्ता । यथा—

'अशात्तारगतिं विद्यादा चतुर्थस्वरादिह ।
आ पञ्चमात्सप्तमाद्वा नात परमिहेष्यते ॥'

इति । तरतेर्णिजन्तात्तार्यत इति कर्मणि घञि दूरश्राव्यस्य मूर्धन्यस्य ध्वनेस्तार इति संज्ञा ॥ ३५, ३६ ॥

(सु०) तारलक्षण कथयति— मध्यम इति । मध्यसप्तकस्थितो यो ऽशस्वर, तस्मादेव तारस्थिताच्चतुःस्वरपर्यन्तमारोहणं कर्तव्यम् । अयमारोहे परो ऽवधिरुक्तः । ततः परमारोहण न कर्तव्यम् । अर्वाक्तु स्वेच्छया तारगतिः । तारे लुप्तो ऽपि स्वरो ग्राह्यः । भरतेन चतुर्थपञ्चमसप्तमस्वरपर्यन्तं तारगतिरुक्ता । यदाह—

'अशात्तारगतिं विद्यादा चतुर्थस्वरादिह ।
आ पञ्चमात्सप्तमाद्वा नातः परमिहेष्यते ॥'

इति । आतारेति । नन्दयन्त्या तारषड्जपर्यन्तमेवारोहण कर्तव्यम् । पूर्वोक्त-स्यायमपवादः ॥ ३५, ३६ ॥

मध्यस्थानस्थितादंशादामन्द्रस्थांशमाव्रजेत् ।
आमन्द्रन्यासमथ वा तदधःस्थरिधावपि ॥ ३७ ॥
एषा मन्द्रगतेः सीमा ततो ऽर्वाक्कामचारिता ।
गीते समाप्तिकृन्न्यास एकविंशतिधा च सः ॥ ३८ ॥

(क०) **मध्यस्थानस्थितादिति** । अंशाद् ग्रामापेक्षया षड्जाद्वा मध्यमाद्वा । अत्रापि ल्यब्लोपे पञ्चमी—अंशमारभ्येति । आमन्द्रस्थांशं यथाग्राम मन्द्रस्थानस्थितषड्जपर्यन्तं तादृशमध्यमपर्यन्तं वा । आडत्राभिविधौ । आव्रजेदागच्छेत् । अनेन मध्यस्थानस्थितस्याशस्य प्रायेण प्रारम्भो गम्यते । जातिप्रयोगे षड्जमन्द्रव्यवस्थायामयमेकः पक्षः । अथ वा, आमन्द्रन्यास मन्द्रस्थानस्थितन्यासस्वरपर्यन्तम् । आडभिविधौ । अत्र न्यासशब्देन ग्रामयोरन्तिमौ गाधारनिषादौ विवक्षितौ, न तु जात्यादिगीतसमापकः । तौ च व्यत्यासेन षाड्जग्रामिके प्रयोगे मन्द्रगाधारो न्यासः, माध्यमग्रामिके प्रयोगे मन्द्रनिषादो न्यास इति ग्रामयोर्मन्द्रावधी भवतः । अत्र लिङ्गं षड्जग्रामीणया ऽपि षड्जकैशिक्या मन्द्रगाधारस्य न्यासत्वदर्शनमिति द्वितीय पक्षः । तदध स्थरिधावपीति तृतीय. पक्ष । अत्रापिशब्दो विकल्पार्थो रिधौ वेति । तच्छब्देन ग्रामन्यासतया विवक्षितौ गाधारनिषादौ परामृश्येते । तयोरध.स्थौ रिधावित्यनेन क्रमेण ग्रामविवक्षया न्यासयोर्व्यत्यास एव दर्शितः । यथोक्त भरतेन—"त्रिधा मन्द्रगतिरंशपरा न्यासपरा ऽपन्यासपरा चेति ।

मन्द्रस्त्वशात्परो नास्ति न्यासे तु द्वौ व्यवस्थितौ ।
गाधारन्यासलिङ्गेन दृष्टमृषभसेवनम् ॥"

इति । एषा पक्षत्रये ऽन्यतमाश्रया मन्द्रगतेर्मन्द्रस्थस्वरावरोहस्य सीमा ऽवधि । तत उक्तावधेरर्वाङ् न्यूनताया कामचारिता गातुरिच्छया ऽशक्त्या

षाड्ज्यादीनां तु सप्तानां न्यासः स्यान्नामकृत्स्वरः ।
द्वौ नामकारिणौ षड्जमध्यमाया तु तौ मतौ ॥ ३९ ॥
उदीच्यवात्रयं मान्तं निषगान्ता तु कैशिकी ।
कार्मारवी पञ्चमान्ता गान्ताः पञ्चापराः स्मृताः ॥ ४० ॥

वा ऽप्रवर्तमानत्वम् । 'मदी हर्षे' इत्यस्माण्णिजन्तान्मदयतीति कर्तरि रप्रत्यये रूपम् । ह्रद्यस्य ध्वनेर्मन्द्र इति सज्ञा ॥ अथ न्यास·—**गीते समाप्तिकृदिति** । गीते जात्यादिप्रयोगे समाप्तिकृन्निरपेक्षावसानकारी स्वरो न्यास·, न्यस्यते त्यज्यते येन गीतमिति करणे घञि न्याससंज्ञक । स चाष्टादशसु जातिष्वेकविशतिधा वक्ष्यमाणप्रकारेण ॥ ३७, ३८ ॥

(सु०) मन्द्र निरूपयति—मध्यस्थानेति । मन्द्रस्थानस्थितादशस्वरान्मन्द्राशस्वरपर्यन्तमवरोहण कर्तव्यम्, मन्द्रन्यासस्वरपर्यन्त वा, मन्द्रस्थानस्थर्षभधैवतपर्यन्त वेति पक्षत्रयम् । एषा मन्द्रगते· परा काष्ठोक्ता । अर्वाक्तु स्वेच्छया मन्द्रगतिः । न्यासलक्षण कथयति—गीत इति । यस्तु गीतसमापको गीतस्य जात्यादेरन्ते तिष्ठति स न्यास इत्युच्यते । न्यस्यते त्यज्यते यस्मिन्येन वा गीतमिति स न्यासः । स चैकविशतिप्रकारो भवति ॥ ३७, ३८ ॥

(क०) तदेव विवृणोति—**षाड्ज्यादीनामित्यादिना** । सप्ताना शुद्धाना विकृतभेदैश्च सहिताना नामकृदिति, षाड्ज्या षड्ज आर्षभ्यामृषभ इत्येवम् । नान्य इति तुशब्दार्थ· । **उदीच्यवात्रयमिति** । षड्जोदीच्यवा गाधारोदीच्यवा मध्यमोदीच्यवा च त्रिक मान्तं मध्यमन्यासकम् । अपरा· पञ्च षड्जकैशिकी रक्तगाधारी गाधारपञ्चम्यान्ध्री नन्दयन्ती चेति । स्मृता, भरतादिभिरिति शेष ॥ ३९, ४० ॥

(सु०) एकविशतिप्रकारतामेव विशदयति—षाड्ज्यादीनामिति । षाड्ज्यादीना सप्ताना नामस्वराः सप्त न्यासाः । षड्जमध्यमायाः षड्जमध्यमौ न्यासौ ।

अपन्यासस्वरः स स्याद्यो विदारीसमापकः ।
कार्मारव्यां च नैषाद्यामान्ध्रीमध्यमयोस्तथा ॥ ४१ ॥
आर्षभ्यां च स्वरा ये ऽंशास्ते ऽपन्यासाः प्रकीर्तिताः ।
उदीच्यवानां त्रितये ऽपन्यासौ षड्जधैवतौ ॥ ४२ ॥
मध्यमो रक्तगांधार्यां गांधार्यां षड्जपञ्चमौ ।
सनिपाः षड्जकैशिक्यां पञ्चम्यां निरिपाः स्मृताः ॥ ४३ ॥
रिपौ गांधारपञ्चम्यां षाड्ज्यां गांधारपञ्चमौ ।
धैवत्यां रिमधाः प्रोक्ता नन्दयन्त्यां मपौ मतौ ॥ ४४ ॥
रिवर्ज्याः षट् च कैशिक्यां सप्तापीत्यूचिरे परे ।
सप्तस्वरापन्यासां तु भाषन्ते षड्जमध्यमाम् ॥ ४५ ॥
अत्र ये ऽन्त्या अपन्यासास्ते स्युरेकोनविंशतिः ।
सप्तत्रिंशत्परे ते च षट्पञ्चाशत्तु संयुताः ॥ ४६ ॥
कैशिक्यां सप्तपक्षे तान्सप्तपञ्चाशतं विदुः ।

षड्जोदीच्यवागाधारोदीच्यवामध्यमोदीच्यवाना मध्यमो न्यास· । कैशिक्या निषादपञ्चमगाधाराः । कार्मारव्या पञ्चमः । अवशिष्टाना पञ्चाना गाधारो न्यास· । एवमेकविंशतिर्न्यासाः ॥ ३९, ४० ॥

(क०) अथापन्यासः—**अपन्यासस्वरः स स्यादित्यादिना सप्तपञ्चाशतं विदुरित्यन्तेन** निरूपित स्पष्ट । अपन्यस्यते प्रयोगो येनेत्यपन्यास.। अपन्यसन च न्यासत्वापगमे त्ववान्तरविच्छेदकारित्वान्नचासवत्प्रतिभासनम् ॥ ४१–४६- ॥

(सु०) अपन्यासं लक्षयति—अपन्यास इति । यः स्वरो विदार्या गीतावयवस्य समापकः सो ऽपन्यासः । मतङ्गेनाप्युक्तम्—'यत्र समाप्तमिव

अंशाविवादी गीतस्याद्यविदारीसमाप्तिकृत् ॥ ४७ ॥
संन्यासो ऽंशाविवाद्येव विन्यासः स तु कथ्यते ।
यो विदारीभागरूपपदप्रान्ते ऽवतिष्ठते ॥ ४८ ॥
अलङ्घनात्तथा ऽभ्यासाद्बहुत्वं द्विविधं मतम् ।
पर्यायांशे स्थितं तच्च वादिसंवादिनोरपि ॥ ४९ ॥

गीत प्रतिभासते सो ऽपन्यास' । स च विदारीमध्ये भवति । गीतशरीरमध्य इत्यर्थः ।' इति । अपन्यासान्परिगणयति—कार्मारव्यामिति । कार्मारवीनैषाद्यान्ध्रीमध्यमाऽऽर्षभीणामशा एवापन्यासा' । षड्जोदीच्यवागाधारोदीच्यवामध्यमोदीच्यवाना षड्जधैवतावपन्यासौ । रक्तगाधार्या मध्यमः । गाधार्या षड्जमध्यमौ । षड्जकैशिक्या षड्जपञ्चमनिषादाः । पञ्चम्या निषादर्षभपञ्चमाः । गाधारपञ्चम्यामृषभपञ्चमौ । षाड्ज्या गाधारपञ्चमौ । धैवत्यामृषभमध्यमधैवताः । नन्दयन्त्या मध्यमपञ्चमौ । कैशिक्यामृषभवर्जिता. षट् स्वरा अपन्यासा. । सप्तापि स्वरा इति केषाचिन्मतम् । षड्जमध्यमाया सप्त स्वरा' । अत्राशा एवापन्यासा. । त एकोनविंशति' । अन्ये सप्तत्रिंशत् । मिलिताः षट्पञ्चाशत् । यदि कैशिक्या सप्तापन्यासास्तदा सप्तपञ्चाशदपन्यासस्वरा भवन्ति ॥ ४१—४६- ॥

(क०) अथ संन्यासविन्यासौ —अंशाविवादी, यस्मिन्प्रयोगे यो ऽंशस्तस्याविरोधी संवादीत्यर्थ' । गीतस्याद्यविदारीसमाप्तिकृत्प्रथमखण्डसमापकः । अनेनापन्यासस्यातिरिक्तविदारीविषयत्वं विज्ञेयम् । विन्यासः स तु कथ्यते । स इति वक्ष्यमाणपरामर्श । अंशाविवादित्वमुक्तमेव । विदारीभागरूपपदप्रान्ते, विदार्या भागरूपाणि वर्णालंकारादियुक्तस्य रागस्य वाक्यस्थानीयस्यावयवभूतानि पदवत्पदानि, तेषा स्वरसमुदायात्मना प्रान्ते यो ऽवतिष्ठत इति संबन्ध' । विवादिव्यतिरिक्ताना सर्वेषामपि स्वराणा संन्यासविन्यासत्वसंभवेन बहुत्वादेतयोः सख्या नोक्ता ॥ अथ बहुत्वम्—अलङ्घनादिति । लङ्घनमीषत्स्पर्श. स्वरस्य स्थानप्रयत्नकृतस्वरूपन्यूनता,

अल्पत्वं च द्विधा प्रोक्तमनभ्यासाच्च लङ्घनात् ।
अनभ्यासस्त्वनंशेषु प्रायो लोप्येष्वपीष्यते ॥ ५० ॥
ईषत्स्पर्शो लङ्घनं स्यात्प्रायस्तल्लोप्यगोचरम् ।
उशन्ति तदनंशे ऽपि क्वचिद्गीतविशारदाः ॥ ५१ ॥

तदभावो ऽलङ्घनम्, साकल्येन स्पर्श इति यावत् । इदमेकं बहुत्वम् । अभ्यासादावृत्तेः । नैरन्तर्येण वा सान्तरत्वेन वा स्वरस्य पुन पुनरुच्चारणमावृत्ति । इदमन्यद्बहुत्वम् । तच्च द्विविधं बहुत्व पर्यायाशे वादिभूताशाद्व्यतिरिक्ताशे, वादिसवादिनोरपि स्थितम्, प्रयोक्तव्यमिति शेषः ॥ अथाल्पत्वम्— **अल्पत्वं चेति** । अनभ्यासाच्च लङ्घनादिति बहुत्वोक्तलक्षणविपर्यय । अनभ्यासस्तु, आवृत्त्यभावेन सकृदुच्चारणरूपमल्पत्व तु, अनंशेषु वादिपर्यायाशोभयव्यतिरिक्तेषु स्वरेष्विष्यते, लोप्येष्वपि षाडवौडुवकारिषु च प्राय इष्यते, प्राचुर्येण भवतीत्यर्थः ॥ ईषत्स्पर्श इति ग्रन्थस्तु विवृतार्थः ॥ ४७—५१ ॥

(सु०) सन्यास लक्षयति—**अंशाविवादीति** । यः स्वरो ऽशेन सहाविवादी सन्गीतस्याद्या विदारीं समापयति स सन्यासः । मतङ्गेनाप्युक्तम्—'अशस्य विवादी यो न भवति स प्रथमविदार्यामन्ते यदि प्रयुक्तो भवति तदा सन्यास इत्युच्यते' इति । विन्यास लक्षयति—**अंशाविवाद्येवेति**—अशेन सहाविवाद्येव य स्वरो विदार्यशरूपाणा पदानामन्ते तिष्ठति स विन्यासस्वरः । मतङ्गेनाप्युक्तम्—'एष एव तु सन्यासस्वरो यदा पदान्ते विन्यस्यते तदा विन्यासः, अत एवाशस्य सवाद्यनुवादी वा पदविदार्यन्ते भवतीत्युक्तम् ।' इति । बहुत्व कथयति—**अलङ्घनादिति** । अन्यस्पर्शादभ्यासाच्च बहुत्वं द्विविधम । तच्च बहुत्वं वादिसवादिनोः पर्यायः । अलङ्घनाद्यस्य बहुत्व स वादी; तद्यस्याभ्यासात्स सवादीत्यर्थ । **अल्पत्वं चेति** । अल्पत्वमप्यनभ्यासाल्लङ्घनाच्च द्विप्रकारम् । अनभ्यासस्त्वशस्वरादन्येषु स्वरेषु क्वचिल्लोप्येष्वपीष्यते भरतादिभिः । लङ्घनादल्पत्वमित्युक्तम्, तत्र किमिद लङ्घनमित्यपेक्षाया-

न्यासादिस्थानमुज्झित्वा मध्ये मध्ये ऽल्पतायुजाम् ।
स्वराणां या विचित्रत्वकारिण्यंशादिसंगतिः ॥ ५२ ॥
अनभ्यासैः क्वचित्क्वापि लङ्घनैरेव केवलैः ।
कृता सा ऽन्तरमार्गः स्यात्प्रायो विकृतजातिषु ॥ ५३ ॥
षडवन्ति प्रयोगं ये स्वरास्ते षाडवा मताः ।
षट्स्वरं तेषु जातत्वाद्गीतं षाडवमुच्यते ॥ ५४ ॥

माह—ईषस्पर्श इति । सकृदुच्चारण लङ्घनम् । तत्प्रायो लोप्येषु स्वरेषु भवेत् । अंशस्वरादन्येष्वपि स्वरेषु लङ्घन भवतीति केषाचिन्मतम् ॥ ४७—५१ ॥

(क०) अथान्तरमार्ग ---**न्यासादिस्थानमिति** । न्यासादिस्थानम्, न्यासादीना न्यासापन्यासविन्याससंन्यासग्रहाशाना स्थान गीतस्यान्त्यप्रदेशाद्युज्झित्वा विहाय । मध्ये मध्य इति मध्याना बहुत्वाद्वीप्साया द्विर्वचनम् । तेनोक्तन्यासादीना द्वयोर्द्वयोर्मध्य इत्युक्त भवति । तत्राल्पतायुजामुक्तद्विविधाल्पत्वभाजा स्वराणा या ऽशादिसगति , अशग्रहापन्यासादिभिः सह संगतिरारोहादिना संघटना विचित्रत्वकारिणी स्वरसमुदायात्मकतानवैचित्र्यकारिणी भवति, क्वचित्केवलैरनभ्यासै क्वापि लङ्घनैरेव तत्तद्गीतरक्तिवशात्कृतोत्पादिता सा ऽन्तरमार्ग स्यात् । सो ऽपि विकृतजातिषु प्रायः स्यात्, शुद्धजातिषु तु कादाचित्क इत्यर्थ ॥ ५१, ५३ ॥

(सु०) अन्तरमार्ग लक्षयति—न्यासादीति । न्यासापन्यासविन्यासन्यासग्रहाशस्थान परित्यज्य मध्ये मध्ये ऽल्पाना स्वराणा भङ्गिविशेषकारिणी क्वचिदनभ्यासैः क्वचित्केवलैर्लङ्घनैरेव या विहिता ऽशादिभि' सह संगति सा ऽन्तरमार्ग इत्युच्यते । सा प्रायशो या विकृता जातयस्तन्निष्ठैव भवति ॥५२, ५३॥

(क०) अथ षाडवम्—**षडवन्तीति** । ये षट् स्वरा शुद्धा विकृता वा प्रयोगं जात्यादिकमवन्ति रक्षन्ति, प्रवर्तयन्तीत्यर्थ. , ते स्वराः षडवा' ।

वान्ति यान्त्युडवो ऽत्रेति व्योमोक्तमुडुवं बुधैः ।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा ॥ ५५ ॥
औडुवी सा ऽस्ति येषां च स्वरास्ते त्वौडुवा मताः ।
ते संजाता यत्र गीते तदौडुवितमुच्यते ॥ ५६ ॥
तत्संबन्धादौडुवं च पञ्चस्वरमिदं विदुः ।

'अव रक्षणे' इत्यस्मात्पचाद्यच्यवा इति रूपम् । षट् च ते ऽवाश्चेति कर्मधारय । तेषु षडवेषु जातत्वात्षट्स्वरं गीतं षाडवमुच्यत इति योजना । तेषु जातत्वादित्यनेन षडवशब्दात् 'तत्र जात' इत्यणि षाडवमिति रूपम् । अयमर्थ —सप्तसु स्वरेषु लक्षणवशादेकस्मिंस्त्यक्ते, तदितरषट्स्वरप्रयोग-प्रपञ्चवशाज्जातं गीत षाडवव्यपदेशवदिति ॥ अथौडुवितम्— **वान्तीति** । यान्तीति 'वा गतिगन्धनयो' इत्यस्मान्निष्पन्नस्य वान्तीत्यस्यैव गत्यर्थ-तोक्ति । अत्रोडवो नक्षत्राणि वान्ति गच्छन्तीति वाधातो 'सुपि स्थ' इत्यत्र सुपीति योगविभागात्कप्रत्यय उडुवमिति व्योमाकाशमुक्तम् । तच्चोडुवं भूतेषु पृथिव्यादिमहाभूतेषु गुणबाहुल्येनाभ्यर्हितत्वात्सृष्टिक्रमप्रातिलोम्येन पृथिव्यादिपरिगणनाया पञ्चमं पृथिव्यप्तेजोवाय्वाकाशानीति । पञ्चसंख्या पञ्चेति सख्या तदुद्भवा तदुद्भवद्रव्याश्रिता सत्यौडुवीत्युच्यते । उडुवशब्दात् 'तत्र जात' इत्यणि स्त्रियाम् 'टिड्ढाणञ्' इत्यादिना ङीपि रूप-मित्यर्थ । सा चौडुवी संख्या येषा तत्र तत्र नियतस्वरद्वयलोपे सत्य-वशिष्टाना प्रयोगप्रवर्तकाना स्वराणामस्ति, ते तु पञ्च स्वरा औडुवा मता । तदस्यास्तीत्यस्मिन्नर्थे शैषिके ऽणि सतीत्यर्थ । जात त्विति तुशब्देन येषामिति यच्छब्दतात्पर्येणोक्ता एव, न तु संपूर्णे षाडवे वा शते पञ्चा-शन्नयायेन यथाकथचित्संभवन्त. पञ्चापीति गम्यते । त औडुवा यत्र गीते संजातास्तद्गीतमौडुवितमुच्यते । औडुवशब्दात् 'तदस्य संजातम्-' इत्यादि-

क्रमादल्पाल्पतरते षाडवौडुवकारिणोः ॥ ५७ ॥
संपूर्णत्वदशायां स्तः पञ्चम्यां तु विपर्ययः ।

नेतच्प्रत्यये सतीत्यर्थ ॥ **तत्संबन्धादिति**। पञ्चस्वरमिदं गीतम् , तत्संबन्धात् , तच्छब्देनौडुवा परामृश्यन्ते, तेषामौडुवाना संबन्धीति संबन्धमात्र-विवक्षायाम् ' तस्येदम् ' इत्यण्प्रत्यय औडुवमिति च विदु ॥ ५४—५६-॥

(सु०) षाडव लक्षयति—**षडवन्तीति**। षण्मिलित्वा ये प्रयोग जात्यादिकमवन्ति रक्षन्ति, ते षडवा स्वरा'। षडवेषु जात षाडवम्। जातार्थे ऽण्प्रत्ययः। औडुव लक्षयति—**वान्तीति**। उडवो नक्षत्राणि वान्ति यान्त्यस्मिन्नित्युडुव व्योम। तच्च भूतेषु पञ्चमम्। तेन पञ्चसख्या लक्ष्यते। औडुवी सख्या विद्यते येषा स्वराणा त औडुवा. पञ्च स्वरा । ते जाता यत्र गीते तदौडुवितमुच्यते। जातार्थ इतच्प्रत्ययः। तत्सबन्धात्पञ्चस्वरमौडुव विदुर्बुधा भरतादय' ॥ ५४—५६- ॥

(क०) पूर्व द्विविधस्याप्यल्पत्वस्य सामान्येन प्रायो लोप्यविषय-त्वमुक्त्वेदानीं तस्यैव कदाचिल्लोप्यविशेषव्यवस्था दर्शयति—**क्रमादिति**। अल्पाल्पतरते, अल्पश्चाल्पतरश्चाल्पाल्पतरौ स्वरौ, तयोर्भावावल्पाल्पतरते, अत्र द्वद्वान्ते श्रुतस्य तल. प्रत्येकमभिसंबन्धो ऽल्पता ऽल्पतरता चेति, अल्पता ऽनभ्यास , अल्पतरता लङ्घनम्, सपूर्णत्वदशायां यासा जातीना संपूर्णत्वाद्यवस्थात्रय संभवति, तासा संपूर्णत्वावस्थायामेव ते षाडवौडुवकारिणोः क्रमात्स्त' , षाडवकारिण स्वरस्याल्पता, औडुवकारिण स्वरस्याल्पतरतेति प्रयोज्ये भवत । यासा जातीना तु सपूर्णत्वषाडवत्वाख्यावस्थाद्वयमेव, तासु षाडवकारिणो ऽल्पतैव, औडुवकारिणो ऽभावादल्पतरता न स्यात्, यास्तु नित्यपूर्णास्तासु लोप्यस्वराभावादल्पत्वमनशविषयमेवेत्यवगन्तव्यम्। अल्पत्व-प्रयोगे कृतस्य नियमस्य क्वचिद्विधिना बाधं दर्शयति—**पञ्चम्यां त्विति**।

वचनं विधिरप्राप्ताविहाल्पत्वबहुत्वयोः ॥ ५८ ॥
परिसंख्या द्वयोः प्राप्तावेकस्यातिशयाय यत् ।

तुशब्दो ऽत्रेतरजातिवैलक्षण्यद्योतनार्थ । विपर्ययो ऽन्यथाभाव । एतदुक्तं भवति—अवस्थात्रयवत्या पञ्चम्या पूर्णत्वलक्षणे 'सगमा स्वल्पका मता' इत्यनेन वक्ष्यमाणेन षड्जमध्यमयोरषाडवौडुवकारित्वादप्राप्तौ 'क्रमाद्रेन निगाभ्या च षाडवौडुविता मता' इति षाडवकारित्वाद्गाधारे प्राप्तौ च संभूय त्रयाणामल्पत्ववचनेन निषादे ऽप्यौडुवकारित्वेन बहुत्वस्य प्राप्तौ 'ऋषभ-पञ्चमनिषादा अपन्यासा' इति बहुत्ववचनेन च नियमस्य बाध, यथा 'प्राङ्मुखो ऽन्नानि भुञ्जीत' इत्यस्य लक्ष्मीव्रते 'संपत्काम पश्चिमाशामु-खाशी' इत्येन वचनेन । ननु विषयव्यवस्थया सर्वजातिषु नियतस्याल्पत्वस्य पञ्चम्या कथं विपर्यय इत्यत आह—**वचनं विधिरिति** । इह पञ्चम्या-मल्पत्वबहुत्वयो· स्वरधर्मयोरप्राप्तौ, अत्र षाडवौडुवकारिणो षड्जमध्य-मयोरल्पत्वस्य, औडुवकारिणि निषादे बहुत्वस्य चाप्राप्तौ सत्याम्, वचनम्, 'दौर्बल्यं चात्र विज्ञेय षड्जगाधारमध्यमै' इति षड्जमध्यमयोः साक्षादल्पत्वस्य, 'सनिषादावपन्यासौ' इत्यपन्यासलिङ्गेन निषादे बहुत्वस्य च भरतोक्तमेतद्वचन विधि 'प्रात संध्यामुपासीत' इति वचनवत् । विधीयते ऽनेनेति करणे 'उपसर्गे घो किः' इति किप्रत्यये सति विधिरिति रूपम् । ननु षड्जमध्यमयोरप्राप्तावल्पत्ववचन निषादे ऽप्यप्राप्तौ बहुत्ववचनं विधिरस्तु, इह षाडवकारित्वेनाल्पत्वविषये गाधारप्राप्तौ सत्या मपि पुनरल्पत्वविधानं किमितीत्याशयवानाह—**परिसंख्येति** । द्वयो, इह षाडवौडुवकारिणोर्गांधारनिषादयोर्द्वयो प्राप्तावल्पत्वधर्मितया प्राप्तौ सत्याम्, एकस्य तयोरेकस्य गाधारस्य, अतिशयाय रक्तिविशेषाय यदल्पत्ववचनम्, परिसंख्या, सा परिसख्या भवतीत्यर्थ । यत्तदो संबन्धस्य नित्यत्वादत्र

अथ प्रत्येकमेतासां जातीनां लक्ष्म कथ्यते ॥ ५९ ॥

सेति तच्छब्दाध्याहार कर्तव्य· । परिसख्योदाहरणं यथा—'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इति । चयनप्रकरणे 'इमामगृभ्णन्-' इति मन्त्रे रशनालिङ्गेन प्राप्तयोरश्वगर्दभाभिधान्यो 'तस्मादश्वाद्गर्दभो ऽश्वतर' इति निकृष्टाया गर्दभाभिधान्या अश्वाभिधानी श्रेयसीत्येवैकस्या अतिशयाय 'इमामगृभ्णन्रशनामृतस्य' इति मन्त्रानुवादेन 'अश्वाभिधानीमादत्ते' इति यत्तदर्थं शास्त्रवचनं परिसंख्या, तद्वत् । परिसंख्याया इतरपरिवर्जनफलत्वादिहापि निषादस्याप्यल्पत्वनिषेध. फलम् ॥ -५७—५८- ॥

(सु०) **क्रमादिति** । षाडवौडुवकारिणौ यौ स्वरौ तयोः सपूर्णत्वदशाया क्रमादल्पाल्पतरते ज्ञातव्ये । यस्य लोपेन षाडवत्व तस्य स्वरस्य सपूर्णत्वदशायामल्पत्वम्, यस्य च लोपेनौडुवत्व तस्य सपूर्णत्वदशायामल्पतरत्वम् । पञ्चम्या तु जातौ विपर्यय —यस्य लोपेन षाडवत्व तस्याल्पतरत्वम्, यस्य लोपेनौडुवत्व तस्याल्पत्वमिति । **वचनमिति** । 'क्रमादल्पाल्पतरते' इत्यनेन न्यायेनाल्पत्वबहुत्वयोरप्राप्तौ सत्या यद्वचन स विधिः, अप्राप्तप्रापकत्वात् । द्वयो· प्राप्तावेकस्य वचन परिसख्या । तद्वचनमेकस्यातिशयाय । विधिपरिसख्ययोर्लक्षणमुक्त भट्टाचार्यैः.—

'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसख्येति गीयते ॥'

इति ॥ -५७—५८- ॥

(क०) ग्रहादीना त्रयोदशाना जातिलक्षणाना प्रत्येकमन्वर्थतया स्वरूपं निरूप्य, तानि षाड्ज्यादिषु सप्तसु शुद्धविकृतान्योन्यसंसर्गजातासु षड्जकैशिक्यादिष्वेकादशसु चेत्यष्टादशसु जातिषु क्रमेण प्रत्येकं यथासंभवं

षाड्ज्यामंशाः स्वराः पञ्च निषादर्षभवर्जिताः ।
निलोपात्षाडवं सो ऽत्र पूर्णत्वे काकली क्वचित् ॥ ६० ॥
सगयोः सधयोश्चात्र संगतिर्बहुलस्तु गः ।
गांधारे ऽंशे न नेर्लोपो मूर्च्छना धैवतादिका ॥ ६१ ॥

योजयित्वा सप्रस्तारं दर्शयितुमाह—**अथ प्रत्येकमित्यादिना** । प्रत्येकमेकस्यामेकस्याम् । यथाऽर्थे वीप्सायामव्ययीभावः । तासु षाड्ज्या निषादर्षभवर्जिता पञ्च स्वरा सगमपधा अंशाः । ते पर्यायेण वादिनो ग्रहाश्च भवन्तीत्यर्थः । निलोपान्निषादपरित्यागात्षाडव षट्स्वरप्रयोगः, कार्यमिति शेषः । स निषाद , अत्र षाड्ज्या पूर्णत्वे संपूर्णावस्थाया क्वचित्षड्जस्य वादित्वे विकृतदशाया काकली भवति । **सगयोः सधयोश्चात्र संगतिरिति** । अत्र षड्जस्य गाधारेणैकान्तरितेन तादृशेनैव धैवतेन च यथारक्ति संबन्धः सगसगसधेति गसगसधसेति वा कार्य , गस्तु गाधारस्तु बहुल इति । यद्यपि 'निगावन्यविवादिनौ' इति विवादित्वाद्गाधारस्याप्राप्त बहुत्वम्, तथाऽपि 'गाधारस्य च बाहुल्यम्' इति मुनिवचनाद्विधीयत इति तुशब्दार्थः । गाधारे ऽंशे न नेर्लोपः । निषादस्य गाधारसवादित्वादंशसवादिनो लोपाभावादिति भावः । एतेनावस्थाद्वयवत्या अप्यस्याः षाड्ज्या गाधारस्याशत्वे निलोपप्रतिषेधेन षाडवापवादात्पूर्णताऽवस्थैवेत्युक्तं भवति । अतो ऽस्या समपधेषु चतुर्ष्वंशेषु संपूर्णत्वषाडवत्वाख्यावस्थाद्वयं व्यवस्थितम् । षड्जे ऽंशे ऽपि तस्यैव ग्रहापन्यासत्वात्केवलाशुद्धताया पूर्णतैवेत्यस्याः पूर्णताया षडशाः षाडवत्वे चत्वार इति मतङ्गोक्ता दशाशा वेदितव्याः । एवमवस्थाऽऽपन्नांशसंख्या जात्यन्तरेष्वप्यूह्या । मूर्च्छना धैवतादिका, अस्या षाड्जग्रामिकतया धैवतादिकोत्तरायता मूर्च्छना, न तु मध्यमग्रामीणा पौर-

त्रिधा तालः पञ्चपाणिरत्र चैककलाऽऽदिकः ।
क्रमान्मार्गाश्चित्रवृत्तिदक्षिणा गीतयः पुनः ॥ ६२ ॥
मागधी संभाविता च पृथुलेति क्रमादिमाः ।
नैष्क्रामिकध्रुवायां च प्रथमे प्रेक्षणे स्मृतः ॥ ६३ ॥

वीत्यर्थ । अस्या तालमार्गगीतिविनियोगाना नियम दर्शयति—**त्रिधा ताल** इत्यादिना । अत्र षाड्ज्याम्, एककलाऽऽदिक , एककलो द्विकलश्चतुष्कल इति त्रिधा च पञ्चपाणिः षट्पितापुत्रक', प्रयोक्तव्य इति शेष' । क्रमान्मार्गा इत्यनेनैककले पञ्चपाणौ चित्रो मार्गो मागधी गीति , द्विकले वार्त्तिको मार्ग' सभाविता गीति , चतुष्कले दक्षिणो मार्गः पृथुला गीतिरिति क्रमो दर्शित । अत्र षाड्ज्यामित्युपलक्षणम् । जात्यन्तरेष्वपि तालान्तरेष्व-प्येककलत्वादीना योजना कर्तव्या, उत्तरत्र 'योक्ता ऽस्माभि कलासंख्या' इत्यादिना सामान्येन वक्ष्यमाणत्वात् । तालादीना लक्षण तु स्वप्रकरणे वक्ष्यते । तथा प्रथमे प्रेक्षणे नैष्क्रामिकध्रुवाया च विनियोग स्मृत इति योजना । प्रथमप्रेक्षणे नाटकादीना प्रथमाङ्के । **नैष्क्रामिकध्रुवायामिति** । ध्रुवासामान्यलक्षण तावद्भरतोक्तम्—

'यानि चैव निबद्धानि च्छन्दोवृत्तिविधानत' ।
मुखप्रतिमुखादीनि गीताङ्गान्येव सर्वश ॥
यदात्मकानि तानि स्युर्ध्रुवासंज्ञानि नाटके ।'

इति । तद्विशेषाश्च—

'प्रावेशिकी तु प्रथमा द्वितीया ऽऽक्षेपिकी स्मृता ॥
प्रासादिकी तृतीया च चतुर्थी चान्तरा ध्रुवा ।
नैष्क्रामिकी तु विज्ञेया पञ्चमी तु ध्रुवा बुधै' ॥'

विनियोगो द्वादशात्र कला अष्टलघुः[1] कला ।

इति प्रवेशाद्यर्थसूचनादेतासामन्वर्थता ज्ञेया । अपकृष्टे ताडिताऽऽदयो गुरुलघ्वक्षरोभयप्रायास्त्रिविधा अपि ध्रुवाजातय प्रावेशिक्यादीनामेवावान्तर-भिदा । एतासा सतालत्वमेव पदमधिकृत्योक्तम् 'सताल च ध्रुवाऽर्थेषु निबद्धम्' इति । तत्रैव स्मृतम् 'अनिबद्धाक्षराणि स्युस्तेनेनप्रभृतीनि च[2]' इति । 'तत्राङ्कान्ते निष्क्रमणे भवेत्त्र्यश्रावसानिकी' । अस्या· प्रस्तु-तार्थनियोग·—

'निष्क्रामोपगतगुणा विद्यान्नैष्क्रामिकीं ता तु ।'
'अथोत्तमाना कर्तव्या चतुरश्रावसानिकी ।
अधमाना तु कर्तव्या ध्रुवा त्र्यश्रावसानिकी ॥'

नैष्क्रामिकी—'त्र्यश्रे विरामस्त्रिकलश्चतुरश्रे चतुष्कल ।
प्रावेशिक्या ध्रुवाया तु नैष्क्रामिक्या तथैव च ॥'

इति । एव तत्तत्तालविशेषनियताया नैष्क्रामिक्या ध्रुवाया विनियोग । ध्रुवापदानामेतज्जात्युक्तस्वरसदर्भेण योजन नाट्याङ्गत्वेन । चकारात्स्वा-तन्त्र्येणापि ब्रह्मप्रोक्तपदैरन्यैर्वा शंकरस्तुतावेव विनियोग· समुच्चीयते । स्मृत·, भरतादिभिरिति शेष । **द्वादशात्र कला** इति । अत्र षाड्ज्या कला: कालविशेषा द्वादश, अत्रोक्तस्य पञ्चपाणेर्यथाऽक्षरत्वे द्वादशमात्रिकत्वात् । कलाशब्देन प्रतीतस्य कालविशेषस्य ध्रुवाऽऽदिमार्गभेदाश्रितत्वेनानेकरूपत्वा-दिह किंप्रमाणो विवक्षित इत्याकाङ्क्षायामाह—**अष्टलघुः कलेति** । अत्र लघुशब्देन पञ्चलघ्वक्षरोच्चारमित. कालो विवक्ष्यते । तादृशा अष्टौ लघवो यस्या. कलाया· सा ऽष्टलघुः । एतेनात्र कला दक्षिणमार्गाश्रितेति

[1] अष्टगुरुः
[2] स्युर्यान्यजातिकृतानि तु

अस्यां षाड्ज्यां षड्जो न्यासः। गांधारपञ्चमावपन्यासौ। वराटी दृश्यते। अस्याः प्रस्तारः—

१ षाड्जी

१　सा सा सा सा पा निध पा धनि
　　तं　भ व ल ला　ट

गम्यते। तथा च वक्ष्यति—'योक्ता ऽस्माभि कलासंख्या सा दक्षिणपथे स्थिता' इति। अतो ऽत्र चतुष्कलस्य पञ्चपाणेर्द्विरावृत्तिरवगन्तव्या। यदा तु वृत्तिमार्गाश्रयणेन चतुर्विंशति कलास्तदा द्विकलपञ्चपाणेश्चतुरावृत्तय। यदा पुनश्चित्रमार्गाश्रयणेनाष्टाचत्वारिंशत्कलास्तदा यथाऽक्षरपञ्चपाणेरष्टावृत्तयः। एव तालान्तरमप्यूह्यम् ॥-५९—६३- ॥

(सु०) अथैतासा जातीना प्रत्येक लक्षण कथयितुं प्रतिजानीते—अथेति। षाड्जीलक्षण कथयति—षाड्ज्यामिति। षाड्ज्या षड्जगाधारमध्यमपञ्चमधैवता अशाः। तेषा च विकल्पेनाशत्वम्, 'गाधारे ऽशे न नेर्लोपः' इति वक्ष्यमाणत्वात्। मतङ्गेनाप्युक्तम्—'इति त्रिषष्टिरशा स्युस्तेषामेकैकशो ऽशता' इति। निषादलोपेन षाडवम्। स निषादः पूर्णत्वे काकली। षड्जगाधारयो षड्जधैवतयोश्च सगतिः। गाधारस्य बाहुल्यम्। गाधारो यदा ऽंशस्तदा निलोपात्षाडव नास्ति। धैवतादिर्मूर्च्छना। पञ्चपाणिः षट्पितापुत्रक एककलो द्विकलश्चतुष्कलश्चात्र तालः। यदैककलस्तदा चित्रो मार्ग, यदा द्विकलस्तदा वार्त्तिकः, यदा चतुष्कलस्तदा दक्षिणो मार्ग इति। गीतयः पुनः—यदा चित्रो मार्गस्तदा मागधी, यदा वार्त्तिकस्तदा सभाविता, यदा दक्षिणस्तदा पृथुला। प्रथमे प्रेक्षणे नैष्क्रामिकध्रुवाया विनियोग। अत्र द्वादश कला। कलायामष्टौ गुरवः ॥ -५९—६३- ॥

(क०) अस्या षाड्ज्या षड्जो न्यास इति वदतो ऽयं भाव—अस्या षाड्ज्या विकृतावस्थासु ग्रहादीनामनियमत्वे ऽपि नामस्वरस्यैव

२.	री	गम	गा	गा	सा	रिग	धस	धा
	न	य	ना		बु	जा		धि
३	रिग	सा	री	गा	सा	सा	सा	सा
	कं							
४	धा	धा	नी	निसं	निध	पा	सां	सां
	न	ग	सू		नु	प्र	ण	य
५	नी	धा	पा	धनि	री	गा	सा	गा
	के		लि		स	मु		द्भ
६	सा	धा	धंनि	पा	सा	सा	सा	सा
	वं							
७.	सा	सा	गा	सा	मा	पा	मा	मा
	स	र	स	कृ	त	ति	ल	क
८	सा	गा	मा	धनि	निध	पा	गा	रिग
	पं			का	नु	ले	प	
९.	गा	गा	गा	गा	सा	सा	सा	सा
	न							
१०.	धा	सा	री	गरि	सा	मा	मा	मा
	प्र	ण	मा		मि	का		म
११.	धा	नी	पा	धनि	री	गा	री	सा
	दे		हें		ध	ना	न	
१२.	रिग	सा	री	गा	सा	सा	सा	सा
	ल							

न्यासत्व शुद्धाया विकृतासु च नियतमिति । गाधारपञ्चमावपन्यासाविति विकृतावस्थामाश्रित्योक्तिः । शुद्धताया तु नामस्वरस्य षड्जस्य वापन्यासत्वं

कर्तव्यम् । यदाह मतङ्ग:—'शुद्धत्वे षड्जश्चापन्यास' इति । **वराटी दृश्यत** इति । यदा विकृतावस्थायामपि काकलीप्रयोगस्तदा वराटी प्रतीयते । अन्यदा वराटचेकदेशप्रतीतिरेवेत्यर्थ । प्रस्तार इह कलासु स्वरसनिवेश , क्रियत इति शेष: । तत्र षड्जग्रामे शुद्धस्वरमेलने प्रथमकलाया तावन्मध्यस्थानस्थित षड्ज· पञ्चलघ्वक्षरोच्चारमितलघुकाल-श्चतुर्वारमावर्त्यते , ततस्तत्स्थान एव पञ्चमो लघुकाल एक· , ततस्तत्रत्यावेव निषादधैवतौ मिलित्वैकलघुकालौ , पुन पञ्चम एकलघुकाल. , ततो धैवतनिषादौ मिलित्वैकलघुकालौ , इत्येका कला । अस्या तं भवललाटेति ब्रह्मप्रोक्तपदाक्षरै: स्वरयोजनाप्रकारस्तु— तं, इति सानुनासिकेन प्रथम षड्ज , तच्छेषतयैव द्वितीय , भवाभ्या तृतीयचतुर्थौ , लेन पञ्चम: , लेन दीर्घेण निषाद· , तच्छेषत्वेन धैवतपञ्चमौ , टेन धैवत· , तच्छेषो निषाद इति (१) । द्वितीयस्या मध्यस्थाने रिर्लघु , गमौ लघु· , द्वौ गौ लघू , सो लघु , रिगौ लघु , धसौ लघु: , धो लघु· । अत्र नयनाम्बुजाधीत्यक्षर-योजना—नेन रि· , येन ग· , तच्छेषो म· , सानुनासिकदीर्घेण नेन ग· , तच्छेषो ग: , बुना स· , दीर्घेण जेन रि: , तच्छेषा गधसा· , धिना ध (२) । तृतीयस्या रिगौ लघु , सरिगास्त्रयो लघव· , ततश्चत्वार: षड्जा लघव· । अत्र कमित्यक्षरयोजना—केन सानुनासिकेन रि: , तच्छेषा इतरे स्वरा. (३) । चतुर्थ्यो मध्यस्थानौ धौ लघू , निर्लघु. , नितारसौ लघु· , मध्ये निधौ लघु· , पो लघु: , तारे सौ लघू । नगसूनु-प्रणयेत्यक्षरयोजना—नगसूभिर्धधनय: , तच्छेषौ निसौ , नुना नि· , तच्छेषो ध· , प्रणयै पससा· (४) । पञ्चम्या मध्यस्थाने निधपा लघव· , धनी लघु: , रिगसगा लघव· । केलिसमुद्भेत्यक्षरयोजना—केऽक्षरेण नि ; तच्छेषो ध· , लीत्यनेन प· , तच्छेषौ धनी , सेन रि: , मु, इत्यनेन

ग·, तच्छेष स·, द्वेन ग (५)। षष्ठ्या मध्ये सो लघु ; मन्द्रे धो लघु·, धनी लघु·, पो लघु·, मध्ये साश्चत्वारो लघव । वमित्यक्षर-योजना—वेन सानुनासिकेन स , तच्छेषा इतरे (६)। सप्तम्या मध्ये ससगसमपममा लघव सरसकृततिलकाक्षरै क्रमेण युक्ताः (७)। अष्टम्या मध्ये सो लघु·, गो लघुः, मो लघु·, धनी लघु , निधौ लघु·, पो लघु , गो लघु , रिगौ लघु·। पङ्कानुलेपेत्यक्षरयोजना—सानुनासिकेन पेन स·, तच्छेषौ गमौ, दीर्घेण केन ध·, तच्छेषो नि , नुना नि· तच्छेषो ध·, लेऽक्षरेण पः, पेन ग , तच्छेषौ रिगौ (८)। नवम्या मध्ये गाश्चत्वारो लघव·, साश्चत्वारो लघव·, नमित्यक्षरयोजना—नेन सानुनासिकेन ग , तच्छेषा इतरे (९)। दशम्या मन्द्रे धो लघु·, मध्ये सो लघु., रिर्लघु·, गरी लघु·, सममा लघव·। प्रणमामि कामेत्यक्षरयोजना—प्रणमाऽक्षरैर्धसरयः, तच्छेषौ गरी, मिना स·, दीर्घेण केन मः, तच्छेषो म , ततो मेन म· (१०)। एकादश्या मध्ये धनिपा लघव , धनी लघु·, रिगरिसा लघव·। देहेन्धनानेत्यक्षरयोजना—देकारेण ध , तच्छेषो नि , हें, इत्यनेन प , तच्छेषौ धनी, धनानेत्येतैः क्रमेण रिगरय·। तच्छेष· स· (११)। द्वादश्या मध्ये रिगौ लघु , सरिगास्त्रयो लघवः, चत्वारः षड्जा लघव । लमित्यक्षरयोजना—लेन सानुनासिकेन रिः, शेषा सर्वे ऽपि स्वरा. (१२)।

तं भवललाटनयनाम्बुजाधिकं नगसूनुप्रणयकेलिसमुद्भवम् ।
सरसकृततिलकपङ्कानुलेपनं प्रणमामि कामदेहेन्धनानलम् ॥

अत्र स्वरसंख्या ऽल्पत्वबहुत्वपरिज्ञानाय लिख्यते। षड्जा षट्त्रिंशत्, ऋषभा द्वादश, गाधारा विंशतिः, मध्यमा अष्टौ, पञ्चमा अष्टौ, धैवताः षोडश, निषादा द्वादशेति मिलिता द्वादशोत्तरं शतम्। अयं

अथार्षभी

आर्षभ्या तु त्रयो ऽंशाः स्युर्निषादर्षभधैवताः ॥ ६४ ॥
द्विश्रुत्योः संगतिः शेषैर्लङ्घनं पञ्चमस्य च ।
षाडवं षड्जलोपेन सपलोपादिहौडुवम् ॥ ६५ ॥
मूर्च्छना पञ्चमादिश्च तालश्चच्चत्पुटो मतः ।
अष्टौ कला भवन्तीह विनियोगस्तु पूर्ववत् ॥ ६६ ॥

प्रस्तार· षड्जाशत्वे । गाधाराद्यशत्वे ऽप्येवमेवाशबहुत्वादिना सम्यग्विचार्योद्धारो नेय । गाधाराद्यंशत्वमपि स्वस्थानस्थितानामेव । तेषा स्थायित्वकरणमपि वीणायामुपतन्त्रीणा स्वनादसाम्यापादनमिति रहस्यम् । षाड्ज्यादिसर्वजातिष्वंशस्वरगतो रसो वेदितव्यः ॥ इति षाड्जी ॥ १ ॥

(क०) **आर्षभ्यां त्विति** । तुशब्दो ऽस्या षाड्जीवैलक्षण्यद्योतनार्थ । निषादर्षभधैवतास्त्रयो ऽंशा ग्रहाश्च स्यु । द्विश्रुत्योर्गांधारनिषादयोः प्रत्येकं शेषै· सरिमपधै पञ्चभिर्यथायोगं संगति. संबन्ध । एतेन गाधारनिषादयोर्बहुत्वमितरेषामल्पत्वमिति च सूचितम् । पञ्चमस्य लङ्घनं च । लङ्घनमल्पतरत्वम् । चकारादल्पत्व च संपूर्णताऽवस्थाया भवति । षाडवं षड्जलोपेनेत्यादि स्फुटार्थम् ॥ -६४—६६ ॥

(सु०) आर्षभी लक्षयति—**आर्षभ्यामिति** । आर्षभ्या निषादर्षभधैवतास्त्रयो ऽशाः । गाधारनिषादयोर्द्विश्रुत्योरन्यैः स्वरैः सह सगतिः । पञ्चमस्येषत्स्पर्शः । षड्जाभावेन षाडवत्वम् । षड्जपञ्चमाभावेन चौडुवितत्वम् । पञ्चमादिर्मूर्च्छना । चच्चत्पुटस्तालः । अष्टौ कलाः । विनियोगः पूर्ववन्नैष्क्रामिकध्रुवायाम् ॥ -६४—६६ ॥

अस्यामार्षभ्यामृषभो न्यासः । अंशा एवापन्यासाः । देशीमधुकर्यौ दृश्येते । अस्याः प्रस्तारः—

२ आर्षभी

१.	री	गा	सा	रिग	मा	रिम	गा	रिरि
	गु	ण	लो		च	ना		धि
२.	री	री	निध	निध	गा	रिम	मा	पनि
	क	म	न		न्त	म	म	र
३.	मा	धा	नी	धा	पा	पा	सा	गा
	म	ज	र	म		क्ष	य	
४.	नी	धनि	री	गरि	सधं	गरि	री	री
	म	जे					यं	
५	री	मा	गरि	सधं	सस	रिस	रिग	मम
	प्र	ण		मा			मि	दिव्य
६.	निध	पा	री	री	रिप	गरि	सधं	सा
	म	णि	द		र्प	णा		म
७.	रिस	रिस	रिग	रिग	मा	मा	मा	गरि
	ल	नि	के				तं	
८.	पा	नी	री	मा	गरि	सधं	गरि	गरि
	भ	व	म	मे				यं

(क०) **देशीमधुकर्यौ दृश्येते** इति । देशीमधुकर्यौ सदृशरागत्वादृषभाङ्गत्वेन प्रस्तुताया आर्षभ्या गाने तयोः प्रतीतिर्भवतीति भावः । षड्जग्रामे शुद्धस्वरमेलने प्रथमकलाया मध्ये रिगसास्त्रयो लघवः, रिगावेकः, मश्चैकः, रिमावेकः; ग एकः; ऋषभावेकः, एवमष्टौ लघवः । अत्र गुणलोचनाधीत्यक्षराणि—गुणलोभिः क्रमेण रिगसाः; तच्छेषौ रिगौ; चनाभ्यां मरी;

तच्छेषा मगरयः, धिना रिः (१)। द्वितीयस्या मध्य ऋषभौ द्वौ, निधावेक., पुनर्निधावेक, ग एक, रिमावेकः, म एक., पनी एकः, एवमष्टौ लघव। कमनन्तममरेत्यक्षराणि—कमनै रिरिनय·, तच्छेषा धनिधा, न्तमाभ्या गरी, तच्छेषो मः, मराभ्या मपौ, तच्छेषो निः (२)। तृतीयस्या मध्ये मधनिधपपसगा अष्टौ लघव, मजरमक्षयेत्यक्षराणि—मजरमैर्मधनिधा·, तच्छेषौ पौ, क्षयाभ्या सगौ (३)। चतुर्थ्यां मध्ये निरेक·, धनी एक., रिरेकः, गरी एकः, समन्द्रधावेक, मध्ये गरी एक, ऋषभौ द्वौ, एवमष्टौ लघवः। मजेयमित्यक्षराणि—मजे इत्याभ्या निधौ, तच्छेषा अष्टौ परा·, यमित्यनेनोपान्त्यो रिः, तच्छेषो रिः (४)। पञ्चम्या मध्ये रिरेक., म एक, गरी एक·, समन्द्रधावेक·, मध्ये सावेकः, रिसावेक·, रिगावेक·, मावेकः, एवमष्टौ लघव। प्रणमामि दिव्येत्यक्षराणि—प्रणाभ्या रिमौ, तच्छेषौ गरी, दीर्घेण मेन सः, तच्छेषा धससरिसाः, मिना रि, तच्छेषो ग., दिव्याभ्या मौ (५)। षष्ठ्या मध्ये निधावेकः, प एक·, ऋषभौ द्वौ, रिपावेक, गरी एकः, समन्द्रधावेक, मध्ये स एक, एवमष्टौ लघवः। मणिदर्पणामेत्यक्षराणि—मेन निः, तच्छेषो ध; णिदाभ्या परी, तच्छेषो रिः, र्पेण रि, तच्छेष. प·, दीर्घेण णेन गः, तच्छेषा रिसधा·, मेन स· (६)। सप्तम्या रिसौ द्विर्द्वौ, रिगौ द्विर्द्वौ, मध्यमास्त्रय·, गरी एकः, एवमष्टौ लघव। लनिकेतमित्यक्षराणि—लेन रि, तच्छेष. स, निना रिः, तच्छेष. स·, के इत्यनेन रिः, तच्छेषा गरिगममाः, तमित्यनेन मः, तच्छेषौ गरी (७)। अष्टम्या मध्ये पनिरयस्त्रयः, म एकः, गरी एक, समन्द्रधावेक·, मध्ये गरी द्विर्द्वौ, एवमष्टौ लघवः। भवममेयमित्यक्षराणि—भवममे, इत्येतै· पनिरिमा·, तच्छेषा गरिसधगरयः, यमित्यनेन ग·, तच्छेषो रिः (८)।

गुणलोचनादिकमनन्तममरमजरमक्षयमजेयम्।
प्रणमामि दिव्यमणिदर्पणामलनिकेतं भवममेयम्॥

अथ गाधारी

पञ्चांशा रिधवर्ज्याः स्युर्गांधार्यां संगतिः पुनः ।
न्यासांशाभ्यां तदन्येषां धैवतादृषभं व्रजेत् ॥ ६७ ॥
रिलोपरिधलोपाभ्यां षाडवौडुविते क्रमात् ।
पञ्चम· षाडवद्वेषी निसमध्यमपञ्चमा· ॥ ६८ ॥
अंशा द्विषन्त्यौडुवितं कलाः षोडश कीर्तिताः ।
मूर्च्छना धैवतादिः स्यात्तालश्चच्चत्पुटो मतः ॥ ६९ ॥
विनियोगो ध्रुवागाने तृतीयप्रेक्षणे भवेत् ।

अत्रापि स्वरसंख्या प्रस्तारत एव द्रष्टव्या, अंशान्तरप्रस्तारेष्वभ्यूहनीया । इत्यार्षभी ॥ २ ॥

(क०) **पञ्चांशा** इति । अस्या गाधार्यां रिधवर्ज्या पञ्च सगमपनयो ऽंशा ग्रहाश्च स्युः; सगति पुन संगतिस्तु, न्यासाशाभ्या न्यासेन गाधारेणाशेन गमपनिसेष्वन्यतमेन, तदन्येषा न्यासादुपात्ताशाच्चान्येषा पर्यायाशानंशरूपाणां च, भवतीति शेष· । **धैवतादृषभं व्रजेदिति** । पूर्णताऽवस्थायां कदाचिद्धैवतर्षभयो संगतिः स्यादित्यर्थः । पञ्चम षाडवद्वेषीत्यादिनैतदुक्तं भवति—यदा पञ्चमो ऽंशो भवति तदा सपूर्णावस्थैवेति, निसमा यदा ऽंशास्तदा संपूर्णषाडवावस्थे द्वे एवेति च । एतेन गाधाराशत्व एवास्यास्तिस्रो ऽवस्था इति ज्ञायते । 'पञ्चम· षाडवद्वेषी निसमध्यमपञ्चमा·, अंशा द्विषन्त्यौडुवितम्' इत्यस्योपपत्तिराचार्यवचनं च रक्तगाधार्यां सम्यगभिधास्यते, तत एवावगन्तव्यम् । कला षोडश कीर्तिता इति चतुष्कलस्य चच्चत्पुटस्य दक्षिणमार्गे चतुरावृत्तिरुक्ता । **मूर्च्छना धैवतादिः स्यादिति** । अस्या गाधार्यां माध्यमग्रामिकत्वात्पौरवी मूर्च्छनेत्यर्थः ।

अस्यां गांधार्यां गांधारो न्यासः । षड्जपञ्चमावपन्यासौ । गांधारपञ्चमदेशीवेलावल्यो दृश्यन्ते । अस्याः प्रस्तारः—

३ गाधारी

१	गा	गा	सा	नी	सा	गा	गा	गा
	ए			तं				
२	गा	गम	पा	पा	धप	मा	निध	निसं
	र	ज	नि	व	धू		मु	ख
३	निध	पनि	मा	मपरि	गा	गा	गा	गा
	वि			भ्र	म		दं	
४	गा	गम	पा	पा	धप	मा	निध	निसं
	नि	शा	म	य	व	रो		रु

तृतीयप्रेक्षणे ध्रुवागान इति ध्रुवासामान्यनिर्देशात्प्रावेशिक्यादिषु यथोचितं विनियोग इत्यर्थः ॥ ६७—६९- ॥

(सु०) गाधारीं लक्षयति—**पञ्चाशा** इति । गाधार्यां षड्जगाधारमध्यमपञ्चमनिषादा विकल्पेन पञ्चाशा । न्यासाशस्वराभ्यां सहान्येषां सगतिः । धैवतादृषभपर्यन्तमारोहणं कर्तव्यम् । ऋषभलोपात्षाडवम्, ऋषभधैवतलोपादौडुवितम् । पञ्चमेऽशे षाडवं नास्ति, निषादषड्जपञ्चमेष्वंशेष्वौडुवितं नास्ति । षोडश कलाः । धैवतादिर्मूर्च्छना । चञ्चत्पुटस्तालः । ध्रुवागाने तृतीयप्रेक्षणे विनियोगः ॥ ६७—६९- ॥

(क०) षड्जपञ्चमावपन्यासाविति विकृतत्वविवक्षया । **गांधारपञ्चमदेशीवेलावल्यो दृश्यन्त** इति । गाधारपञ्चमो ग्रामरागः । दृश्यन्त

५ निध पनि मा मपरि मा गा मा सा
त व मु ख वि ला स

६ गा सा गा गा गा गम गा गा
व पु श्चा रु म म ल

७. गा गम पा पा धप मा निध निसं
मृ दु कि र ण

८ निध पनि मा मपरि गा गा गा गा
म मृ त भ व

९. री गा मा पध री गा सा सा
र ज त गि रि शि ख र

१०. नीं नी नी नीं नी नी नीं नीं
म णि श क ल शं ख

११. गा गम पा पा धप मा निध निसं
व र यु व ति द त

१२ निध पनि मा मपरि गा गा गा गा
पं क्ति नि भं

१३. नी नी पा नी गा मा गा सा
प्र ण मा मि प्र ण य

१४. गा सा गा गा गा गम गा गा
र ति क ल ह र व नु

१५ गा पा मा मा निध निसं निध पनि
दं

१६ मा परिग गा गा गा गा गा गा
श शि न

इत्यनेन गाधारांशप्रस्तारगाने तेषामेकदेशेन प्रतीतिरूह्या । माध्यमग्रामिक-शुद्धस्वरमेलने प्रथमकलाया मध्ये गगसा लघवस्त्रयः, मन्द्रे निरेक , मध्ये स एकः, गास्त्रयः, एवमष्टौ लघवः । एतमित्यक्षरे—एकारेण ग., तच्छेषा गसनय , तमित्यनेन स , तच्छेषा गास्त्रय (१) । द्वितीयस्या मध्ये ग एक·, गमावेकः, पौ द्वौ, धपावेकः, म एक , निधावेकः; निषादतारषड्जावेक·, एवमष्टौ लघवः । रजनिवधूमुखेत्यक्षराणि—रजाभ्या गौ, तच्छेषो म , निवधूभिः पपधा., तच्छेषौ पमौ, मुना नि., तच्छेषो ध· । खेन नि·, तच्छेष स (२) । तृतीयस्या मध्ये निधावेकः, पनी एक·, म एक·, मपरय एक , गाश्चत्वार , एवमष्टौ लघवः । विभ्रम-दमित्यक्षराणि—विना निः, तच्छेषा धपनिमा·, भ्रेण म·, तच्छेषौ परी, मेन ग·, तच्छेषो गः, दमिति ग·, तच्छेषो ग· (३) । द्विती-यावच्चतुर्थी कला । निशामय वरोरु, इत्यक्षराणि—निशाभ्या गौ, तच्छेषो मः, मयवै पपधाः, तच्छेषः प·, रो इति म , तच्छेषौ निधौ, रुणा नि , तच्छेषः स· (४) । पञ्चम्या तृतीयावत्प्रथमादयो लघव· षट्, उपान्त्यान्त्यौ मध्यमषड्जौ । तव मुखविलासेत्यक्षराणि—तेन नि , तच्छेषो ध·, वेन प , तच्छेषो नि , मुखाभ्या मौ, तच्छेषौ परी, विलाभ्या गौ, तच्छेषो म·, सेन स· (५) । षष्ठ्या मध्ये गसौ द्वौ, गास्त्रय·, गमावेकः, गौ द्वौ, एवमष्टौ लघव । वपुश्चारुमम-लेत्यक्षराणि—वपुश्चारुभिर्गसगगाः, तच्छेषो ग·, मेन ग·, तच्छेषो मः, मलाभ्या गौ (६) । चतुर्थीवत्सप्तमी । मृदुकिरणेत्यक्षराणि—मृदुभ्यां गौ, तच्छेषो मः, किरणै पपधा , तच्छेषा इतरे (७) । तृतीयावदष्टमी । ममृतभवमित्यक्षराणि—मेन नि·, तच्छेषो ध·, मृणा प., तच्छेषो नि., तभाभ्यां मौ, तच्छेषौ परी, वमिति गः, तच्छेषा इतरे (८) । नवम्या मध्ये रिगमास्त्रयो लघव , पधावेक., रिगौ

द्वौ, सौ द्वौ, एवमष्टौ लघव । रजतगिरिशिखरेत्यक्षराणि—रजतगिभि. क्रमेण रिगमपा, तच्छेषो ध, रिशिखरै रिगससाः (९) । दशम्या मन्द्रे ऽष्टौ निषादा लघव । मणिशकलशङ्खेत्यक्षराणि —मणिशकलशमित्येतै· पण्निषादा, तच्छेष उपान्त्य, खेनान्त्य· (१०) । सप्तमीवदेकादशी । वरयुवतिदन्तेत्यक्षराणि—वराभ्या गौ, तच्छेषो म, युवतिभि· पपधा., तच्छेष प, दमिति म; तच्छेषौ निधौ, तेन नि, तच्छेष· सः (११) । अष्टमीवद् द्वादशी । पङ्क्तिनिभमित्यक्षराणि—पेन नि·, तच्छेषा धपनय., ङ्क्तिनिभ्या मौ, तच्छेषौ परी, भमिति ग·, तच्छेषा गा· (१२) । त्रयोदश्या मध्ये निनिपनिगमगसा अष्टौ लघव· । प्रणमामि प्रणयेत्यक्षराणि —चतुर्थो माक्षरशेष· (१३) । चतुर्दश्या मध्ये गसौ द्वौ, गास्त्रय, गमावेक, गौ द्वौ, एवमष्टौ लघवः । रतिकलहरवनु, इत्यक्षराणि, मध्यमो रशेष (१४) । पञ्चदश्या मध्ये गपौ द्वौ, मौ द्वौ, निधावेक, निषादतारषड्जावेक, मध्ये निधावेक, पनी एक·, एवमष्टौ लघव । ढमिति ग, तच्छेषा इतरे (१५) । षोडश्या मध्ये म एक·, परिगा एक, गा षट्, एवमष्टौ लघव. । शशिनमित्यक्षराणि—शशिभ्या मपौ, तच्छेषा रिस्त्रयो गाश्च, नमिति ग·, तच्छेषास्त्रयो गा· (१६) ।

एतं रजनिवधूमुखविभ्रमदं निशामय वरोरु
तव मुखविलासवपुश्चारुममलमृदुकिरणममृतभवम् ।
रजतगिरिशिखरमणिशकलशङ्खवरयुवतिदन्तपङ्क्तिनिभं
प्रणमामि प्रणयरतिकलहरवनुदं शशिनम् ॥

अत्र शशिप्रणामो ऽपि शशिन शशिशेखरसबन्धाच्छंकरस्तुतावेव पर्यवस्यति, अथ वा शशिनो ऽष्टमूर्तिधरमूर्तिभेदत्वात्तत्प्रणाम एवेति मन्तव्यम् ॥ इति गाधारी ॥ ३ ॥

अथ मध्यमा

पञ्चांशा मध्यमायां स्युरगांधारनिषादकाः ॥ ७० ॥
षड्जमध्यमबाहुल्यं गांधारो ऽल्पो ऽत्र षाडवम् ।
गलोपान्निगलोपेन त्वौडुवं स्यात्कलाऽष्टकम् ॥ ७१ ॥
ऋषभादिर्मूर्च्छना स्यात्तालश्चच्चत्पुटो मतः ।
विनियोगो ध्रुवागाने द्वितीयप्रेक्षणे भवेत् ॥ ७२ ॥

अस्यां मध्यमायां मध्यमो न्यासः । अंशा एवापन्यासाः । चोक्षषाडवदेश्यान्धाल्यो दृश्यन्ते । अस्याः प्रस्तारः—

४ मध्यमा

१	मा	मा	मा	मा	पा	धनि	नी	धप
	पा		तु	भ	व		मू	
२.	मा	पम	मा	सा	मा	गा	री	री
	र्ध	जा			न	न		

(क०) **पञ्चांशा** इति । मध्यमायामगाधारनिषादका पञ्च सरिमपधा अंशा ग्रहाश्च स्युः । षड्जमध्यमबाहुल्ये प्राप्ते ऽपि पुनर्ग्रहण तयो. पर्यायाशत्वे ऽपि वादिवद्बाहुल्यसिद्ध्यर्थम् । गाधारो ऽल्प इति पूर्णतायामिति मन्तव्यम् । अत्र षाडवमिति स्पष्टो ऽर्थ. ॥ -७०—७२ ॥

(सु०) मध्यमा लक्षयति—**पञ्चाशा** इति । मध्यमाया षड्जर्षभमध्यमपञ्चमधैवता विकल्पेनाशाः । षड्जमध्यमौ बहुलौ । गाधारो ऽल्प' । गाधारलोपात्षाडवम् । निषादगाधारलोपादौडुवितम । अष्टौ कलाः । ऋषभादिर्मूर्च्छना । चच्चत्पुटस्तालः । द्वितीयप्रेक्षणे ध्रुवागाने विनियोगः ॥ -७०—७२ ॥

३.	पा	मा	रिम	गम	मा	मा	मा	मा
	कि	री	ट					
४	मां	निध	निसं	निध	पम	पध	मा	मा
	म	णि	द		र्प		णं	
५	नी	नी	री	री	नी	री	री	पा
	गौ		री		क	र	प	
६	नीं	मप	मा	मा	सा	सा	सा	सा
	ल्ल	वा			गु	लि		सु
७	गां	नी	सां	गां	धप	मा	धनि	सां
	ते						जि	त
८.	पा	सां	पा	निधप	मा	मा	मा	मा
	सु	कि	र		णं			

(क०) **चोक्षषाडवेति** । शुद्धषाडवो ग्रामरागः । माध्यमग्रामिकशुद्ध-स्वरमेलने प्रथमकलाया मध्ये मध्यमाश्चत्वारो लघवः, प एक , धनी एक. , निरेक. , धपावेकः, एवमष्टौ लघव । पातु भवमू इत्यक्षराणि—पा, इति म· , तच्छेषौ मौ; तुभवैर्मपधा· , तच्छेषो निः, मू, इति नि· , तच्छेषौ धपौ (१) । द्वितीयस्या मध्ये म एक. ; पमावेक. , मसमगरिरयः षट् , एवमष्टौ लघव. । धंजाननेत्यक्षराणि—धंजाभ्यां मपौ, तच्छेषा ममसाः; ननाभ्या मगौ, तच्छेषौ री (२) । तृतीयस्या मध्ये पमौ द्वौ, रिमावेक. ; गमावेकः; माश्चत्वारः, एवमष्टौ लघवः । किरीटेत्यक्षराणि—किरीटैः पमरयः; तच्छेषा इतरे (३) । चतुर्थ्यां तारे म एक· , मध्ये निधावेकः, नितारषड्जावेक , मध्ये निधावेकः, पमावेक· , पधावेकः; मौ द्वौ, एवमष्टौ लघवः । मणिदर्पणमित्यक्षराणि—मणिभ्या मनी, तच्छेषो ध. , देन निः, तच्छेषाः सनिधा , र्पेण पः, तच्छेषा मपधाः;

अथ पञ्चमी

रिपावंशौ तु पञ्चम्यां सगमाः स्वल्पका मताः ।
रिमयोः संगतिर्गच्छेत्पूर्णत्वे गान्निषादकम् ॥ ७३ ॥

णमिति म·, तच्छेषो म. (४) । पञ्चम्या मन्द्रे नी द्वौ, मध्ये री द्वौ, मन्द्रे निः, मध्ये रिरिपास्त्रयः, एवमष्टौ लघव· । गौरीकरपेत्यक्षराणि—गौ, इति नि., तच्छेषो नि , री, इति रि , तच्छेषो रिः, करपैर्निरिरय·, तच्छेषः प (५) । षष्ठ्या मन्द्रे निरेक·, मध्ये मपावेक , मौ द्वौ, साश्चत्वारः, एवमष्टौ लघवः । ल्लवाङ्गुलिस्वित्यक्षराणि—ल्लवा इति निमौ, तच्छेषा पममा., गुलिभ्या सौ, तच्छेष· स., सुना स (६) । सप्तम्या तारे ग , मध्ये नि , तारे सगौ, मध्ये धपावेक , म एक , धनी एक , तारे स एक·, एवमष्टौ लघव. । तेजितमित्यक्षराणि—ते इति ग·, तच्छेषा· परे षट् स्वराः, जिना ध·, तच्छेषो नि , तमिति सः (७) । अष्टम्या मध्ये प एकः, तारे स एक , पुनर्मध्ये प एक , निधपा एकः, माश्चत्वार , एवमष्टौ लघवः । सुकिरणमित्यक्षराणि—सुकिरै. पसपाः, तच्छेषा निधपा , णमिति मः, तच्छेषास्त्रय (८) ।

पातु भवमूर्धजाननकिरीटमणिदर्पणम् ।
गौरीकरपल्लवाङ्गुलिसुतेजितं सुकिरणम् ॥ इति मध्यमा ॥४॥

(क०) **रिपावंशाविति** । सगमा स्वल्पका मता इत्यत्र समयोरषाडवौडुवकारित्वेनाप्राप्तावल्पत्ववचनं विधिरिति, गस्य षाडवौडुवकारित्वेन प्राप्तौ पुनर्वचनं परिसख्येति च 'पञ्चम्या तु विपर्यय·' इत्यादिग्रन्थव्याख्यानसमये पूर्वं प्रतिपादितम् । संपूर्णत्वदशाया गान्निषादक गच्छेदिति, गन्यो. संगति कुर्यादित्यर्थः । एतेन षाडवत्वे गस्यौडुवत्वे निगयोश्च लोप्यत्वात्तत्र तयो. संगति न कुर्यादिति गम्यते । गेन निगाभ्या चेत्यत्र लुप्तेन

क्रमाद्गेन निगाभ्यां च षाडवौडुवता मता[1] ।
ऋषभो ऽंशस्त्वौडुवितं द्वेष्ट्यष्टौ च कला मताः ॥ ७४ ॥
मूर्च्छनाऽऽदि तु पूर्वावत्प्रेक्षणं तु तृतीयकम् ।

अस्यां पञ्चम्यां पञ्चमो न्यासः । ऋषभपञ्चमनिषादा अपन्यासाः । चोक्षपञ्चमदेश्यान्धाल्यो दृश्यन्ते । अस्याः प्रस्तारः—

५ पञ्चमी

१	पा	धनि	नी	नी	मा	नी	मा	पा
	ह	र	मू		र्ध	जा		न

लुप्ताभ्यामिति चाध्याहार कार्यः । क्रमात्षाडवौडुवता, गेन षाडव निगाभ्यामौडुवमिति क्रमात्, षाडवौडुवयोर्भाव षाडवौडुवता । **ऋषभो ऽंशस्त्वौडुवितं द्वेष्टी**ति । अस्यामौडुवकारिणोर्निगयोर्ऋषभे ऽंशे संवादित्वाभावे ऽपि,

'ऋषभश्चैव पञ्चम्या कैशिक्या चैव धैवतः ।
एवं हि द्वादशैते स्युर्वर्ज्याः पञ्चस्वरे सदा ॥'

इति मुनिवचनबलादौडुवत्वं निषिध्यत इति मन्तव्यम् । **मूर्च्छनाऽऽदि तु पूर्वा**वदिति । पूर्वावन्मध्यमायामिवात्रापि मूर्च्छनर्षभादिः । आदिशब्देन चच्चत्पुटश्च तालो गृह्यते । अन्यदुक्तप्रायम् ॥ ७३—७४- ॥

(सु०) पञ्चमीं लक्षयति—**रिपाविति** । पञ्चम्यामृषभपञ्चमावंशौ, षड्जगाधारमध्यमा अल्पाः, ऋषभमध्यमयोः सगतिः, पूर्णत्वे गाधारान्निषादपर्यन्तमारोहणम्, गाधारलोपात्षाडवम्, निषादगाधारलोपादौडुवितम्, ऋषभे ऽंश औडुवित नास्ति, अष्टौ कलाः । ऋषभादिर्मूर्च्छना । चच्चत्पुटस्तालः । ध्रुवाया तृतीयप्रेक्षणे विनियोगः ॥ ७३—७४- ॥

[1] षाडवौडुविते मते

२ गा गा सा सा मा मा पा पा
नं म हे श म म र

३ पा पा धा नीं नीं नी गा सा
प ति बा हु स्तं भ

४ पा मा धा नी निध पा पा पा
न म नं तं

५. पा पा रीं रीं रीं रीं रीं रीं
प्र ण मा मि पु रु ष

६. मा निग सा सध नी नी नी नी
मु ख प द्म ल क्ष्मी

७. सां सां सां मा पा पा पा पा
ह र मं बि का प

८ धा मा धा नी पा पा पा पा
ति म जे यं

(क०) माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्ये प एको लघु·, धनी एक·, नी द्वौ, मनिमपाश्चत्वारः, एवमष्टौ लघव· । हरमूर्धजानेत्यक्षराणि—हराभ्यां पधौ, तच्छेषो नि , मू इति निः, तच्छेषो नि , र्धजाभ्या मनी, तच्छेषो म·, नेन प· (१) । द्वितीयस्या मध्ये गौ द्वौ, सौ द्वौ, मन्द्रे मौ द्वौ, पौ द्वौ, एवमष्टौ लघव· । नं महेशममरेत्यक्षराणि—नं महे इति गगसा., तच्छेष स·, शममरैर्ममपपाः (२) । तृतीयस्या मन्द्रे पौ द्वौ, ध एक·, निषादास्त्रयः, मध्ये ग एक., स एक , एवमष्टौ लघव· । पतिबाहुस्तम्भेत्यक्षराणि—पतिबा इति पपधा·, तच्छेषो निः, हुस्तमिति निषादौ, तच्छेषो ग., भेन स· (३) । चतुर्थ्यां मध्ये

अथ धैवती

स्तो धैवत्यां रिधावंशौ लङ्घयावारोहिणौ सपौ ॥ ७५ ॥
पलोपात्षाडवं प्रोक्तमौडुवं सपलोपतः ।
ऋषभादिर्मूर्च्छना स्यात्तालो मार्गश्च गीतयः ॥ ७६ ॥
विनियोगश्च षाड्जीवत्कला द्वादश कीर्तिताः ।

पमधनयश्चत्वारः, निधावेक·, पास्रयः, एवमष्टौ लघवः । नमनन्तमित्यक्षराणि—नमनमिति पमधा , तच्छेषो नि., तमिति नि., तच्छेषा इतरे (४) । पञ्चम्या मध्ये पौ द्वौ, तार ऋषभा· षट्, एवमष्टौ लघव· । प्रणमामि पुरुषेत्यक्षराणि— प्रणमा इति पपरय , तच्छेषो रि.; मिपुरुषैश्चत्वार ऋषभा (५) । षष्ठ्या मन्द्रे म एकः, मन्द्रनिमध्यगावेक., स एक , सधावेक·, निषादाश्चत्वार , एवमष्टौ लघव । मुखपद्मलक्ष्मीत्यक्षराणि—मुखाभ्या मनी, तच्छेषो ग·, पद्माभ्या सौ, तच्छेषौ धनी, लेन नि , तच्छेषो नि , क्ष्मीति नि , (६) । सप्तम्या तारे सास्रय , मध्ये म एक·, पाश्चत्वार·, एवमष्टौ लघवः । हरमम्बिकापेत्यक्षराणि—हरममिति सास्रय , तच्छेषो म , बिकाभ्या पौ, तच्छेष. प., पेति प (७) । अष्टम्या मध्ये धमधनयश्चत्वारः, पाश्चत्वारः, एवमष्टौ लघव· । तिमजेयमित्यक्षराणि—तिमजे इति धमधा·, तच्छेषो नि , यमिति प·, तच्छेषा परे (८) ।

हरमूर्धजाननं महेशममरपतिबाहुस्तम्भनमनन्तम् ।
तं प्रणमामि पुरुषमुखपद्मलक्ष्मीहरमम्बिकापतिमजेयम् ॥

इति पञ्चमी ॥ ५ ॥

(क०) **स्तो धैवत्यामिति** । आरोहिणावारोहिवर्णगौ सपौ लङ्घ्यौ लङ्घनीयौ, पूर्णावस्थायामल्पतरौ कर्तव्यावित्यर्थः । एतेनावरोहे सपावल्पौ

अस्यां धैवत्यां धैवतो न्यासः । ऋषभमध्यमधैवता अपन्यासाः । चोक्षकैशिकदेशीसिंहल्यो दृश्यन्ते । अस्याः प्रस्तारः—

६ धैवती

१. धा धा निध पध मा मा मा मा
त रु णा म लें दु

२. धा धा निध निसं सां सां सां सां
म णि भू षि ता म

३ सध धा पा मध धा निध धनि धा
ल शि रो जं

४ सा सा रिग रिग सा रिग सा सा
भु ज गा धि पै क

५ धा धा नीं पा धा पा मा मा
कुं ड ल वि ला स

६ धा धा पा मंधं धा निधं धंनि धा
कृ त शो भ

७ धा धा निसं निसं निध पा पा पा
न ग सू नु ल क्ष्मी

कर्तव्यौ, न त्वल्पतराविति गम्यते । पलोपात्षाडवमित्यादि. स्पष्टार्थो ग्रन्थः ॥ -७५—७६- ॥

(सु०) धैवतीं लक्षयति—स्तो धैवत्यामिति । धैवत्यामृषभधैवतावशौ । आरोहिवर्णस्थौ षड्जपञ्चमौ लङ्घ्यावीषत्स्पर्शयोग्यौ । पञ्चमलोपात्षाडवम् । षड्जपञ्चमलोपादौडुवितम् । ऋषभादिर्मूर्च्छना । अत्र षाड्जीवत्तालमार्गगीतिविनियोगाः । द्वादश कलाः ॥ -७५—७६- ॥

८	रिग	सा	सा	सा नीं	नी	नी	नी
	दे	हा		धं	मि		श्रि
९.	सा	रिग	रिग	सा नीं	सा	धा	धा
	त	श	री			र	
१०.	रीं	गंरिं	मंगं	मा मा	मा	मा	मा
	प्र	ण	मा	मि	भू		त
११.	नी	नी	धा	धा पा	रिग	सा	रिग
	गी		तो	प	हा		र
१२.	पा	धा	सा	मा धा	नी	धा	धा
	प	रि	तु			ष्टं	

(क०) षाड्जग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्ये धौ लघू, निधावेक , पधावेक , माश्चत्वार , एवमष्टौ लघव· । तरुणामलेन्द्वित्यक्षराणि—तरुणा, इति धधनयः, तच्छेषा धपधा , मलें, इति मौ, तच्छेषो म , दुना म (१) । द्वितीयस्या मध्ये धौ द्वौ, निधावेक , निसावेक·, साश्चत्वार , एवमष्टौ लघव. । मणिभूषितामेत्यक्षराणि—मणिभूभिर्धधनय , तच्छेषा धनिसा , षिताभ्या सौ, तच्छेष· स·, मेन स. (२) । तृतीयस्या मध्ये सधावेक , धपौ द्वौ, मधावेकः, ध एक , निधावेक·, धनी एक., ध एकः, एवमष्टौ लघव· । लशिरोजमित्यक्षराणि—लेन स·, तच्छेषो ध , शिरो इति धपौ, तच्छेषा मधधनिधा , ज, इति ध., तच्छेषौ निधौ (३) । चतुर्थ्यां मध्ये सौ द्वौ, रिगौ द्विर्द्वौ, स एक·, रिगावेक , सौ द्वौ, एवमष्टौ लघव । भुजगाधिपैकेत्यक्षराणि—भुजगाभिः ससरय , तच्छेषा गरिगा , धिपै इति सरी, तच्छेषौ गसौ, केन स. (४) । पञ्चम्या मन्द्रे धौ द्वौ, निपधपाश्चत्वार·, मौ द्वौ, एवमष्टौ लघव । कुण्डलविलासेत्यक्षराणि— द्वितीयोपान्त्यौ शेषौ (५) । षष्ठ्या

मन्द्रे धौ द्वौ, प एक, मधावेक., ध एक, निधावेक, धनी एक, ध एकः, एवमष्टौ लघव.। कृतशोभमित्यक्षराणि—कृतशोभिर्धधपा·, तच्छेषा मधधनिधा, भमिति ध, तच्छेषौ निधौ (६)। सप्तम्या मध्ये धौ द्वौ, द्वौ नितारषड्जौ द्विद्वौ, निधावेक·, पास्त्रय, एवमष्टौ लघवः। नगसूनुलक्ष्मीत्यक्षराणि—नगसूभिर्धधनय., तच्छेषा सनिसाः, नुना नि, तच्छेषो धः, लेन प, तच्छेष प·, क्ष्मीति प (७)। अष्टम्या मध्ये रिगावेकः, सास्त्रय, मन्द्रे निषादाश्चत्वार, एवमष्टौ लघव.। देहार्धमिश्रीत्यक्षराणि—दे, इति रिः, तच्छेषो ग, हा, इति सः, तच्छेषौ सौ, र्धमिभ्या नी, तच्छेषो निः, श्रिणा नि (८)। नवम्या मध्ये स एकः, रिगौ द्विद्वौ, सनिसास्त्रय., धौ द्वौ, एवमष्टौ लघव। तशरीरमित्यक्षराणि—तशाभ्या सरी, तच्छेषो गः, री, इति रि·, तच्छेषा गसनिसा., रमिति ध, तच्छेषो ध· (९)। दशम्या मन्द्रे रिरेक·, गरी एक·, मगावेक, मा· पञ्च, एवमष्टौ लघव.। प्रणमामि भूतेत्यक्षराणि—प्रणाभ्या रिगौ, तच्छेषो रि., मा इति म, तच्छेषौ गमौ, मिभूभ्या मौ, तच्छेषो म, तेन म. (१०)। एकादश्या मध्ये नी द्वौ, धौ द्वौ, प एक, रिगावेकः, स एकः, रिगावेक·, एवमष्टौ लघव। गीतोपहारेत्यक्षराणि—गी इति नि, तच्छेषो निः, तो, इति ध, तच्छेषो ध, पहाभ्या परी, तच्छेषौ गसौ, रेण रि, तच्छेषो गः (११)। द्वादश्या मध्ये पधसमधनय· षट्, धौ द्वौ, एवमष्टौ लघवः। परितुष्टमित्यक्षराणि—परितुभिः पधसा., ष्टमित्युपान्त्य· (१२)।

तरुणामलेन्दुमणिभूषितामलशिरोजं
भुजगाधिपैककुण्डलविलासकृतशोभम्।
नगसूनुलक्ष्मीदेहार्धमिश्रितशरीरं
प्रणमामि भूतगीतोपहारपरितुष्टम्॥ इति धैवती॥ ६॥

अथ नैषादी

नैषाद्यां निरिगा अंशा अनंशाबहुलाः स्मृताः ॥ ७७ ॥
षाडवौडुवलङ्घ्याः स्युः पूर्वावद्विनियोजनम् ।
चच्चत्पुटः षोडशात्र कला गादिश्च मूर्च्छना ॥ ७८ ॥

अस्यां नैषाद्यां निषादो न्यासः । अंशा एवापन्यासाः । चोक्षसाधारितदेशीवेलावल्यो दृश्यन्ते । अस्याः प्रस्तारः—

७ नैषादी

१. नी नी नी नी सां धा नी नी
तं सु र वं दि त

(क०) **नैषाद्यामिति** । अनंशाबहुला निरिगा अंशा स्मृता इति योजना । अनंशा समपधा अबहुला अल्पत्वयुक्ता येषु निरिगेष्वंशेषु ते ऽंशा बहुला स्मृता । अन्यथा ऽनंशा षड्जादयो बहुला. स्मृता इति पदभेदेन भिन्नवाक्यत्वे 'पूर्णावस्थाया षड्जमध्यमपञ्चमधैवतानामल्पत्वं षाडवे षड्जमध्यमधैवतानामल्पत्वमौडुवे मध्यमधैवतयोरल्पत्वम्' इति मतङ्गवचनेन 'अनभ्यासस्त्वनंशेषु' इति स्ववचनेन च विरोध स्यात् । पूर्वावद् धैवत्यामिव षाडवौडुवलङ्घ्या· स्यु, पलोपात्षाडवं सपलोपादौडुवमारोहिणौ सपौ लङ्घ्यौ चेति षाडवौडुवलङ्घ्या, विनियोजनं च षाड्जीवदिति । अन्यद्व्याख्यातचरम् ॥ -७७, ७८ ॥

(सु०) नैषादीं लक्षयति—**नैषाद्यामिति** । नैषाद्या निषादर्षभगाधारा विकल्पेनाशाः । षड्जमध्यमपञ्चमधैवता बहुलाः (?) । पञ्चमलोपात्षाडवम्, षड्जपञ्चमलोपादौडुवितम् । षड्जपञ्चमौ लङ्घ्यौ । प्रथमे प्रेक्षणे नैष्क्रामिकध्रुवाया विनियोगः । चच्चत्पुटस्तालः । षोडश कला. । गाधारादिर्मूर्च्छना ॥ -७७, ७८ ॥

२	पा	मा	सा	धा	नी	नीं	नीं	नीं
	म	हि	ष	म	हा		सु	र
३	सा	सा	गा	गा	नी	नी	धा	नी
	म	थ	न	मु	मा		प	ति
४	सां	सां	धा	नी	नी	नी	नी	नी
	भो		ग	यु	तं			
५	सा	सा	गा	गा	मा	मा	मा	मा
	न	ग	सु	त	का		मि	नी
६	नीं	पा	धा	पा	मा	मा	मा	मा
	दि		व्य	वि	शे		ष	क
७	रीं	गां	सां	सां	रीं	गां	नी	नी
	सू		च	क	शु	भ	न	ख
८	नी	नी	पा	धनि	नी	नी	नी	नी
	ढ		र्प	ण	कं			
९	सा	सा	गा	सा	मा	मा	मा	मा
	अ	हि	मु	ख	म	णि	ख	चि
१०	मा	मा	मा	मां	नीं	धा	मा	मा
	तो		ज्ज्व	ल	नू		पु	र
११	धा	धा	नी	नी	री	गा	मा	मा
	बा	ल		भु	जं	ग		म
१२	मा	मा	पा	धा	नीं	नीं	नीं	नीं
	र	व	क	लि		तं		
१३	पां	पा	नीं	नीं	री	री	री	री
	द्रु	त	म	भि	व्र	जा		मि

१४.	री	मा	मा	मा	री	गा	सा	सा
	श	र	ण	म	निं		दि	त
१५.	धा	मा	री	गा	सा	धा	नी	नी
	पा		द	यु	ग	पं		क
१६	पां	मां	रीं	गां	नी	नी	नी	नी
	ज	वि	ला		सं			

(क०) षाड्जग्रामिकशुद्धस्वरमेलने प्रथमकालाया मध्ये निषादाश्चत्वार., तारे स एक·, मध्ये ध एक , नी द्वौ, एवमष्टौ लघव । तं सुरवन्दितेत्यक्षराणि—तमिति नि·, तच्छेषो नि., सुरवमिति निनिसा , तच्छेषो ध·, दिताभ्या नी (१) । द्वितीयस्या मध्ये पमसास्त्रय·, मन्द्रे ध एक , निषादाश्चत्वार , एवमष्टौ लघव· । महिषमहासुरेत्यक्षराणि—षष्ठ शेष (२) । तृतीयस्या मध्ये सौ द्वौ, गौ द्वौ, नी द्वौ, धनी द्वौ, एवमष्टौ लघव· । मथनमुमापतिमित्यक्षराणि—षष्ठ· शेष (३) । चतुर्थ्यां तारे सौ द्वौ, मध्ये ध एक·, निषादा पञ्च ; एवमष्टौ लघव· । भोगयुतमित्यक्षराणि—भो इति सः, तच्छेष स , गयुतमिति धनिनय , तच्छेषा इतरे (४) । पञ्चम्या मध्ये सौ द्वौ, गौ द्वौ, मन्द्रे माश्चत्वार , एवमष्टौ लघव· । नगसुतकामिनीत्यक्षराणि—षष्ठः शेष (५) । षष्ठ्या मन्द्रे निपधपाश्चत्वार , माश्चत्वार , एवमष्टौ लघव. । दिव्यविशेषकेत्यक्षराणि— द्वितीयषष्ठौ शेषौ (६) । सप्तम्या तारे रिगससरिगा षट्, मध्ये नी द्वौ, एवमष्टौ लघव· । सूचकशुभनखेत्यक्षराणि—द्वितीयः शेष (७) । अष्टम्या मध्ये निनिपास्त्रय·, धनी एक , निषादाश्चत्वार , एवमष्टौ लघव. । दर्पणकमित्यक्षराणि—देन नि., तच्छेषो नि·; र्पणाभ्या पधौ, तच्छेषो नि , कमिति निः, तच्छेषा

इतरे (८)। नवम्या मध्ये सम्मगसाश्चत्वारः, माश्चत्वार, एवमष्टौ लघवः। अहिमुखमणिखचीत्यक्षराणि (९)। दशम्या मन्द्रे माश्चत्वार·, निधौ द्वौ, मौ द्वौ, एवमष्टौ लघव·। तोज्ज्वलनूपुरेत्यक्षराणि—द्वितीयषष्ठौ शेषौ (१०)। एकादश्या मध्ये धौ द्वौ, नी द्वौ, रिगौ द्वौ, मन्द्रे मौ द्वौ, एवमष्टौ लघव.। बालभुजंगमेत्यक्षराणि—तृतीयसप्तमौ शेषौ (११), द्वादश्या मन्द्रे मौ द्वौ, प एक, ध एक·, निषादाश्चत्वार, एवमष्टौ लघव। रवकलितमित्यक्षराणि—रवकलिभिर्ममपधा, तच्छेषो नि., तमिति नि., तच्छेषावितरौ (१२)। त्रयोदश्या मन्द्रे पौ द्वौ, नी द्वौ, मध्य ऋषभाश्चत्वार., एवमष्टौ लघव·। द्रुतमभिव्रजामीत्यक्षराणि—सप्तम· शेष (१३)। चतुर्दश्या मध्ये रिरेक·, मास्त्रय., रिगौ द्वौ, सौ द्वौ, एवमष्टौ लघव। शरणमनिन्दितेत्यक्षराणि—षष्ठ शेष· (१४)। पञ्चदश्या मध्ये धमरिगसधाः षट्, नी द्वौ, एवमष्टौ लघव। पादयुगपङ्केत्यक्षराणि—द्वितीयसप्तमौ शेषौ (१५)। षोडश्या तारे पमरिगाश्चत्वार, मध्ये निषादाश्चत्वार., एवमष्टौ लघव। जविलासमित्यक्षाणि—जविलाभि. पमरय·, तच्छेषो ग, समिति निः, तच्छेषा. परे (१६)।

तं सुरवन्दितमहिषमहाऽसुरमथनमुमापति भोगयुतं
नगसुतकामिनीदिव्यविशेषकसूचकशुभनखदर्पणकम्।
अहिमुखमणिखचितोज्ज्वलनूपुरबालभुजंगमरवकलितं
द्रुतमभिव्रजामि शरणमनिन्दितपादयुगपङ्कजविलासम्॥

इति नैषादी॥ ७॥

इति षाड्ज्यादय सप्त जातय शुद्धतालक्षणयुक्ता एव प्रस्तारे दर्शिता। लक्षणेषु नामस्वराव्यतिरेकेण स्वरान्तराणा ग्रहाशापन्यासत्ववचनं तु तासामेव विकृतदशायामपि नियमप्रदर्शनार्थमित्यवसेयम्॥

अथ षड्जकैशिकी

अंशाः स्युः षड्जकैशिक्यां षड्जगांधारपञ्चमाः ।
ऋषभे मध्यमे ऽल्पत्वं धनिषादौ मनाग्बहू ॥ ७९ ॥
चच्चत्पुटः षोडशास्यां कलाः स्युर्विनियोजनम् ।
प्रावेशिक्यां ध्रुवायां स्यात्प्रेक्षणे तु द्वितीयके ॥ ८० ॥

अस्यां षड्जकैशिक्यां गांधारो न्यासः । षड्जनिषादपञ्चमा अपन्यासाः । प्रागुक्ता गांधारपञ्चमहिन्दोलकदेशीवेलावल्यो दृश्यन्ते । अस्याः प्रस्तारः—

८. षड्जकैशिकी

१. सा सा मा पा गरि मग मा मा
दे

२. मा मा मा मा सा सा सा सा
वं

(क०) अथ ससर्गजविकृतजातिषु प्रथमा षड्जकैशिकी—**अंशाः स्युरिति । ऋषभे मध्यमे ऽल्पत्वमिति** । इहानंशेषु रिमधनिषु प्राप्तमल्पत्व रिमयोर्नियम्यते । **धनिषादौ मनाग्बहू** इति । अंशीभूतसगपापेक्षया ऽल्पत्वमल्पीभूतरिमापेक्षया बहुत्व धन्यो कर्तव्यमित्यर्थः । **चच्चत्पुट** इत्यादि । स्पष्टो ऽर्थ ॥ ७९, ८० ॥

(सु०) षड्जकैशिकीं लक्षयति—**अंशाः स्युरिति** । षड्जकैशिक्या षड्जगाधारपञ्चमा अंशाः, ऋषभमध्यमयोरल्पत्वम्, धैवतनिषादयोः किंचिद्बहुत्वम् । चच्चत्पुटस्तालः । षोडश कलाः । प्रावेशिक्या ध्रुवाया द्वितीयप्रेक्षणे विनियोगः ॥ ७९, ८० ॥

३. धा धा पा पा धा धा री रिम
अ स क ल श शि ति ल

४. री री नीं नीं नीं नीं नीं नीं
कं

५ धा धा पा धनि मा मा पा पा
द्वि र द ग ति

६. धा धा पा धनि धा धा पा पा
नि पु ण म तिं

७ सा सा सा सा सा सा सा सा
मु ग्ध मु खा बु

८. धा धा पा धा धनि धा धा धा
रु ह दि व्य का ति

९. सा सा सा रिग सा रिग धा धा
ह र मं बु दो द

१०. मा धा पा पा धा धा नी नी
धि नि ना दं

११ री री गा सा सां सा सा गा
अ च ल व र सू नु

१२. धा रिंसं रीं संरि री सा सा सा
दे हा र्ध मि श्रि

१३. सा सरि री सरि री सा सा सा
त श री रं

१४. मा मा मा मा निध पध मा मा
प्र ण मा मि तम ह

१५. नी नी पा पम पा पम पध रिग
अ नु प म मु ख क म

१६. गा गा गा गा गा गा गा गा
ल

(क०) **गांधारो न्यास** इति। 'गाधारश्च भवेन्नचास·' इति मुनिवचनात्। तेन 'न्यासवर्ज्यैतल्लक्षणहीनाः' इत्यत्र न्यासवर्ज्येत्यस्य विकृत-जातिलक्षणाशस्य [1]संसर्गजविकृताविषयत्वमुक्तं भवति। षाड्जग्रामिकशुद्ध-स्वरमेलने प्रथमकलाया मध्ये सौ द्वौ; मन्द्रे मपौ द्वौ, मध्ये गरी एक.; मगावेकः, मौ द्वौ, एवमष्टौ लघवः। दे इति प्रथम. स·, तच्छेषा इतरे (१)। द्वितीयस्या मध्ये माश्चत्वार., मन्द्रे साश्चत्वार·, एवमष्टौ लघव.। वमिति म., तच्छेषा इतरे (२)। तृतीयस्या मध्ये धौ द्वौ, पौ द्वौ, धौ द्वौ, रिरेक., रिमावेकः; एवमष्टौ लघवः। असकलशशितिलेत्यक्षराणि, अन्त्यः शेषः (३)। चतुर्थ्यां मध्ये री द्वौ; मन्द्रे निषादा षट्, एवमष्टौ लघव.। कमिति रि·; तच्छेषा इतरे (४)। पञ्चम्या मध्ये धौ द्वौ, प एक, धनी एक, मौ द्वौ, पौ द्वौ, एवमष्टौ लघव.। द्विरदगतिमित्यक्षराणि—द्विरदगैर्धधपधा·, तच्छेषो निः; तिमिति म.; तच्छेषा परे (५)। षष्ठ्या मध्ये धौ द्वौ, प एकः, धनी एकः, धौ द्वौ, पौ द्वौ, एवमष्टौ लघव.। निपुणमतिमित्यक्षराणि—निपुणमैर्धधपधा·, तच्छेषो नि., तिमिति ध, तच्छेषा परे (६)। सप्तम्या मध्ये षड्जा अष्टौ लघवः। मुग्धमुखाम्बित्यक्षराणि—मुना सः, तच्छेष. सः, ग्धेन सः, तच्छेषः स; मुखाभ्या सौ, तच्छेषः स, बुना सः (७)। अष्टम्यां मध्ये धधपधाश्चत्वारः, धनी एक, धास्त्रय., एवमष्टौ लघव.। रुहदिव्यकान्तिमित्यक्षराणि, चतुर्थषष्ठोपान्त्या· शेषा (८)।

[1] संसर्गवर्ज्यविकृ०

नवम्या मध्ये सास्रयः, रिगावेकः, स एक·, रिगावेकः, धौ द्वौ, एवमष्टौ लघव· । हरमम्बुदोदेत्यक्षराणि—हरमं इति सा., तच्छेषौ रिगौ, बुदोभ्या सरी, तच्छेषौ गधौ, देन ध (९) । दशम्या मध्ये मधौ द्वौ, पौ द्वौ, धौ द्वौ, नी द्वौ, एवमष्टौ लघव । धिनिनादमित्यक्षराणि—धिनिनाभिर्मधपाः, तच्छेष पः, दमिति धः, तच्छेषा परे (१०) । एकादश्या मध्ये रिरिगसाश्चत्वार , मन्द्रे सास्रयः, ग एक , एवमष्टौ लघव । अचलवरसून्वित्यक्षराणि, सप्तम शेष (११) । द्वादश्या मन्द्रे ध एक., रिसावेक , रिरेक·, सरी एकः, रिरेकः, सास्रय·, एवमष्टौ लघव· । देहार्धमिश्रीत्यक्षराणि—दे इति ध·, तच्छेषौ रिसौ, हा इति रि·, तच्छेषौ सरी, र्धमिभ्या रिसौ, तच्छेष स., श्रिणा सः (१२) । त्रयोदश्या मध्ये स एकः, सरी एक , रिरेक , सरी एक·, रिरेक·, सास्रय , एवमष्टौ लघव· । तशरीरमित्यक्षराणि—तशाभ्या सौ, तच्छेषो रि , री इति रि., तच्छेषौ सरी, रमिति रि., तच्छेषा साः (१३) । चतुर्दश्या मध्ये माश्चत्वार·, निधावेक., पधावेक·, मौ द्वौ; एवमष्टौ लघव. । प्रणमामि तमहमित्यक्षराणि, चतुर्थषष्ठदशमा· शेषाः (१४) । पञ्चदश्यां मध्ये निनिपास्रय·; पमावेकः, प एकः, पमावेक ; पधावेक·, रिगावेक , एवमष्टौ लघव· । अनुपमसुखकमेत्यक्षराणि, पञ्चमाष्टमदशमद्वादशा शेषाः (१५) षोडश्यां मध्ये गाधारा अष्टौ लघव· । लमिति ग., तच्छेषा इतरे (१६) ।

देवमसकलशशितिलकं द्विरदगति
निपुणमति मुग्धमुखाम्बुरुहदिव्यकान्तिम् ।
हरमम्बुदोदधिनिनादमचलवरसूनुदेहार्धमिश्रितशरीरं
प्रणमामि तमहमनुपममुखकमलम् ॥ इति षड्जकैशिकी ॥ ८ ॥

अथ षड्जोदीच्यवा

अंशाः समनिधाः षड्जोदीच्यवायां प्रकीर्तिताः ।
मिथश्च संगतास्ते स्युर्मन्द्रगांधारभूरिता ॥ ८१ ॥
षड्जर्षभौ भूरितारौ रिलोपात्षाडवं मतम् ॥
औडुवं रिपलोपेन धैवते ऽंशे न षाडवम् ॥ ८२ ॥
षाड्जीवद्गीततालादि गांधारादिश्च मूर्च्छना ।
द्वितीये प्रेक्षणे गाने ध्रुवायां विनियोजनम् ॥ ८३ ॥

(क०) **अंशाः समनिधा** इति । मिथश्च संगतास्ते स्यु , ते समनिधा मिथ परस्परं संगताश्च रक्तिवशाद्यथायोगं सबद्धाश्च भवेयु । मन्द्रगाधारभूरिता, मन्द्रस्थानस्थितस्य गाधारस्यानंशस्यापि भूरिता बाहुल्यम् 'षड्जश्च ऋषभश्चैव गांधारश्च बली भवेत्' इति मुनिवचनाद्भवति । तेन स्थानान्तरस्थितस्य तस्य तन्नेत्युक्तं भवति । षड्जर्षभौ भूरितारौ भूरि तारस्थानं ययोस्तौ, तारस्थयोर्बाहुल्यं कर्तव्यमित्यर्थः । तत्रर्षभस्य च षाडवौडुवकारित्वेन 'पूर्णावस्थायामृषभपञ्चमयोरल्पत्वम्' इति मतङ्गवचनं मन्द्रमध्यस्थर्षभविषयम् । 'ऋषभश्च बली भवेत्' इति मुनिवचनं तु तारस्थर्षभविषयमिति व्यवस्थापनीयम् । तत्र षड्जस्यांशत्वेन सिद्धे ऽपि बहुत्वे षड्जस्येति मुनिवचनान्मन्द्रमध्यस्थापेक्षया तारस्थस्यातिशयितत्वेन बहुत्वं षड्जर्षभावित्यनेन विधीयत इत्यवगन्तव्यम् । **धैवते ऽंशे न षाडवमिति** । ऋषभस्य धैवतसवादित्वेनाशसंवादिलोपस्यानिष्टत्वात् । ननु तस्मिन्नेवाशे रिपलोपेनौडुवाभ्युपगमः कथमिति चेत्, उच्यते—रिपयोर्लोपेनौडुवत्वे षाडवकारित्वं पञ्चम एव पर्यवसितमिति तस्य संवादित्वान्न विरोधः । षाड्जीवदित्यादि गतार्थम् ॥ ८१—८३ ॥

८.	नी	धा	पा	धा	पा	धा	धा	धा
	मु		खें					दु
९.	सां	सां	मा	गा	पा	पा	नी	धा
	अ	धि	क		मु	खें		दु
१०.	धा	नी	सां	सां	धा	नी	पा	मा
	न	य	नं		न	मा		मि
११.	गा	सा	सा	सा	सा	सा	सा	गा
	दे		वा		सु	रे		श
१२	धा	धा	पा	धा	मां	मां	मां	मां
	त	व	रु	चि	रं			

शैलेऽक्षराभ्यां प्रथमा द्वितीया तु शसूनुना ।
तैः पञ्चभिस्तृतीया स्यात्सप्तमी त्वधिकाक्षरैः ॥ ८४ ॥
मुखेन्दुना ऽष्टमी त्वस्यां षड्भिस्तैर्नवमी कला ।

(क०) षाड्जग्रामिकशुद्धस्वरमेलने मध्ये साश्चत्वारः, मन्द्रे मौ द्वौ. गौ द्वौ, एवमष्टौ लघव.। शैले इत्यक्षराभ्या प्रथमपञ्चमौ, शेषा परे (१)। द्वितीयस्या मध्ये गमपमगममधा अष्टौ लघव । शसूनुभि· प्रथमतृतीयाष्टमा.; शेषा परे (२)। तृतीयस्या मध्ये ससमगपपनिधा अष्टौ लघवः। शैलेशसून्वित्यक्षराणि, द्वितीयचतुर्थसप्तमाः शेषा· (३)। चतुर्थ्यां मध्ये धनिससधनिपमा अष्टौ लघव·। प्रणयप्रसङ्गेत्यक्षराणि, चतुर्थसप्तमौ शेषौ (४)। पञ्चम्यां मन्द्रे ग एक, मध्ये सा षट्, मन्द्रे ग एक, एवमष्टौ लघव·। सविलासखेलेत्यक्षराणि; चतुर्थसप्तमौ शेषौ (५)। षष्ठ्या मध्ये धधपधपनिधधा अष्टौ लघव·। नविनोदमित्यक्षराणि—नविनोभिर्धधपा·, दमिति सप्तमः, शेषा

इतरे (६)। सप्तम्या मध्ये स एकः, मन्द्रे गाः पञ्च, मध्ये सौ द्वौ, एवमष्टौ लघव.। अधिकै. प्रथमतृतीयपञ्चमा., शेषा इतरे (७)। अष्टम्या मध्ये निधपधपधधधा अष्टौ लघवः। मुखेन्दुभि· प्रथमतृतीयाष्टमा, शेषा इतरे (८)। नवम्या तारे सौ द्वौ, मध्ये मगपपनिधाः षट्, एवमष्टौ लघव। अधिकमुखेन्द्वित्यक्षराणि, चतुर्थसप्तमौ शेषौ (९)। दशम्या मध्ये धनी द्वौ, तारे सौ; मध्ये धनिपमाश्चत्वार·; एवमष्टौ लघव। नयनं नमामीत्यक्षराणि, चतुर्थसप्तमौ शेषौ (१०)। एकादश्या मन्द्रे ग एकः, मध्ये सा. षट्, मन्द्रे ग एक., एवमष्टौ लघव.। देवासुरेशेत्यक्षराणि, द्वितीयचतुर्थसप्तमाः शेषाः (११)। द्वादश्यां मध्ये धधपधाश्चत्वारः, तारे माश्चत्वारः, एवमष्टौ लघव.। तव रुचिरमित्यक्षराणि, षष्ठादयस्त्रय· शेषा· (१२)।

शैलेशसूनुप्रणयप्रसङ्गसविलासखेलनविनोदम्।
अधिकमुखेन्दुनयनं नमामि देवासुरेश तव रुचिरम्॥

सर्वासु जातिषु मागध्यादिषु गीतियोजनादिकप्रदर्शनार्थमस्या त्रिरावृत्तपदा मागधी द्विरावृत्तपदा ऽर्धमागधीत्यादिवक्ष्यमाणलक्षणानुसारेणार्धमागधीगीतियोग दर्शयति—**शैलेऽक्षराभ्यामित्यादिना**। प्रथमा प्रथमकला शैलेऽक्षराभ्या शै ले इत्याभ्यामक्षराभ्या योजनीयेति शेषः। **द्वितीया तु शसूनुनेति**। द्वितीयकला तु, शसूनुनेति द्वद्वैकवद्भावः, श सू नु इति त्रिभिरक्षरैर्योजनीयेत्यर्थः। **तैः पञ्चभिस्तृतीया स्यादिति**। तृतीयकला तै, शै ले श सू नु इति पञ्चभिरक्षरैर्योजनीया स्यात्। **सप्तमी त्वधिकाक्षरैरिति**। अ धि क इत्येतैस्त्रिभिरक्षरै·। अष्टमी तु मुखेन्दुना मु खें दु इति त्रिभिरक्षरैः। नवमी तै, अ धि क मु खें दु इति षड्भिरक्षरै। अन्यासु कलासु यथालक्षणं गीतान्तरयोगो द्रष्टव्य.॥ ८४, ८४-॥ इति षड्जोदीच्यवा॥ ९॥

अथ षड्जमध्यमा

अंशाः सप्त स्वराः षड्जमध्यमायां मिथश्च ते ॥ ८५ ॥
संगच्छन्ते निरल्पो ऽंशाद्गादृते वादितां विना ।
निलोपनिगलोपाभ्यां षाडवौडुविते मते ॥ ८६ ॥
षाडवौडुवयोः स्यातां द्विश्रुती तु विरोधिनौ ।
गीतितालकलाऽऽदीनि षाड्जीवन्मूर्च्छना पुनः ॥ ८७ ॥
मध्यमादिरिह ज्ञेया पूर्वावद्विनियोजनम् ।

(सु०) एतस्याः कलायामभिधेयनियम कथयति—**शैलेऽक्षराभ्यामिति** । प्रथमकला शिववाचकाक्षरद्वयेन कर्तव्या । द्वितीया गणेशवाचकपदेन (?) । तृतीया कला शिवगणेशवाचकपदाक्षरपञ्चकेन । सप्तमी त्वधिकाक्षरै. । अष्टमी मुखेन्दुना । षड्भिरक्षरैर्नवमी ॥ ८४, ८४- ॥

(क०) **अंशाः सप्त स्वरा** इति । निरल्प·, पूर्णावस्थाया निषादो ऽल्प. कार्य । **अंशाद्गादृत** इति । तस्यामप्यवस्थाया यदा गांधारो ऽंशो भवति तदा निषादस्य तत्संवादित्वेनाल्पत्वं नेष्टमिति भाव । **वादितां विनेति** । स्वस्य वादित्वे सुतरामल्पत्वाभाव इत्यर्थ ॥ द्विश्रुती तु निषादगाधारौ, अंशीभूतौ त्वित्यर्थाद्गम्यते, षाडवौडुवयोर्विरोधिनौ स्याताम्, निलोपेन निगलोपेन च षाडवौडुवयोर्विहितत्वात्, स्वरयोरेवांशत्वं लोप्यत्वमिति च धर्मयोर्विरोधात् । तदा षाडवौडुवे न भवत इति भावः । तेन निगयोरशयो. पूर्णताया एव नियतत्वादस्या षाडवाशाः पञ्चौडुवाशा अपि त एव पञ्च संपूर्णाशा सप्तेति मतङ्गोक्ता सप्तदशाशा द्रष्टव्याः ॥ **गीतितालकलाऽऽदीनि षाड्जीवदिति** । गीतितालकलाऽऽदीनि, गीतयो मागधीसंभावितापृथुलास्तिस्र, तालो ऽप्येककलद्विकलभेदस्त्रिविध· पञ्चपाणिः, कला अष्टलघ्वात्मिका द्वादश, आदिशब्देन चित्रवृत्तिदक्षिणास्त्रयो मार्गा

अस्यां षड्जमध्यमायां षड्जमध्यमौ न्यासौ। सप्त स्वरा अपन्यासाः। अस्याः प्रस्तारः—

१० षड्जमध्यमा

१.	मा	गा	सग	पा	धप	मा	निध	निम
	र	ज	नि	व	धू	मु	ख	
२.	मां	मां	सां	रिंगं	मंगं	निध	पध	पा
	वि	ला	स	लो			च	
३	मा	गा	री	गा	मा	मा	सा	सा
	नं							
४	मा	मगम	मा	मा	निध	पध	पम	गमम
	प्र	वि	क	सि	त	कु	मु	द
५.	धा	पध	परि	रिग	मग	रिग	सधस	सा
	द	ल	फे	न	स			नि

गृह्यन्ते, एतानि गीत्यादीनि षाड्जीवत्, षाड्ज्यामिवास्यामपि कर्तव्यानीत्यतिदेशार्थः। **मूर्च्छना पुनर्मध्यमादिरिह ज्ञेयेति**। अस्याः षाड्जग्रामिकत्वान्मत्सरीकृता मूर्च्छनेत्यर्थः। विनियोजनं पूर्ववत्, पूर्वस्या षड्जोदीच्यवायामिव द्वितीये प्रेक्षणे ध्रुवागान इत्यर्थः॥ -८५—८७- ॥

(सु०) षड्जमध्यमा लक्षयति—**अंशाः सप्त स्वरा इति**। षड्जमध्यमाया सप्तापि स्वरा अंशाः। अंशानामेव परस्परं संगतिः। निषादो ऽल्पः। यदा गाधारो ऽंशस्तदा निषादाल्पत्व नास्ति। यदा च निषादो वादी तदा च तदल्पत्वं नास्ति। निषादलोपेन षाडवम्। निषादगाधारयोर्लोपेनौडुवितम्। षाडवौडुवितयोः क्रियमाणयोर्निषादगाधारयोर्विवादित्वम्। गीतितालकलाऽऽदयः षाड्जीवत्। मध्यमादिर्मूर्च्छना। षड्जोदीच्यवावद्विनियोगः॥ -८५—८७- ॥

६.	निध	सा	री	मगम	मा	मा	मा	मा
	भ							
७	मा	मा	मगम	मंधं	धंपं	पध	पम	गंमंगं
	का		मि	ज	न	न	य	न
८	धा	पध	परि	रिग	मग	रिग	सधस	सा
	हृ	द्	या	भि	नं			दि
९	मा	मा	धनि	धस	धप	मप	पा	पा
	नं							
१०.	मा	मंगंमं	मा	निधं	पंधं	पंमंगं	गा	मा
	प्र	ण	मा		मि	दे	वं	
११	धा	पध	परि	रिग	मग	रिग	सधस	सा
	कु	मु	दा	धि	वा			सि
१२	निध	सा	री	मगम	मा	मा	मा	मा
	नं							

(क०) **षड्जमध्यमौ न्यासाविति** । षड्जमध्यमयोरेकतरो न्यासः कर्तव्य इत्यर्थ. । **सप्त स्वरा अपन्यासा** इति । ग्रहाशस्वराधीनरक्तिवशाद्यथायोगं पर्यायेणापन्यासा भवन्तीति मन्तव्यम् । षाड्जग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्ये मगौ द्वौ, सगावेक·, प एकः, धपावेक·, म एकः, निधावेक , निमावेक. , एवमष्टौ लघव· । रजनिवधूमुखेत्यक्षराणि—रजनिभिर्मगसाः, तच्छेषो गः, वधूभ्या पधौ, शेषौ पमौ, मुना नि , शेषो ध , खेन निः, शेषो म· (१) । द्वितीयस्या तारे ममसास्त्रयः, रिगावेकः, मगावेक. , मध्ये निधावेकः, पधावेक , प एक. , एवमष्टौ लघव· , विलासलोचेत्यक्षराणि—विलाभ्या

मौ, शेष. स·, सेन रि., शेषो ग., लो इति म·, शेषा गनिधपधा., चेन प. (२)। तृतीयस्या मध्ये मगरिगममसमा अष्टौ लघव·। नमिति म·, शेषा इतरे (३)। चतुर्थ्या मध्ये म एकः, मगमा एक·, मौ द्वौ, निधावेकः, पधावेक., पमावेकः, गममा एक., एवमष्टौ लघव। प्रविकसितकुमुदेत्यक्षराणि—प्रविभ्या मौ, शेषौ गमौ, कसितैर्ममनय, शेषो ध·, कुना प, शेषो ध; मुना प·, शेषो मः, देन ग; शेषौ मौ (४)। पञ्चम्या मध्ये ध एकः, पधावेकः, परी एक, रिगावेकः, मगावेकः, रिगावेक., सधसा एक, स एकः, एवमष्टौ लघव। दलफेनसंनीत्यक्षराणि—दलाभ्या धपौ, शेषो ध, फे इति प., शेषो रिः, नेन रिः, शेषो ग, समिति म·, शेषा गरिगसधसाः, निना सः (५)। षष्ठ्या मध्ये निधावेकः, सरी द्वौ; मगमा एकः, माश्चत्वार, एवमष्टौ लघवः, भमिति नि·, शेषा इतरे (६)। सप्तम्या मन्द्रे मौ द्वौ; मगमा एकः, मधावेकः, धपावेकः, पधावेक, पमावेक, गमगा एकः, एवमष्टौ लघव·। कामिजननयनेत्यक्षराणि—का इति म·, शेषो म.; मिना मः, शेषौ गमौ, जेन मः, शेषो ध·, नेन धः, शेष· प·, नेन प., शेषो धः; येन पः, शेषो मः, नेन गः, शेषौ मगौ (७)। अष्टम्यां मध्ये ध एक·, पधावेक·, परी एक, रिगावेकः, मगावेकः, रिगावेक·, सधसा एकः, स एक·, एवमष्टौ लघवः। हृदयाभिनन्दीत्यक्षराणि—हृदाभ्या धपौ, शेषो धः, या इति पः, शेषो रि, भिना रि·, शेषो ग·, नमिति म·, शेषा गरिगसधसाः, दिना स (८)। नवम्यां मध्ये मौ द्वौ, धनी एक., धसावेक·, धपावेक, मपावेकः, पौ द्वौ, एवमष्टौ लघव.। नमिति म., तच्छेषा इतरे (९)। दशम्या मन्द्रे म एक., मगमा एकः, म एकः; निधावेक.; पधावेकः,

अथ गांधारोदीच्यवा

गांधारोदीच्यवायां तु द्वावंशौ षड्जमध्यमौ ॥ ८८ ॥
रिलोपात्षाडवं ज्ञेयं पूर्णत्वे ऽंशेतराल्पता ।
अल्पा निधपगांधाराः षाडवत्वे प्रकीर्तिताः ॥ ८९ ॥
रिधयोः संगतिर्ज्ञेया धैवतादिश्च मूर्च्छना ।
तालश्चच्चत्पुटो ज्ञेयः कलाः षोडश कीर्तिताः ॥ ९० ॥
विनियोगो ध्रुवागाने चतुर्थप्रेक्षणे मतः ।

पमगा एक·, गमौ द्वौ, एवमष्टौ लघव· । प्रणमामि देवमित्यक्षराणि—प्रणाभ्या मौ, शेषौ गमौ, मा इति म, शेषौ निधौ, मिना प । शेषो धः, दे इति प., शेषौ मगौ, वमिति गः, शेषो म· (१०), एकादश्या मध्ये ध एक·, पधावेक, परी एक, रिगावेक, मगावेक, रिगावेक, सधसा एकः, स एक, एवमष्टौ लघव. । कुमुदाधिवासीत्यक्षराणि—कुमुभ्या धपौ, शेषो धः, दा इति प, शेषो रि, धिना रि·, शेषो ग, वा इति मः, शेषा गरिगसधसा·, मिना सः (११) । द्वादश्यां मध्ये निधावेकः, सरी द्वौ, मगमा एकः, माश्चत्वारः, एवमष्टौ लघव· । नमिति निः, शेषा इतरे (१२) ।

रजनिवधूमुखविलासलोचन
प्रविकसितकुमुददलफेनसंनिभम् ।
कामिजननयनहृदयाभिनन्दिनं
प्रणमामि देवं कुमुदाधिवासिनम् ॥ इति षड्जमध्यमा ॥१०॥

(क०) **गांधारोदीच्यवायां त्विति** । पूर्णत्वे संपूर्णत्वदशायाम्, अंशेतराल्पता, अंशाभ्या समाभ्यामितरेषां रिगपधनीनामल्पत्वम्; षाडवत्वे

अस्यां गांधारोदीच्यवायां मध्यमो न्यासः। षड्जधैवतावपन्यासौ। अस्याः प्रस्तारः—

११ गाधारोदीच्यवा

१	सा	सा	पा	मा	पा	धप	पा	मा
	सौ							
२.	धा	पा	मा	मा	सा	सा	सा	सा
	म्य							
३.	धा	नी	सा	सा	मा	मा	पा	पा
	गौ		री		मु	खा		बु
४	नी	नी	नी	नी	नी	नी	नी	नी
	रु	ह	दि		व्य	ति	ल	क
५.	मा	मा	धा	निस	नी	नी	नी	नी
	प	रि	चुं		बि	ता		चिं
६	मा	पा	मा	परिग	गा	गा	सा	सा
	त	सु	पा		दं			

निधपगाधारा अल्पाः, ऋषभस्य लुप्तत्वादिति भाव। अत एव रिधयो संगतिः पूर्णत्वावस्थायामेवेति ज्ञेया। अन्यत्तु सुगमम्॥ -८८—९०-॥

(सु०) गाधारोदीच्यवा लक्षयति—**गाधारोदीच्यवायामिति**। गाधारोदीच्यवाया षड्जमध्यमावंशौ। ऋषभलोपात्षाडवम्। पूर्णत्वे ऽंशेतराल्पता। षाडवत्वे निषादधैवतपञ्चमगाधारा अल्पाः। ऋषभधैवतयोः सगतिः। धैवतादिर्मूर्च्छना। चञ्चत्पुटस्तालः। षोडश कलाः। चतुर्थप्रेक्षणे ध्रुवागाने विनियोगः॥ -८८—९०-॥

७. गा मग पा पध मा धनि पा पा
प्र वि क सि त हे म

८. री गा सा सध नी नी धा धा
क म ल नि भं

९. गा रिग सा सनि गा रिग सा सा
अ ति रु चि र का ति

१०. सा सा सा मा मनि धनि नी नी
न ख द र्प णा म

११. मां पां मां पंरिगं गां गां सां सां
ल नि के तं

१२. गां सां गां सां मां पां मां पंरिंगं
म न सि ज श री र

१३ गां मां गां सां गां गां गां सां
ता ड न

१४. नीं नीं पां धां नीं गां गां गां
प्र ण मा मि गौ री

१५ नीं नीं धां पां धां पां मां पां
च र ण यु ग म नु प

१६. धां पा सां सां मां मां मां मां
मं

(क०) माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलायां मध्ये सौ द्वौ, पमपास्त्रय., धपावेकः; पमौ द्वौ, एवमष्टौ लघवः। सौ इति प्रथमः सः, शेषा इतरे (१)। द्वितीयस्यां मध्ये धपममाश्चत्वारः, साश्चत्वारः,

एवमष्टौ लघवः । म्येति धः, शेषा इतरे (२) । तृतीयस्या मध्ये धनिससममपपा अष्टौ लघवः । गौरीमुखाम्बित्यक्षराणि, द्वितीयचतुर्थसप्तमाः शेषाः (३) । चतुर्थ्या मध्ये निषादा अष्टौ लघव. । रुहदिव्यतिलकेत्यक्षराणि, चतुर्थः शेष. (४) । पञ्चम्या मध्ये ममधास्त्रयः, निसावेक.,
निषादाश्चत्वारः; एवमष्टौ लघवः । परिचुम्बितार्चीत्यक्षराणि—चतुर्थपञ्चमाष्टमाः शेषा. (६) । षष्ठ्या मध्ये मपमास्त्रय, परिगा एक, गौ द्वौ, सौ द्वौ, एवमष्टौ लघवः । तसुपादमित्यक्षराणि—तसुपाभिर्मपमाः, शेषा. परिगाः, दमिति गः, शेषाः परे (६) । सप्तम्या मध्ये ग एकः, मगावेकः, प एकः, पधावेकः, म एक, धनी एकः, पौ द्वौ, एवमष्टौ लघवः । प्रविकसितहेमेत्यक्षराणि—प्रविभ्या गमौ, तच्छेषो गः, कसिभ्या पपौ, तच्छेषो ध., तेन मः, हे इति धः; तच्छेषौ निपौ, मेन पः (७) । अष्टम्या मध्ये रिगसास्त्रय., सधावेक, नी द्वौ, धौ द्वौ, एवमष्टौ लघवः । कमलनिभमित्यक्षराणि—पञ्चमः शेष.; भमिति निः, तच्छेषाः परे (८) । नवम्या मध्ये ग एकः, रिगावेक.; स एकः, सनी एक, ग एकः, रिगावेकः, सौ द्वौ, एवमष्टौ लघव । अतिरुचिरकान्तीत्यक्षराणि—तृतीयषष्ठनवमदशमाः शेषाः (९) । दशम्या मध्ये सास्त्रयः, म एकः, मनी एकः, धनी एकः, नी द्वौ, एवमष्टौ लघवः । नखदर्पणामेत्यक्षराणि, चतुर्थषष्ठाष्टमनवमाः शेषाः (१०) । एकादश्यां तारे मपमास्त्रयः, परिगा एकः, गौ द्वौ, सौ द्वौ, एवमष्टौ लघव । लनिकेतमित्यक्षराणि—लनिकेभिर्मपमाः, तच्छेषाः परिगा, तमिति गः, शेषा. परे (११) । द्वादश्या तारे गसगसमपमाः सप्त; परिगा एक; एवमष्टौ लघवः । मनसिजशरीरेत्यक्षराणि, शेषाः परिगाः (१२) । त्रयोदश्या तारे गमगसाश्चत्वार., गास्त्रय, स एकः, एवमष्टौ लघव. । ताडनमित्यक्षराणि—ताडनमित्यक्षरैः प्रथमचतुर्थपञ्चमा.; शेषा इतरे (१३) ।

अथ रक्तगाधारी

अंशाः स्यू रक्तगांधार्यां पञ्च धर्षभवर्जिताः ॥ ९१ ॥
रिमतिक्रम्य सगयोः कार्ये संनिधिमेलने ।
रिलोपरिधलोपाभ्यां [1]षाडवौडुवमिष्यते ॥ ९२ ॥
बहुत्वं निधयोरंशः पञ्चमो द्वेष्टि षाडवम् ।
द्विषन्त्यौडुवितं षड्जनिमपाः संगतौ सगौ ॥ ९३ ॥
पञ्चपाण्यादि षाड्जीवदृषभादिस्तु मूर्च्छना ।
तृतीयप्रेक्षणगतध्रुवायां विनियोजनम् ॥ ९४ ॥

चतुर्दश्या तारे निनिपधनय· पञ्च, गास्त्रय·, एवमष्टौ लघव । प्रणमामि गौरीत्यक्षराणि, चतुर्थसप्तमौ शेषौ (१४) । पञ्चदश्या तारे निनिधपधपमपा अष्टौ लघव· । चरणयुगमनुपेत्यक्षराणि (१५) । षोडश्या तारे धपससाश्च-त्वार·, माश्चत्वार , एवमष्टौ लघव· । मपिति ध , शेषा परे (१६) ।

सौम्यगौरीमुखाम्बुरुहदिव्यतिलकपरिचुम्बितार्चितसुपादं
प्रविकसितहेमकमलनिभम् ।
अतिरुचिरकान्तिनखदर्पणामलनिकेतं
मनसिजशरीरताडनं प्रणमामि गौरीचरणयुगमनुपमम् ॥ इति
गाधारोदीच्यवा ॥ ११ ॥

(क०) **अंशाः स्युरिति** । धैवतर्षभवर्जिता पञ्च सगमपनय. । रिमतिक्रम्य सगयो· संनिधिमेलने कार्ये । रिमतिक्रम्य, ऋषभेण विनेत्यर्थ·,

' गांधारषड्जयोश्चात्र संचारश्चर्षभं विना '

[1] षाडवौडुविते मते

इति मुनिवचनात्। अत्र सगयोर्ऋषभादितरैर्मपधनिभि सह यथायोगं संनिधिमेलने संनिधिर्मेलनं च। इह भिन्नलघुकालयोः स्वरयोर्नैरन्तर्यं संनिधिः, एकलघुकालयोर्द्वयोस्त्रयाणा च नैरन्तर्यं मेलनमिति विवक्षितम्। ते कार्ये यथाशक्ति कर्तव्ये। षाडवौडुवमिति द्वद्वैकवद्भाव। **निधयोर्बहुत्वमिति**। अत्र निषादस्याशत्वेन प्राप्तमपि बहुत्वमतिशयार्थम्, धैवतस्य त्वौडुवकारिण औडुवावस्थायामनवस्थाने ऽपि संपूर्णत्वषाडवत्वावस्थयो प्राप्ताल्पत्वापवादेन बहुत्वम्

'बलिनौ भवतश्चात्र धैवत सप्तमस्तथा'

इति मुनिवचनाद्विधीयत इत्यवगन्तव्यम्। अंश पञ्चम षाडवं द्वेष्टि। पञ्चम स्वयमंशीभवन् रिलोपनिर्वर्त्य षाडव न सहते, मध्यमग्रामे पञ्चमर्षभयो संवादादिति भाव। षड्जनिमपा औडुवितं द्विषन्ति, सनिमपा अंशा भवन्तो रिधलोपनिर्वर्त्यमौडुवित न सहन्ते, एक एवांशो गाधार औडुवितं सहत इत्यर्थः। अत्र निधयोः षड्जाद्यंशसंवादित्वाभावे ऽप्यौडुवितानभ्युपगमस्तु

'गाधारीरक्तगाधार्यौ षड्जमध्यमपञ्चमाः।
सप्तमश्चैव विज्ञेया एषु नौडुवितं भवेत्॥'

इति मुनिवचनादवगन्तव्यः। अतः षाडवादिजातिषु क्वचित्षाडवनिषेधो ऽंशसंवादिलोपानभ्युपगमान्नियतः,

'संवादिलोपात्सप्तैताः षाट्स्वर्येषु विवर्जिताः'

इति मुनिवचनोक्तत्वात्। औडुवादिजातिषु कदाचिदौडुवितस्य प्राप्तस्यापि निषेधः क्वचिदंशलोपात्क्वचिद्वचनादेवेति द्रष्टव्यम्। सगौ संगताविति।

अस्यां रक्तगांधार्यां गांधारो न्यासः। मध्यमो ऽपन्यासः। अस्याः प्रस्तारः—

१२ रक्तगाधारी

१	पा	नी	सा	सा	गा	सा	पा	नी
	तं		बा		ल	र	ज	नि
२	सां	सां	पा	पा	मा	मा	गा	गा
	क	र	ति	ल	क	भू		ष
३	मा	पा	धा	पा	मा	पा	धप	मग
	ण	वि	भू					
४	मा	मा	मा	मा	मा	मा	मा	मा
	ति							
५	धा	नी	पा	मंपं	धा	नी	पा	पा
	०							
६.	मा	पा	मा	धंनि	पा	पा	पा	पा
	०							

सगयो पूर्व रिव्यतिरिक्तैरितरै. संनिधिमेलनोभयरूपा संगतिरुक्ता, सा कदाचित्तयो परस्परं कर्तव्येत्यर्थः। पञ्चपाण्यादीत्यादि स्पष्टार्थः॥ -९१—९४॥

(सु०) रक्तगाधारी लक्षयति—अंशाः स्युरिति। रक्तगाधार्या धैवतर्षभवर्ज्या. पञ्च स्वरा अशाः। ऋषभातिक्रमेण षड्जगाधारयोः संगतिः। ऋषभलोपात्षाडवम्। ऋषभधैवतलोपादौडुवितम्। निषादधैवतयोर्बहुत्वम्। यदा पञ्चमो ऽंशस्तदा षाडवत्व नास्ति। यदा षड्जनिषादमध्यमपञ्चमा अशास्तदौडुवितत्व नास्ति। षड्जगाधारयोः सगतिः। ऋषभादिर्मूर्च्छना। कलाकालविनियोगादिः षाड्जीवत्॥ -९१—९४॥

७.	री	गा	मा	पा	पा	पा	मा	पा
	प्र	ण	मा		मि	गौ		री
८	री	गां	मां	पां	पां	पां	मां	पां
	व	द	ना		र	वि		
९.	पा	पा	पा	पा	पा	पा	पा	पा
	द							
१०	री	गा	सा	सा	री	गा	गा	गा
	प्री		ति	क	र			
११	गां	गां	पां	धंमं	धां	निंधं	पा	पा
	०							
१२	मां	पां	मां	पंरिंगं	गां	गां	गां	गां
	०							

(क०) माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्ये पनिससगसपनयो ऽष्टौ लघव । तं बालरजनीत्यक्षराणि, द्वितीयचतुर्थौ शेषौ (१)। द्वितीयस्या तारे सौ द्वौ, मध्ये पौ द्वौ, मौ द्वौ, गौ द्वौ, एवमष्टौ लघवः। करतिलकभूषेत्यक्षराणि, सप्तम शेष (२)। तृतीयस्या मध्ये मपधपमपा षट्, धपावेकः, मगावेक , एवमष्टौ लघव । णविभू इत्यक्षराणि—णविभूभिर्मपधा , शेषा परे (३)। चतुर्थ्या मध्ये मा अष्टौ लघव । तिमिति प्रथमः, शेषा परे (४)। पञ्चम्या मन्द्रे धनिपास्त्रय , मपावेक , धनिपपाश्चत्वार , एवमष्टौ लघव· । शेषा सर्वे (५)। षष्ठ्या मन्द्रे मपमास्त्रय·, धनी एक , पाश्चत्वार , एवमष्टौ लघव । शेषा. सर्वे (६)। सप्तम्या मध्ये रिगमास्त्रय , पास्त्रय , मपौ द्वौ, एवमष्टौ लघवः। प्रणमामि गौरीत्यक्षराणि, चतुर्थसप्तमौ शेषौ (७)। अष्टम्या तारे

अथ कैशिकी

कैशिक्यामृषभान्ये ऽंशा निधावंशौ यदा तदा ।
न्यासः पञ्चम एव स्यादन्यदा द्विश्रुती मतौ ॥ ९५ ॥
अन्ये तु निगपान्न्यासान्निधयोरंशयोर्विदुः ।
रिलोपरिधलोपेन षाडवौडुवितं मतम् ॥ ९६ ॥
रिरल्पो निपबाहुल्यमंशानां संगतिर्मिथः ।
षाडवौडुविते द्विष्टः क्रमात्पञ्चमधैवतौ ॥ ९७ ॥
षाड्जीवत्पञ्चपाण्यादि गांधारादिस्तु मूर्च्छना ।
पञ्चमप्रेक्षणगतध्रुवायां विनियोजनम् ॥ ९८ ॥

सप्तम्युक्ताः स्वरा. । वदनारविमित्यक्षराणि, चतुर्थसप्तमाष्टमाः शेषाः (८) । नवम्या मध्ये पा अष्टौ लघव । देन प्रथमः, शेषा परे (९) । दशम्यां मध्ये रिगससरिगगगा अष्टौ लघव· । प्रीतिकरमित्यक्षराणि; अत्र गा· शेषा (१०) । एकादश्या तारे गौ द्वौ, प एक , धमावेक , ध एक , निधावेक·, पौ द्वौ, एवमष्टौ लघव । शेषा सर्वे (११) । द्वादश्या तारे मपमास्त्रय , परिगा एक , गाश्चत्वार ; एवमष्टौ लघव· । शेषा सर्वे (१२) ।

तं बालरजनिकरतिलकभूषणविभूतिम् ।
प्रणमामि गौरीवदनारविन्दप्रीतिकरम् ॥ इति रक्तगाधारी ॥ १२ ॥

(क०) **कैशिक्यामिति** । ऋषभान्य ऋषभादन्ये सगमपधनय· षट् स्वरा अंशाः, भवन्तीति शेष । यदा निधावंशौ तदा पञ्चम एव न्यास· स्यादिति

'धैवते ऽंशे निषादे च न्यास. पञ्चम इष्यते'

अस्यां कैशिक्यां गांधारपञ्चमनिषादा न्यासाः। रिवर्ज्या षट् सप्त वा स्वरा अपन्यासाः। अस्याः प्रस्तारः—

१३ कैशिकी

१. पा धनि पा धनि गा गा गा गा
के ली ह त

इति मुनिवचनान्नियम्यते। अन्यदा निधव्यतिरिक्तेषु सरिगमपेष्वशेष्वित्यर्थः। द्विश्रुती निगौ मतौ न्यासत्वेन संमतावित्यर्थं। अन्ये तु मतङ्गादयस्तु निधयोरंशयोर्निगपांस्त्रीनपि न्यासान्विदु, 'धैवतनिषादयोरंशत्वे पञ्चमो ऽपि न्यासः' इति मतङ्गोक्तत्वात्। अय पक्षो ऽपि पञ्चमस्य न्यासत्वं निधयोरंशयोरेवेति नियमे पर्यवस्यति। रिलोपरिधलोपेनेत्येकवद्भाव। रिरल्प पूर्णताऽवस्थायामिति भाव·। निपबाहुल्यमिति निपयोरंशत्वे बाहुल्ये प्राप्ते ऽपि 'बलिनौ चान्त्यपञ्चमौ' इति मुनिवचनात्तयोरितराशापेक्षया ऽतिबाहुल्यं विधीयत इति बोद्धव्यम्। पञ्चमधैवतावंशीभवन्तौ क्रमात्षाडवौडुविते द्विष्ट। पञ्चम षाडव धैवत औडुवितमिति क्रम.। मध्यमग्राम ऋषभस्य पञ्चमसंवादित्वात्तु धैवताशे तस्यैव लोप्यत्वाभावादिति भावः। षाड्जीवदित्यादि सुबोधम्॥ ९५—९८॥

(सु०) कैशिकीं लक्षयति—कैशिक्यामिति। कैशिक्यामृषभादन्ये षट् स्वरा अशाः। यदा निषादधैवतावशौ तदा पञ्चम एव न्यास·, अन्यदा निषादगाधारौ। अन्ये तु केचिन्निषादधैवतयोरशयोर्निषादगाधारपञ्चमान्न्यासान्विदु·। ऋषभलोपात्षाडवम्, ऋषभधैवतलोपादौडुवितम्। ऋषभो ऽल्प·। निषादपञ्चमयोर्बाहुल्यम्। अंशस्वराणा परस्पर सगतिः। यदा पञ्चमो ऽंशस्तदा षाडव नास्ति। यदा धैवतो ऽशस्तदौडुवित नास्ति। षट्पितापुत्रकतालादि षाड्जीजातिवत्। गाधारादिर्मूर्च्छना। ध्रुवाया पञ्चमप्रेक्षणे विनियोगः॥९५–९८॥

२. पा पा मा निध निध पा पा पा
का म त नु

३ धा नी सां सा री री री री
वि भ्र म वि ला सं

४. सा सा सा री गा मा मा मा
ति ल क यु त

५ मा धा नी धा मा धा मा पा
मू र्धो र्ध्व बा ल

६. गा री सा धनि री री री री
सो म नि भं

७ गा री सा सा धा धा मा मा
मु ख क म लं

८ गा गा गा मा मा निधनि नी नी
अ स म हा ट

९. गा गा नी नी गा गा गा गा
क स रो जं

१० गां गां नी नी' निंधं पां पां पां
हृ दि सु ख दं

११ मां पां मां पां पां पां मां मां
प्र ण मा मि लो च

१२ सां मां गां निंधंनिं नी नी' मां गां
न वि शे ष

(क०) **रिवर्ज्याः षट् सप्त वा स्वरा अपन्यासा** इति ।

'अपन्यासः कदाचिच्च ऋषभो ऽपि भवेदिह'

इति मुनिवचनात् । कदाचिदिति पूर्णत्वे ऽपि पक्ष इत्यर्थ । माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्ये प एक , धनी एकः, प एकः, धनी एक , गाश्चत्वारः, एवमष्टौ लघव । केलीहतेत्यक्षराणि—केलीभ्या पौ, हताभ्या प्रथमतृतीयगौ, शेषा इतरे (१) । द्वितीयस्या मध्ये पौ द्वौ, म एक , निधौ द्विर्द्वौ, पास्त्रय , एवमष्टौ लघव । कामतनु, इत्यक्षराणि—का इति प , शेष प , मताभ्या मनी, शेषो ध , नुना निः, शेषा परे (२) । तृतीयस्या मध्ये धनी द्वौ, तारे स एक , मध्ये स एक , ऋषभाश्चत्वार , एवमष्टौ लघव । विभ्रमविलासमित्यक्षराणि, द्वितीयसप्तमौ शेषौ (३) । चतुर्थ्यां मध्ये सास्त्रय , रिगौ द्वौ, मास्त्रय , एवमष्टौ लघवः । तिलकयुतमित्यक्षराणि, शेषा माः (४) । पञ्चम्या मन्द्रे मधनिधमधमपा अष्टौ लघव । मूर्धोर्ध्वबालेत्यक्षराणि, द्वितीयचतुर्थसप्तमाः शेषा (५) । षष्ठ्या मध्ये गरिसास्त्रय , धनी एकः, ऋषभाश्चत्वार , एवमष्टौ लघव । सोमनिभमित्यक्षराणि—सोमनिभिर्गसधा , भमिति प्रथमरि , शेषा इतरे (६) । सप्तम्या मध्ये गरी द्वौ, सौ द्वौ, धौ द्वौ, मौ द्वौ, एवमष्टौ लघव । मुखकमलमित्यक्षराणि, षष्ठादयः शेषा (७) । अष्टम्या मध्ये गास्त्रयः, मौ द्वौ, निधनय एकः, नी द्वौ, एवमष्टौ लघव । असमहाटेत्यक्षराणि—असमैर्गा , शेषो म , हा इति म , शेषा निधनयः, टेन नि , शेषो निः (८) । नवम्यां मध्ये गौ द्वौ; नी द्वौ, गाश्चत्वार , एवमष्टौ लघवः । कसरोजमित्यक्षराणि—कसरोभिर्गगनयः, जमिति पञ्चमो ग , शेषा इतरे (९) । दशम्या तारे गौ द्वौ, नी द्वौ, निधावेकः, पास्त्रय ,

अथ मध्यमोदीच्यवा

पञ्चमांशा सदा पूर्णा मध्यमोदीच्यवा मता ।
लक्ष्म शेषं विजानीयाद् गांधारोदीच्यवागतम् ॥ ९९ ॥
मूर्च्छना मध्यमादिः स्यात्तालश्चच्चत्पुटो मतः ।
चतुर्थस्य प्रेक्षणस्य ध्रुवायां विनियोजनम् ॥ १०० ॥

एवमष्टौ लघवः । हृदि सुखदमिति क्रमेण पञ्च, शेषा परे (१०) । एकादश्या तारे मपमास्त्रय , पास्त्रयः; मौ द्वौ, एवमष्टौ लघव । प्रणमामि लोचेत्यक्षराणि, चतुर्थाष्टमौ शेषौ (११) । द्वादश्या तारे समगास्त्रय , निधनय एक , नी द्वौ, मगौ द्वौ, एवमष्टौ लघवः, नविशेषमित्यक्षराणि—नविशेभि· समगा , षमिति सप्तमो नि· , शेषा इतरे (१२)।

केलीहतकामतनुविभ्रमविलासं तिलकयुतं मूर्धोर्ध्वबालसोमनिभम् ।
मुखकमलमसमहाटकसरोज हृदि सुखदं प्रणमामि लोचनविशेषम् ॥

इति कैशिकी ॥ १३ ॥

(क०) **पञ्चमांशेति** । एक· पञ्चम एवांशो यस्या सा तथोक्ता । **सदा पूर्णेति** । कदाचिदपि षाडवौडुवा च न भवतीत्यर्थ । शेष लक्ष्माशेन वा ऽल्पत्वं रिधयोर्मिथ· संगति· षोडश कला इत्येतावल्लक्षणं गाधारोदीच्यवागतं विजानीयात्, तदत्राप्यनुसंधेयमित्यर्थः । मध्यमादिर्मूर्च्छना सौवीरी । अन्यत्सुबोधम् ॥ ९९, १०० ॥

(सु०) मध्यमोदीच्यवा लक्षयति—**पञ्चमांशेति** । मध्यमोदीच्यवाया पञ्चमो ऽंशस्वरः । पूर्णत्व सप्तस्वरत्वमेव । षाडवौडुविते न स्तः । अवशिष्ट लक्षण गाधारोदीच्यवावज्ज्ञातव्यम् । मध्यमादिर्मूर्च्छना । चच्चत्पुटस्ताल· । ध्रुवाया चतुर्थप्रेक्षणे विनियोगः ॥ ९९, १०० ॥

अस्यां मध्यमोदीच्यवायां मध्यमो न्यासः । अस्याः प्रस्तारः—

१४ मध्यमोदीच्यवा

१.	पा	धनि	नी	नी	मा	पा	नी	पा
	दे		हा		र्ध	रू		प
२	री	री	री	गा	सा	रिग	गा	गा
	म	ति	का		ति	म	म	ल
३	नी	नी	नी	नी	नी	नी	नी	नी
	म	म	लें		दु	कु		ढ
४.	नी	नी	धप	मा	निध	निध	पा	पा
	कु	मु	द	नि	भं			
५.	पा	पा	री	री	री	री	री	री
	चा		मी		क	रा		बु
६.	मा	रिग	सा	सधं	नीं	नीं	नी	नी
	रु	ह	दि			व्य	का	ति
७	मा	पा	नी	सा	पा	पा	गा	गा
	प्र	व	र	ग	ण	पू		जि
८.	गा	पा	मा	निधं	नीं	नीं	सा	सा
	त	म	जे			य		
९	पा	पा	मा	धनि	पा	पा	पा	पा
	सु	रा	भि	ष्टु	त	म	नि	ल
१०	मा	पा	मा	रिग	गा	गा	गा	गा
	म	नो	ज		व		मं	बु

११ गा पा मा पा नी नी नी नी
दो द धि नि ना ढ

१२ मा पा मा परिग गा गा गा गा
म ति हा स

१३. गां गां गां गां मां निंधं नीं नीं
शि वं शा त म सु र

१४ नी नी धप मा निध निध पा पा
च मू म थ नं

१५ रीं गां सां सां मां निंधंनिं नीं नीं
वं दे त्रै लो क्य

१६ नीं नीं धां पां धां पां मां मा
न त च र णं

(क०) माध्यमग्रामिकशुद्धस्वरमेलनं प्रथमकलाया मध्ये प एक, धनी एक, नी द्वौ, मपनिपाश्चत्वार, एवमष्टौ लघव। देहार्धरूपेत्यक्षराणि—दे इति प, शेषौ धनी, हा इति नि, शेषो नि, धरूभ्या मपौ, शेषो नि, पेन प (१)। द्वितीयस्यां मध्य ऋषभास्त्रय, गसौ द्वौ, रिगावेक, गौ द्वौ, एवमष्टौ लघव, मतिकान्तिममलेत्यक्षराणि, चतुर्थसप्तमौ शेषौ (३)। तृतीयस्या मध्ये निषादा अष्टौ लघव। ममलेन्दुकुन्देत्यक्षराणि, चतुर्थसप्तमौ शेषौ (३)। चतुर्थ्यां मध्ये नी द्वौ, धपावेक; म एक, निधावेक, निधावेक., पौ द्वौ, एवमष्टौ लघवः। कुमुदनिभमित्यक्षराणि—कुमुदैर्निनिधा, शेष. प; निभंभ्या मनी, शेषा परे (४)। पञ्चम्या मध्ये पौ द्वौ, ऋषभाः षट्, एवमष्टौ लघव। चामीकराम्बित्यक्षराणि, द्वितीयचतुर्थ-

सप्तमा· शेषाः (५)। षष्ठ्या मध्ये म एक, रिगावेक·, स एक, समन्द्रधावेकः, मन्द्रे निषादाश्चत्वार, एवमष्टौ लघव। रुहदिव्य-कान्तीत्यक्षराणि, तृतीयपञ्चमषष्ठसप्तमा शेषा (६)। सप्तम्या मध्ये मपनिसपपगगा अष्टौ लघव·। प्रवरगणपूजीत्यक्षराणि, सप्तम शेष (७)। अष्टम्या मध्ये ग एकः, मन्द्रे पमौ द्वौ, निधावेक·, नी द्वौ, मध्ये सौ द्वौ, एवमष्टौ लघव। तमजेयमित्यक्षराणि—तमजेभिर्ग-पमा., शेषौ निधौ, यमिति नि, शेषा परे (८)। नवम्या मन्द्रे पौ द्वौ, म एक., धनी एकः, पाश्चत्वार, एवमष्टौ लघव, सुरा-भिष्टुतमनिलेत्यक्षराणि, पञ्चमो निषाद शेष (९)। दशम्या मन्द्रे मपमास्त्रय., मध्ये रिगावेक, गाश्चत्वार, एवमष्टौ लघव। मनोजव-मम्ब्वित्यक्षराणि, चतुर्थपञ्चमसप्तमा शेषा (१०)। एकादश्या मध्ये गपमपाश्चत्वार, निषादाश्चत्वार·, एवमष्टौ लघव·। दोदधिनिनादे-त्यक्षराणि, द्वितीयसप्तमौ शेषौ (११)। द्वादश्या मध्ये मपमास्त्रय, परिगा एक, गाश्चत्वार, एवमष्टौ लघव·। मतिहासमित्यक्षराणि—मतिहाभिर्मपमा, समिति सप्तम, शेषा इतरे (१२)। त्रयोदश्या तारे गाश्चत्वार, म एकः, निधावेक, नी द्वौ, एवमष्टौ लघव। शिवं शान्तमसुरेत्यक्षराणि, चतुर्थसप्तमौ शेषौ (१३)। चतुर्दश्या मध्ये नी द्वौ, धपावेक, म एक, निधावेक, निधावेक, पौ द्वौ, एवमष्टौ लघव·। चमूमथनमित्यक्षराणि—चमूमैर्निनिधा, शेष पः, थनंभ्या मनी, शेषा परे (१४)। पञ्चदश्या तारे रिगससमा. पञ्च, निधनय एक, नी द्वौ, एवमष्टौ लघव। वन्दे त्रैलोक्येत्यक्षराणि, द्वितीयचतुर्थ-सप्तमाष्टमदशमा· शेषा (१५)। षोडश्या तारे नी द्वौ, धपधपाश्चत्वार, मौ द्वौ, एवमष्टौ लघव·। नतचरणमित्यक्षरै क्रमेण पञ्च, शेषा. परे (१६)।

अथ कार्मारवी

कार्मारव्यां भवन्त्यंशा निषादरिपधैवताः ।
बहवो ऽन्तरमार्गत्वादनंशाः परिकीर्तिताः ॥ १०१ ॥
गांधारो ऽत्यन्तबहुल सर्वांशस्वरसंगतिः ।
चच्चत्पुटः षोडशात्र कलाः षड्जादिमूर्च्छना ॥ १०२ ॥
पञ्चमस्य प्रेक्षणस्य ध्रुवायां विनियोजनम् ।

देहार्धरूपमतिकान्तिममलममलेन्दुकुन्दकुमुदनिभं
चामीकराम्बुरुहदिव्यकान्तिप्रवरगणपूजितमजेयम् ।
सुराभिष्टुतमनिलमनोजवमम्बुदोदधिनिनादमतिहास
शिवं शान्तमसुरचमूमथनं वन्दे त्रैलोक्यनतचरणम् ॥

इति मध्यमोदीच्यवा ॥ १४ ॥

(क०) **कार्मारव्यामिति** । अनंशा इह सगमा । अनंशत्वेनाल्पा इत्यपि । अन्तरमार्गत्वात्सर्वेषामंशादिस्वरसंगतेर्हेतोर्मुहु· प्रयोगाद्बहवो बहुत्व-युक्ता भवन्ति । नन्वेवमविशिष्टे बहुत्वे ऽंशानंशयो· को भेद इति चेत्, उच्यते । य· स्थायित्वेन बहुप्रयोग· सो ऽंश· । यस्तु संचारित्वेन बहुप्रयोगः सो ऽन्तरमार्गाश्रयो ऽनंश इति विवेक्तव्यम् । 'बहुलत्व प्रयोगेषु व्यापकं त्वंशलक्षणम्' इत्यत्रापि बहुलत्वम् 'यो रक्ति' इत्याद्यंशलक्षणे यच्छब्दाभिहितस्थायिविषयमेवेति मन्तव्यम् । एतेनास्यां जातावन्तरमार्ग कर्तव्य इत्युक्तं भवति । तथा च भरत·—

'अनंशा बलवन्तस्तु नित्यमेव प्रयोगत·'

इति । गाधारः सर्वांशस्वरसंगते· पर्यायाशैरपि संगतेर्विशेषादत्यन्तं बहुल· । सर्वांशस्वरसंगतिरपि

अस्यां कार्मारव्यां पञ्चमो न्यासः। अंशा एवापन्यासाः। अस्याः प्रस्तारः—

१५ कार्मारवी

१	री	री	री	री	री	री	री	री
	त		स्था		णु	ल	लि	त
२.	मा	गा	सा	गा	सा	नी	नी	नी
	वा		मा		ग	स		क्त
३.	नीं	मा	नीं	मा	पा	पा	गा	गा
	म	ति	ते		ज	प्र	स	र
४.	गा	पा	मा	पा	नी	नी	नी	नी
	सौ		धा		शु	का		ति
५	री'	गा'	सा'	नी'	री'	गा'	री'	मा'
	फ	णि	प	ति	मु	खं		
६	री	गा	री	सा	नी	धनि	पा	पा
	उ	रो	वि	पु	ल	सा		ग

'गाधारस्य विशेषेण सर्वतो गमनं भवेत्'

इति मुनिवचनात्। चच्चत्पुट इत्यादि सुबोधम्॥ १०१—१०२-॥

(सु०) कार्मारवी लक्षयति—कार्मारव्यामिति। कार्मारव्या निषादर्षभपञ्चमधैवता अंशाः। अंशस्वरेभ्यो ऽन्ये षड्जगाधारमध्यमा अन्तरमार्गोक्तन्यायेन बहवः। गाधारस्यातिबाहुल्यम्। सर्वैरंशस्वरै सह संगतिः। चच्चत्पुटस्तालः। षोडश कलाः। षड्जादिर्मूर्च्छना। पञ्चमप्रेक्षणे ध्रुवाया विनियोगः॥ १०१—१०२॥

७ मां पां मा परिंग गा गा गा गा
र नि के त

८. री री गा सम मा मा पा पा
सि त प न गें द्र

९ मा पा मा परिग गा गा गा गा
म ति का त

१०. धा नी पा मा धा नी मा मा
ष ण्मु ख वि नो द

११. नी नी नी नी नी नी नी नी
क र प ल्ल वा गु

१२ मा मा धा नी सनिनि धा पा पा
लि वि ला स की ल

१३. मा पा मा परिग गा गा गा गा
न वि नो दं

१४. नी नी पा धनि गा गा गा गा
प्र ण मा मि दे व

१५ सां रीं गां सां नीं नीं नीं नीं
य ज्ञो प वी त

१६. नीं नीं धां धां पां पां पां पां
कं

(क०) माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्य ऋषभा अष्टौ लघव । तं स्थाणुललितेत्यक्षराणि, द्वितीयचतुर्थौ शेषौ (१) ।

द्वितीयस्या मध्ये मगसगसा पञ्च, निषादास्त्रय, एवमष्टौ लघव । वामाङ्गसक्तेत्यक्षराणि, द्वितीयचतुर्थसप्तमा शेषा (२) । तृतीयस्या मन्द्रे निमनिमपपा षट्, मध्ये गौ द्वौ, एवमष्टौ लघव । मतितेज प्रसरेत्यक्षराणि, चतुर्थ. शेष (३) । चतुर्थ्या मध्ये गपमपाश्चत्वार, निषादाश्चत्वार, एवमष्टौ लघव । सौधाशुकान्तीत्यक्षराणि, द्वितीयचतुर्थसप्तमा शेषा (४) । पञ्चम्या तारे रिगसनिरिगरिमा अष्टौ लघव । फणिपतिमुखमित्यक्षराणि, उपान्त्यान्त्यौ शेषौ (५) । षष्ठ्या मध्ये रिगरिसनय पञ्च, धनी एक, पौ द्वौ, एवमष्टौ लघव । उरोविपुलसागेत्यक्षराणि, सप्तमाष्टमौ शेषौ (६) । सप्तम्या तारे मपमास्त्रयः, परिगा एक, मध्ये गाश्चत्वार·, एवमष्टौ लघव । रनिकेतमित्यक्षराणि—रनिकेभिर्मपमा, तमिति सप्तम, शेषा इतरे (७) । अष्टम्या मध्ये रिरिगास्त्रय., समावेक·, मौ द्वौ, पौ द्वौ, एवमष्टौ लघव । सितपन्नगेन्द्रेत्यक्षराणि, चतुर्थपञ्चमाष्टमा शेषा. (८) । नवम्या मध्ये मपमास्त्रय, परिगा एक, गाश्चत्वार, एवमष्टौ लघव । मतिकान्तमित्यक्षराणि—मतिकाभिर्मपमा, तमिति सप्तम, शेषा इतरे (९) । दशम्या मध्ये धनिपमधनिससा अष्टौ लघव । षण्मुखविनोदेत्यक्षराणि, द्वितीयसप्तमौ शेषौ (१०) । एकादश्या मध्ये निषादा अष्टौ लघव । करपल्लवाङ्ग्वित्यक्षराणि, चतुर्थसप्तमौ शेषौ (११) । द्वादश्या मन्द्रे ममधनयश्चत्वार·, मध्ये सनिनय एक, धपपास्त्रय., एवमष्टौ लघव. । लिविलासकीलेत्यक्षराणि, चतुर्थषष्ठसप्तमनवमा शेषा (१२) । त्रयोदश्या मध्ये नवमीवत्स्वरा । नविनोदमित्यक्षराणि—नविनोभिर्मपमा·, दमिति सप्तमः, शेषा इतरे (१३) । चतुर्दश्या मध्ये निनिपास्त्रयः, धनी एक., गाश्चत्वार, एवमष्टौ लघव· । प्रणमामि देवेत्यक्षराणि, चतुर्थपञ्चमाष्टमा शेषा (१४) । पञ्चदश्या तारे सरिगसाश्चत्वार,

अथ गांधारपञ्चमी

अंशो गांधारपञ्चम्यां पञ्चमः संगतिः पुनः ॥ १०३ ॥
कर्तव्या ऽत्रापि गांधारीपञ्चम्योरिव भूरिभिः ।
चच्चत्पुटः षोडशात्र कला गादिश्च मूर्च्छना ॥ १०४ ॥
तुर्यप्रेक्षणसंबन्धिध्रुवागाने नियोजनम् ।

निषादाश्चत्वार , एवमष्टौ लघव । यज्ञोपवीतेत्यक्षराणि, द्वितीयचतुर्थ-सप्तमाः शेषा (१५) । षोडश्या तारे नी द्वौ, धौ द्वौ, पाश्चत्वार , एवमष्टौ लघव । कमिति प्रथमो निः, शेषा परे (१६) ।

तं स्थाणुललितवामाङ्गसक्तमतितेज·प्रसरसौधाशुकान्ति फणिपति-
मुखमुरोविपुलसागरनिकेतं सितपन्नगेन्द्रमतिकान्तम् ।
षण्मुखविनोदकरपल्लवाङ्गुलिविलासकीलनविनोदं
प्रणमामि देवयज्ञोपवीतकम् ॥ इति कार्मारवी ॥ १५ ॥

(क०) **अंशो गांधारपञ्चम्यामिति** । संगतिः पुनः संगतिस्तु गाधारीपञ्चम्योरिवात्रापि भूरिभि कर्तव्येति । गाधार्यो तावत् 'न्यासा-शाभ्या तदन्येषाम्' इत्युक्तम्, तद्वदत्रापि न्यासाशाभ्यां गाधार-पञ्चमाभ्या तदन्येषा सरिमधनीनाम्, पञ्चम्या तु 'रिमयो·' इत्युक्त-त्वादत्राप्यृषभमध्यमयोर्मिथश्च, एवं भूरिभि· स्वरैः संगति कर्तव्येत्यति-देशार्थः । शेष सुबोधम् ॥ -१०३—१०४- ॥

(सु०) गाधारपञ्चमीं लक्षयति—**अंश** इति । गाधारपञ्चम्या पञ्चमो ऽशः । गाधारीपञ्चम्योरिव स्वराणा सगतिः । चच्चत्पुटस्तालः । षोडश कला· । गाधारादिर्मूर्च्छना । ध्रुवाया चतुर्थप्रेक्षणे विनियोगः ॥ -१०३—१०४- ॥

अस्यां गांधारपञ्चम्यां गांधारो न्यासः। ऋषभपञ्चमावप-न्यासौ। अस्याः प्रस्तारः—

१६. गाधारपञ्चमी

१.	पा	मप	मध	नी	धप	मा	धा	नी
	का							
२.	सनिनि	धा	पा	पा	पा	पा	पा	पा
			त					
३.	धा	नी	सा	सा	मा	मा	पा	पा
	वा		मै		क	दे		श
४.	नी	नी	नी	नी	नी	नी	नी	नी
	प्रें		खो		ल	मा		न
५.	नी	नी	धप	मा	निध	निध	पा	पा
	क	म	ल	नि	भं			
६.	पा	पा	री	री	री	री	री	री
	व	र	सु	र	भि	कु	सु	म
७	मा	रिग	सा	सध	नी	नी	नी	नी
	गं		धा		धि	वा		सि
८.	नी	नी	सां	रिंसं	रीं	रीं	रीं	रीं
	त	म	नो		ज्ञ			
९.	नी	गा	सा	निग	सा	नीं	नीं	नी
	न	ग	रा		ज	सू		नु
१०.	नीं	मा	नीं	मां	पा	पा	गा	गा
	र	ति	रा		ग	र	भ	स

११. गा पा मा पा नी नी नी नीं
के ली कु च ग्र

१२. मा पा मा परिग गा गा गा गा
ह ली लं त

१३. नीं नीं पा धा नी गा गा गा
प्र ण मा मि दे व

१४ नी नी नी नीं नी नीं नीं नी
चं द्रा र्ध मं डि

१५. मा मा धा नी सनिनि धा पा पा
त वि ला सकी ल

१६. मा पा मा परिग गा गा गा गा
न वि नो दं

(क०) माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्ये प एक., मपावेक, मधावेक, निरेक, धपावेकः, मधनयस्त्रयः, एवमष्टौ लघव। कामिति प्रथम, शेषा इतरे (१)। द्वितीयस्या मध्ये सनिनय एक., ध एकः, पाः षट्, एवमष्टौ लघव। तमिति पञ्चम, शेषा इतरे (२)। तृतीयस्या मध्ये धनी द्वौ, सौ द्वौ, मौ द्वौ, पौ द्वौ, एवमष्टौ लघवः। वामैकदेशेत्यक्षराणि, द्वितीयचतुर्थसप्तमाः शेषा (३)। चतुर्थ्यां मध्ये निषादा अष्टौ लघव। प्रेङ्खोलमानेत्यक्षराणि, द्वितीयचतुर्थसप्तमाः शेषा (४)। पञ्चम्या मध्ये नी द्वौ, धपावेकः, म एकः; निधौ द्विद्वौ, पौ द्वौ, एवमष्टौ लघव। कमलनिभमित्यक्षराणि—कमलैर्निनिधाः; शेष पः, निभंभ्या मनी, शेषाः परे (५)। षष्ठ्यां मध्ये पौ द्वौ; ऋषभाः षट्, एवमष्टौ लघव। वरसुरभिकुसुमेत्यक्षराणि (६)। सप्तम्या मध्ये म

एक , रिगावेकः, स एक·, सधावेक , निषादाश्चत्वार , एवमष्टौ लघव· । गन्धाधिवासीत्यक्षराणि, द्वितीयतृतीयपञ्चमषष्ठनवमा शेषा (७) । अष्टम्या मध्ये नी द्वौ, तारे स एक., रिसावेक , ऋषभाश्चत्वार·, एवमष्टौ लघवः । तमनोज्ञेत्यक्षराणि—तमनोभिर्निनिसा , शेषौ रिसौ, ज्ञेति रि·, शेषा परे (८) । नवम्या मध्ये निगमास्त्रयः, निगावेक·, स एकः, मन्द्रे निषादास्त्रय·, एवमष्टौ लघव· । नगराजसून्वित्यक्षराणि, चतुर्थपञ्चमाष्टमा· शेषाः (९) । दशम्या मन्द्रे निमनिमपपा· षट्, मध्ये गौ द्वौ, एवमष्टौ लघव· । रतिरागरभसेत्यक्षराणि, चतुर्थ. शेष· (१०) । एकादश्या मध्ये ग एक·, मन्द्रे पमपास्त्रय , निषादाश्चत्वारः, एवमष्टौ लघवः । केलीकुचग्रेत्यक्षराणि, द्वितीयचतुर्थसप्तमा· शेषाः (११) । द्वादश्या मध्ये मपमास्त्रय·, परिगा एकः, गाश्चत्वार·, एवमष्टौ लघवः । हलीलं तमित्यक्षराणि—हलीलमिति मपमा·, तमिति सप्तम·, शेषा इतरे (१२) । त्रयोदश्या मन्द्रे निनिपधनयः पञ्च, मध्ये गास्त्रयः, एवमष्टौ लघव· । प्रणमामि देवमित्यक्षराणि, चतुर्थसप्तमौ शेषौ (१३) । चतुर्दश्या मन्द्रे निषादा अष्टौ लघव । चन्द्रार्धमण्डीत्यक्षराणि, द्वितीय-चतुर्थसप्तमाः शेषाः (१४) । पञ्चदश्या मन्द्रे मौ द्वौ, धनी द्वौ, मध्ये सनिनय एक·, ध एक·, पौ द्वौ, एवमष्टौ लघवः । तविलास-कीलेत्यक्षराणि, चतुर्थसप्तमनवमदशमा शेषा. (१५) । षोडश्या मध्ये मपमास्त्रयः, परिगा एक·, गाश्चत्वार·, एवमष्टौ लघवः । नविनोदमि-त्यक्षराणि—नविनोभिर्मपमा·, दमिति सप्तमः, शेषा इतरे (१६) ।

कान्तं वामैकदेशप्रेङ्खोलमानकमलनिभं वरसुरभिकुसुमगन्धाधि-
वासितमनोज्ञनगराजसूनुरतिरागरभसकेलीकुचग्रहलीलम् ।
तं प्रणमामि देवं चन्द्रार्धमण्डितविलासकीलनविनोदम् ॥

इति गांधारपञ्चमी ॥ १६ ॥

अथान्ध्री

आन्ध्र्यामंशा निरिगपा रिगयोर्निधयोस्तथा ॥ १०५ ॥
संगतिर्न्यासपर्यन्तमंशानुक्रमतो व्रजेत् ।
षाडवं षड्जलोपेन मध्यमादिस्तु मूर्च्छना ॥ १०६ ॥
पूर्ववत्तु कलाकालविनियोगाः प्रकीर्तिताः ।

(क०) **आन्ध्र्यामंशा** इति । निरिगपाः पर्यायेणांशा ग्रहाश्च स्युः । रिगयोर्निधयोस्तथा । अत्र तथेति निपातः समुच्चयार्थः, निधयोश्चेति । संगति परस्पर संनिधिर्मेलनात्मक संबन्धः । कर्तव्येति शेषः । परस्परं संगतिरित्यनेनानियमे प्राप्ते नियमार्थमाह—अंशानुक्रमतो न्यासपर्यन्तं व्रजेदिति । अंशानुक्रमतः, अत्र निरिगपाना मध्ये यदा यो ऽंशीकृतस्तस्यानुक्रमतः, तमशीभूतं पूर्वमुच्चार्यानंशं पर्यायाशं वा पश्चादुच्चारयन्, न्यासपर्यन्तं गीतसमाप्तिकृत्स्वरपर्यन्तम्, आ गीतपरिसमाप्तेरित्यर्थः, व्रजेद्गायेदिति नियमः । तथा चाह भरतः—

'गाधारर्षभयोश्चात्र व्यापारस्तु परस्परम् ।
सप्तमस्य च षष्ठस्य न्यासगत्या ऽनुपूर्वशः ॥' इति ।

ग्रन्थान्तरे च

'स्वांशानुपूर्वीं व्याप्तिं च कुर्वन्न्यासावधिं व्रजेत्'

इति । शेषं निर्विशेषम् ॥ -१०५—१०६- ॥

(सु०) आन्ध्रीं लक्षयति—**आन्ध्र्यामिति** । आन्ध्र्या निषादर्षभगाधारपञ्चमा अंशाः । ऋषभगाधारयोर्निषादधैवतयोश्च संगतिः । अंशान्न्यासपर्यन्तमारोहणम् । षड्जलोपेन षाडवम् । मध्यमादिर्मूर्च्छना । गाधारपञ्चमीवत्कलातालविनियोगः ॥ -१०५—१०६- ॥

अस्यामान्ध्रयां गांधारो न्यासः । अंशा एवापन्यासाः । अस्याः प्रस्तारः—

१७ आन्ध्री

१. गा री री री री री री री
त रु णें दु कु सु म

२. री गा री गा री री री री
ख चि त ज टं

३. री री गा गा री री मा मा
त्रि दि व न दी स लि ल

४. री गा सा धनि नीं नीं नीं नीं
धौ त मु खं

५. नीं री नीं री धनिं धनि पा पा
न ग सू नु प्र ण य

६. मा पा मा रिग गा गा गा गा
वे द नि धि

७ री री गा सस मा मा पा पा
प रि णा हि तु हि न

८. मा पा मा रिग गा गा गा गा
शै ल गृ हं

९. धा नीं गा गा गा गा गा गा
अ मृ त भ वं

१०. पा पा मा रिग गा गा गा गा
गु ण र हि तं

११. नी नी नी नी री री री री
त म व नि र वि श शि

१२ री री गा नी सा सा नी नी
ज्व ल न ज ल प व न

१३. पां पां मां रिंगं गां गां गां गां
ग ग न त नु

१४. रीं रीं गां संमं मां मां पां पां
श र णं व्र जा मि

१५. मां मां नी नीं सां रीं गां पां
शु भ म ति कृ त नि ल

१६. रिंगं गां गां गां गां गां गां गां
य

(क०) माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलाया मध्ये ग एक·, ऋषभा· सप्त, एवमष्टौ लघव । तरुणेन्दुकुसुमेत्यक्षराणि, चतुर्थः शेषः (१)। द्वितीयस्या मध्ये रिगरिगाश्चत्वार·, ऋषभाश्चत्वार·, एवमष्टौ लघव· । खचितजटमिति क्रमेण पञ्चाक्षराणि, शेषा परे (२)। तृतीयस्यां मध्ये री द्वौ, गौ द्वौ, री द्वौ, मौ द्वौ, एवमष्टौ लघव· । त्रिदिवनदीसलिलेत्यक्षराणि (३)। चतुर्थ्यां मध्ये रिगसास्त्रय·, धनी एक, मन्द्रे निषादाश्चत्वारः, एवमष्टौ लघव· । धौतमुखमित्यक्षराणि—धौ इति रि., शेषो ग·, तमुभ्या सधौ, शेषो निः, खमिति निः, शेषा· परे (४)। पञ्चम्या मन्द्रे निरेकः, मध्ये रिरेक·, पुनर्मन्द्रे निरेक, मध्ये रिरेक·, मन्द्रे धनी द्विर्द्वौ, पौ द्वौ, एवमष्टौ लघव· । नगसूनुप्रणयमित्यक्षराणि, चतुर्थषष्ठसप्तमाः शेषा· (५)। षष्ठ्या मन्द्रे मपमास्त्रयः, मध्ये रिगावेकः, गाश्चत्वार·, एवमष्टौ लघवः।

वेदनिधिमित्यक्षराणि—वे इति म·, शेषः प·, दनिभ्या मरी, शेषो गः, धिमिति गः, शेषा. परे (६)। सप्तम्या मध्ये रिरिगास्त्रयः, ससावेकः, मौ द्वौ, पौ द्वौ, एवमष्टौ लघवः। परिणाहितुहिनेत्यक्षराणि, चतुर्थपञ्चमौ शेषौ (७)। अष्टम्या षष्ठयुक्ता. स्वरा·। शैलगृहमित्यक्षराणि—शै इति मः, तच्छेष. प·, लगृभ्या मरी, शेषो गः, हमिति गः, शेषाः परे (८)। नवम्या मन्द्रे धनी द्वौ, मध्ये गाः षट्, एवमष्टौ लघवः। अमृतभवमिति निरन्तराण्यक्षराणि, शेषा परे (९)। दशम्या मध्ये पपमास्त्रयः, रिगावेकः, गाश्चत्वार·, एवमष्टौ लघव.। गुणरहितमित्यक्षराणि—गुणरहिभि पपमरय., शेषो गः, तमिति ग·, शेषाः परे (१०)। एकादश्या मध्ये निषादाश्चत्वार, ऋषभाश्चत्वारः, एवमष्टौ लघव·। तमवनिरविशशीत्यक्षराणि (११)। द्वादश्या मध्ये रिरिगनयश्चत्वारः, सौ द्वौ, नी द्वौ, एवमष्टौ लघव। ज्वलनजलपवनेत्यक्षराणि (१२)। त्रयोदश्या तारे पपमास्त्रय·, रिगावेकः, गाश्चत्वार., एवमष्टौ लघवः। गगनतनुमित्यक्षराणि—गगनतैः प्रथमादयश्चत्वार·, नुमिति षष्ठः, शेषा इतरे (१३)। चतुर्दश्या तारे रिरिगास्त्रयः, समावेक; मौ द्वौ, पौ द्वौ, एवमष्टौ लघव·। शरणं व्रजामीत्यक्षराणि, चतुर्थपञ्चमाष्टमा शेषाः (१४)। पञ्चदश्या तारे मौ द्वौ, नी द्वौ, सरिगपाश्चत्वार·, एवमष्टौ लघव। शुभमतिकृतनिलेत्यक्षराणि (१५)। षोडश्या तारे रिगावेकः, गाः सप्त, एवमष्टौ लघव। यमिति रि., शेषाः परे (१६)।

तरुणेन्दुकुसुमखचितजटं त्रिदिवनदीसलिलधौतमुखं
नगसूनुप्रणयं वेदनिधि परिणाहितुहिनशैलगृहम्।
अमृतभवं गुणरहितं तमवनिरविशशिज्वलनजलपवनगगनतनुं
शरणं व्रजामि शुभमतिकृतनिलयम्॥ इत्यान्ध्री॥ १७॥

अथ नन्दयन्ती

नन्दयन्त्यां पञ्चमो ऽंशो गांधारस्तु ग्रहः स्मृतः ॥ १०७ ॥
कैश्चित्तु पञ्चमः प्रोक्तो ग्रहो ऽस्यां गीतवेदिभिः ।
मन्द्रर्षभस्य बाहुल्यं षाडवं षड्जलोपतः ॥ १०८ ॥
हृष्यका मूर्च्छना तालः पूर्ववद् द्विगुणाः कलाः ।
विनियोगो ध्रुवागाने प्रथमप्रेक्षणे भवेत् ॥ १०९ ॥

अस्यां नन्दयन्त्यां गांधारो न्यासः । मध्यमपञ्चमावपन्यासौ । अस्याः प्रस्तारः—

१८. नन्दयन्ती

१. गा गा गा गा पा पा धप मा
सौ

२. धा धा धा धा धा नी सनिनि ध।
०

३. पा पा पा पां पा पा पा पां
म्यं

४. धा नीं मां पा गा गा गां गा
वे दा ग वे द

५. मा री गा गा गा गा गा गा
क र क म ल यो नि

६. मा मा पा पा धा निध पा प।
त मो र जो वि व

७. धा नी मा पा गा गा गा गा
जिं तं

८. गम पा पा पा मा मा गा गा
हरं

९. धा नी मा पा गा गा गा गा
भ व ह र क म ल गृ

१०. मा मा मा मा मा मा मा मा
हं

११. री गा मा पा पम पा पा नी
शि वं शा तं सं नि

१२ री री रीं रीं पा पा मा मा
वे श न म पू र्वं

१३. धा नीं सनिनि धा पा पा पा पा
भू ष ण ली लं

१४ धा नी मा पा गा गा गा गा
उ र गे श भो ग

१५. गा पा पा पा धा मा गा मा
भा सु र शु भ पृ थु

१६. धा धा नी धा पा पा पा पा
लं

१७. री गा मा पा पम पा पा नी
अ च ल प ति सू नु

१८. री री री री पा पा पा पा
क र पं क जा म

१९. पा पा पा पा धा मा मा मा
ल वि ला स की ल

२० नी पा गा गंमं गा गा गा गा
न वि नो दं

२१. री री गा गा मा मा मा मा
स्फ टि क म णि र ज त

२२. नी पा नी मा नी धा पा पा
सि त न व दु कू ल

२३ सां सां धनि धा पा पा पा पा
क्षी रोद सा ग

२४. मा पा मा परिग गा गा सां सां
र नि का शं

२५ री री गा गा मा मा पा पा
अ ज शि र क पा ल

२६ री री री गा मा रिग मा मा
पृ थु भा ज नं

२७ मा नी पा नी गा गा गा गा
वं दे सु ख दं

२८. मा मा पा पा धा धनि निध म
ह र दे ह म म ल

२९.	धा	धा	सा	नी	धा	नी	पा	पा
	म	धु	सू		द	न		सु
३०	रीं	रीं	रीं	रीं	मा	पा	धा	मा
	ते		जो		धि	क		सु
३१	नी	नी	नी	नी	धा	पा	मा	मा
	ग	ति	यो					
३२.	मा	परिग	गा	गा	गा	गा	गा	गा
			नि					

(क०) **नन्दयन्त्यामिति** । गाधारस्तु ग्रहः स्मृत इति । अत्र 'अंश एव ग्रह कार्य' इति सकलजातिसाधारणेन मुनिवचनेन प्राप्तस्य पञ्चमग्रहत्वस्य गाधारग्रहो जातिविशेषे कार्य' इति विशेषविषयं तद्वचनमेव तक्रकौण्डिन्यनयेन बाधकमित्यवगन्तव्यम् । गीतवेदिभिर्लक्षणज्ञैः कैश्चिदाचार्यैस्त्वस्या पञ्चमो ग्रह प्रोक्त इति पक्षान्तरम् । **मन्द्रर्षभस्य बाहुल्यमिति** । नन्दयन्त्या माध्यमग्रामिकत्वेन ऋषभपर्यन्ताया मन्द्रगतावभावे ऽपि मन्द्रपञ्चमारम्भनिष्पन्नहृष्यकामूर्च्छनाऽऽश्रयत्वादंशीभूतमन्द्रपञ्चमेन ऋषभमात्रस्य संवादादितरस्थानस्थितापेक्षया मन्द्रर्षभस्य बाहुल्य कर्तव्यमित्यभिप्राय । तथा चाह भरत —

'बाहुल्यमृषभस्यात्र तच्च मन्द्रगतं स्मृतम्'

इति । **तालः पूर्ववदिति** । पूर्ववदान्ध्र्यामिव तालश्चच्चत्पुटः । द्विगुणा कला इति । पूर्वाऽपेक्षया द्विगुणाः । पूर्वस्या कलाः षोडश, अस्या तु द्वात्रिंशत्कला भवन्तीत्यर्थः । एतेन चच्चत्पुटस्य दक्षिणमार्गे चतुरावृत्तिरुक्ता भवति । अन्यत्सुगमम् । माध्यमग्रामिकशुद्धस्वरमेलने प्रथमकलायां

मध्ये गाश्चत्वार·, पौ द्वौ; धपावेकः, म एकः; एवमष्टौ लघवः। सौ, इति प्रथम·, शेषाः परे (१) द्वितीयस्या मध्ये धाः पञ्च, निरेकः, सनिनय एक·, ध एक·, एवमष्टौ लघव·। शेषाः सर्वे (२)। तृतीयस्या मन्द्रे पा अष्टौ लघव·। म्यमिति प्रथम· प·, शेषा· परे (३)। चतुर्थ्या मन्द्रे धनिमपाश्चत्वारः, गाश्चत्वार·, एवमष्टौ लघव। वेदाङ्ग-वेदेत्यक्षराणि, द्वितीयचतुर्थसप्तमा शेषा (४)। पञ्चम्या मध्ये मरी द्वौ, गा. षट्, एवमष्टौ लघव। करकमलयोनिमित्यक्षराणि, सप्तम शेषः (५)। षष्ठ्या मध्ये मौ द्वौ, पौ द्वौ, ध एकः, निधावेकः, पौ द्वौ, एवमष्टौ लघव·। तमोरजोविवेत्यक्षराणि, सप्तमादय· शेषा (६)। सप्तम्या मध्ये धनिमपाश्चत्वारः, गाश्चत्वार, एवमष्टौ लघव। जितमिति धनी, तृतीयादयः शेषाः (७)। अष्टम्या मध्ये गमावेक., पास्रय, मौ द्वौ, गौ द्वौ, एवमष्टौ लघव। हरमिति गमौ, शेषा· परे (८)। नवम्या सप्तम्युक्ता स्वरा। भवहरकमलगृ, इत्यक्षराणि (९)। दशम्या मध्ये मा अष्टौ लघव। हमिति प्रथम·; शेषाः परे (१०)। एकादश्या मध्ये रिगमपाश्चत्वार, पमावेक, पौ द्वौ, निरेक; एवमष्टौ लघवः। शिवं शान्त संनीत्यक्षराणि; चतुर्थषष्ठाष्टमा शेषा (११)। द्वादश्या मन्द्र ऋषभाश्चत्वारः, पौ द्वौ, मौ द्वौ, एवमष्टौ लघव। वेशनमपूर्व-मित्यक्षराणि, द्वितीयसप्तमौ शेषौ (१२)। त्रयोदश्या मन्द्रे धनी द्वौ, मध्यषड्जमन्द्रनिनय एक, ध एक, पाश्चत्वार·, एवमष्टौ लघव·। भूषणलीलमित्यक्षराणि, तृतीयचतुर्थपञ्चमाष्टमदशमा. शेषा (१३) चतुर्दश्या मन्द्रे धनिमपाश्चत्वारः, गाश्चत्वार, एवमष्टौ लघव। उरगेशभोगेत्य-क्षराणि, चतुर्थसप्तमौ शेषौ (१४)। पञ्चदश्या मध्ये ग एक., पास्रय·, धमगमाश्चत्वार, एवमष्टौ लघव। भासुरशुभपृथ्वित्यक्षराणि,

द्वितीयः शेषः (१५)। षोडश्यां मध्ये धौ द्वौ, निधौ द्वौ, पाश्चत्वार, एवमष्टौ लघव। लमिति प्रथमः, शेषाः परे (१६)। सप्तदश्या मध्ये रिगमपाश्चत्वार·, पमावेक.., पौ द्वौ, निरेक, एवमष्टौ लघव। अचलपतिसूनित्यक्षराणि, षष्ठनवमौ शेषौ (१७)। अष्टादश्या मन्द्र ऋषभाश्चत्वार, पाश्चत्वार.., एवमष्टौ लघवः। करपङ्कजामेत्यक्षराणि, चतुर्थ-सप्तमौ शेषौ (१८)। एकोनविश्या मध्ये पाश्चत्वार, ध एक, मास्त्रय, एवमष्टौ लघव। लविलासकीलेत्यक्षराणि, चतुर्थसप्तमौ शेषौ (१९)। विश्या मन्द्रे निपगास्त्रय, गमावेकः, गाश्चत्वार, एवमष्टौ लघव·। नविनोदमित्यक्षराणि, चतुर्थपञ्चमौ सप्तमादयश्च शेषाः (२०)। एक-विश्या मन्द्रे री द्वौ, गौ द्वौ, माश्चत्वार.., एवमष्टौ लघव·। स्फटि-कमणिरजतेत्यक्षराणि (२१)। द्वाविश्या मध्ये निपनिमनिधपपा अष्टौ लघव.। सितनवदुकूलेत्यक्षराणि, सप्तम शेष· (२२)। त्रयोविश्या तारे सौ द्वौ, मध्ये धनी एक·, ध एकः, पाश्चत्वार, एवमष्टौ लघव·। क्षीरोदसागेत्यक्षराणि, द्वितीयपञ्चमसप्तमाष्टमाः शेषा (२३)। चतुर्विश्या मध्ये मपमास्त्रय·, परिगा एक, गौ द्वौ, तारे सौ द्वौ, एवमष्टौ लघव। रनिकाशमित्यक्षराणि—रनिकाभिर्मपमा, शमिति सप्तमः, शेषा इतरे (२४)। पञ्चविश्या मध्ये री द्वौ, गौ द्वौ, मौ द्वौ, पौ द्वौ, एवमष्टौ लघवः। अजशिरःकपालेत्यक्षराणि, सप्तम शेष (२५)। षड्विश्या मध्य ऋषभास्त्रय, गमौ द्वौ, रिगावेक, मौ द्वौ, एवमष्टौ लघव.। पृथुभाजनमित्यक्षराणि, चतुर्थपञ्चमसप्तमनवमा शेषा (२६)। सप्तविश्या मध्ये मनिपनयश्चत्वार·, गाश्चत्वार, एवमष्टौ लघव। वन्दे सुखदमित्यक्षराणि, द्वितीयचतुर्थाष्टमा· शेषा· (२७)। अष्टाविश्यां मध्ये ममपपधा पञ्च, धनी एक, निधावेकः, म एक, एवमष्टौ लघवः।

हरदेहममलेत्यक्षराणि, चतुर्थसप्तमनवमा. शेषा· (२८)। एकोनत्रिंश्या मध्ये धधसनिधनिपपा अष्टौ लघव । मधुसूदनसु, इत्यक्षराणि, चतुर्थ-सप्तमौ शेषौ (२९)। त्रिंश्यां तार ऋषभाश्चत्वार·, मध्ये मपधमाश्च-त्वार·, एवमष्टौ लघव । तेजोधिकसु, इत्यक्षराणि, द्वितीयचतुर्थसप्तमा शेषा (३०)। एकत्रिंश्या मध्ये निषादाश्चत्वारः, धपममाश्चत्वार, एवमष्टौ लघव । गतियोभिर्निषादास्त्रय, चतुर्थादय शेषा (३१)। द्वात्रिंश्या मध्ये म एक., परिगा एक, गा षट्, एवमष्टौ लघव । निमिति पञ्चमो गः, शेषा इतरे (३२)।

सौम्यं वेदाङ्गवेदकरकमलयोनि तमोरजोविवर्जितं हरं
भवहरकमलगृहं शिव शान्तं संनिवेशनमपूर्व
भूषणलीलमुरगेशभोगभासुरशुभपृथुलम् ।
अचलपतिसूनुकरपङ्कजामलविलासकीलनविनोद
स्फटिकमणिरजतसितनवदुकूलक्षीरोदसागरनिकाशम् ।
अजशिर.कपालपृथुभाजनं वन्दे सुखदं
हरदेहममलमधुसूदनसुतेजोऽधिकसुगतियोनिम् ॥

इति नन्दयन्ती ॥ १९ ॥

इति संसर्गजा विकृतजातय प्रातिस्विकांशेष्वेकैकांशेनैव पूर्णत्वे प्रस्तार्य दर्शिता । एवं यथासंभवमंशावस्थाऽन्तरे ऽप्यंशान्तरैरपि लक्षणानु-सारेणोह्यम् । तत्र—

स्युर्द्वादशकला. षाड्जी धैवती षड्जमध्यमा ।
कैशिकी रक्तगाधारी षड्जोदीच्यवतीति षट् ॥
स्यु· षोडशकलाश्चाष्टौ गाधारी च निषादिनी ।

अनुक्ताविह तालः स्यात्त्रिधैवैककलाऽऽदिकः ।
मार्गाः क्रमाच्चित्रवृत्तिदक्षिणा गीतयः पुनः ॥ ११० ॥
मागधी संभाविता च पृथुलेत्युदिताः क्रमात् ।

गाधारोदीच्यवा कार्मारवी गाधारपञ्चमी ॥
मध्यमोदीच्यवा चान्ध्री तथा स्यात्षड्जकैशिकी ।
तिस्रो ऽष्टकलिका पञ्चम्यार्षभी मध्यमा तथा ।
द्वात्रिंशत्कलिका चैका नन्दयन्ती प्रकीर्तिता ॥-१०७—१०९ ॥

(सु०) नन्दयती लक्षयति—**नन्दयन्त्यामिति** । नन्दयन्त्या पञ्चमो ऽशः । गाधारो ग्रहः । नन्वंशस्यैव ग्रहत्व पूर्वमुक्तम् । मैवम्, उत्सर्गमात्र तदपोह्यते । मतान्तरे तु पञ्चमो ग्रह उक्तः । मन्द्रस्थानस्थर्षभस्य बहुलत्वम् । षड्जलोपात्षाडवम् । हृष्यका मूर्च्छना । चच्चत्पुटस्तालः । द्वात्रिंशत्कलाः । ध्रुवाया प्रथमप्रेक्षणे विनियोगः ॥ -१०७—१०९ ॥

(क०) पूर्वमेकस्मिन्नेव षाड्ज्या लक्षणे 'त्रिधा ताल पञ्चपाणि·' इत्यादिनैकतालादिषु तालभेदेषु चित्रादयस्त्रयो मार्गा मागध्यादयस्तिस्रो वृत्तयश्च क्रमेण योजनीया इत्युक्तम् । तथा केषुचिद्धैवत्यादीना लक्षणेषु 'तालो मार्गश्च गीतय । विनियोगश्च षाड्जीवत्' इति 'षाड्जीवद्गीतितालादि' इति चातिदेशतो दर्शितम् । अन्येष्वार्षभ्यादीना लक्षणेषु तु 'तालश्चच्चत्पुटो मतः । अष्टौ कला भवन्ति' इति 'कला षोडश कीर्तिता' इति च तालमात्रं कलासंख्यामात्रं चोक्तम् । तत्रैककलत्वादितालविशेषमार्गगीतीनामनुक्तिरेव । तत्र कथं प्रयोग इत्याकाङ्क्षायामाह—**अनुक्ताविहेति** । इह जातिलक्षणेषु, अनुक्तावेककलत्वादितालभेदमार्गगीतीनामनभिधाने तललक्षणेषूक्तश्चच्चत्पुट, पञ्चपाणिर्वैककलाऽऽदिस्त्रिधैव स्यात् । एककलाऽऽदिक

योक्ता ऽस्माभिः कलासंख्या सा दक्षिणपथे स्थिता ॥ १११ ॥
वार्त्तिके द्विगुणा ज्ञेया सैव चित्रे चतुर्गुणा ।
सर्वजातिषु जानीयादंशस्वरगतं रसम् ॥ ११२ ॥

इति विधेयविशेषणम् । त्रिधैवेत्यादि षाड्ज्यामेव व्याख्यातं तत एवाव-गन्तव्यम् ॥ ११०, ११०- ॥

(सु०) यत्र विशेषो नोक्तस्तत्र साधारण लक्षणमाह—**अनुक्ता-**विति । यत्र तालविशेषो नोक्तस्तत्रैककलो द्विकलश्चतुष्कलश्चच्चत्पुटो ज्ञातव्यः । मार्गाश्च क्रमेणैककलाऽऽदिषु चित्रवृत्तिदक्षिणाः । गीतयश्च मागधीसभावितापृथुला. क्रमशः ॥ ११०, ११०- ॥

(क०) एवं तर्हि षाड्ज्यादिलक्षणेषूक्ता कलासख्या तत्रोक्तेषु तालमार्गगीतिभेदेषु कतमभेदेत्याकाङ्क्षायामाह—**योक्ता ऽस्माभिरिति** । अस्माभिर्भरतमतानुसारिभिरस्मदादिभिरित्यर्थ । या कलासंख्या पञ्चपाणौ द्वादश, चच्चत्पुटे कासुचिदष्टौ, कासुचित्षोडश, एकस्या द्वात्रिशदित्येवं-रूपोक्ता, षाड्ज्यादिलक्षणेष्विति शेष , सा कलासंख्या दक्षिण.पथे दक्षिणमार्गे स्थितेति ज्ञेया । एतेनानया मार्गविशेषाश्रयतया कलासंख्याया अत्र चतुष्कलस्तालः पृथुला गीतिश्चेति तालगीतिविशेषावप्युक्तौ भवत· । प्रत्येकं त्रिविधस्य तालादित्रितयस्य गीतिलक्षणेषु मिथो यथासंख्यं योजनादिहोक्ता कलासंज्ञां दक्षिणमार्गगतामुक्त्वा तस्या एव गातुरिच्छया मार्गान्तरप्रयोगप्रकारं दर्शयति—**वार्त्तिक** इत्यादिना । सैव मार्गोक्ता कलासंख्यैव वार्त्तिके मार्गे द्विगुणा ज्ञेया । षाड्ज्या तावद्दक्षिणे द्वादशोक्ता वार्त्तिके चतुर्विंशतिर्भवतीत्यर्थ । अष्टलघ्वात्मिका कला हित्वा चतुर्लघ्वा-त्मिका. कला. कर्तव्या इत्यभिप्राय. । सैवेति पुनरावृत्तिः । सा

दृश्यन्ते जन्यरागांशास्तज्ज्ञैर्जनकजातिषु ।
ब्रह्मप्रोक्तपदैः सम्यक्प्रागुक्ता.[1] शंकरस्तुतौ ॥ ११३ ॥
अपि ब्रह्महणं पापाज्जातयः प्रपुनन्त्यमू. ।
ऋचो यजूंषि सामानि क्रियन्ते नान्यथा यथा ॥ ११४ ॥
तथा सामसमुद्भूता जातयो वेदसंमिताः ।

दक्षिणोक्ता कलासंख्यैव चित्रे मार्गे चतुर्गुणा ज्ञेया । षाड्ज्या तावदष्टाचत्वारिंशत्कला भवन्तीत्यर्थ । भङ्क्त्वा लघुद्वयात्मिका. कलाः कर्तव्या इत्यभिप्राय. । एतेनैव वार्त्तिके द्विकलस्ताल सभाविता गीति., चित्रे त्वेककलस्तालो मागधी गीतिरिति चोक्त भवति । एव जात्यन्तरेष्वप्यूहनीयम् । लक्षणेषु प्रत्येकं रसानामुक्तिगौरवमिति मत्वा सर्वासामपि लघूक्त्या रसयोगं दर्शयति—**सर्वजातिष्विति** । अशस्वरगतं यस्या जातौ यदा यो ऽंशो भवति तस्याम् 'सरी वीरे' इत्यादिनोक्तप्रकारेण तत्तदंशस्वरगतं रसं विजानीयात् । ज्ञात्वा तत्तद्रसाभिव्यञ्जकैः पदैर्गायेदित्यर्थः ॥ -१११, ११२ ॥

(सु०) मार्गविशेषेण कलाविशेष कथयति—**योक्ता ऽस्माभिरिति** । 'अष्टगुरुः कला' इति या कलासख्योक्ता सा दक्षिणमार्गे । वर्त्तिके मार्गे षोडशगुरुः कला । चित्रे मार्गे द्वात्रिंशद्गुरुः कला । स्वराणा रसाः पूर्वमुक्ताः 'सरी वीरे ऽद्भुते रौद्रे' इत्यादिना । यस्या जातौ यो ऽंशस्वरस्तदीयो रसस्तस्या जातौ ज्ञातव्यः ॥ -१११, ११२ ॥

(क०) पूर्वं षाड्ज्यादिषु कासुचिज्जातिषु 'वराटी दृश्यते' इत्यादिभिर्जन्यरागाशा दिङ्मात्रेण प्रदर्शिताः कासुचिन्न प्रदर्शिताः । तत्र सर्वत्रेदानीं संक्षेपेण रागाशान्दर्शयितुमाह—**दृश्यन्त इति** । जन्य-

[1] ०प्रयुक्ता

रागाशा, ग्रामरागादयो दशविधा अपि जातीना साक्षात्परंपरया वा जन्यरागा एव, तेषामशा अवयवाः, तथा च वक्ष्यति—'रागान्तरस्यावयवो रागाश' ' इति । रागैकदेशा इत्यर्थ. । जनकजातिषु साक्षात्परंपरया वा स्वेषा जनिकासु जातिषु तज्ज्ञै रागभेदविद्भिर्दृश्यन्त उद्भाव्यन्त इत्यर्थः । अथ यथाविधि जातिगानैरदृष्टफलातिशयं दर्शयति—**ब्रह्मप्रोक्तेति** । प्राक्पूर्व शंकरस्तुतौ शंकरस्तुति विषयीकृत्य ब्रह्मप्रोक्तपदै, ब्रह्मणा चतुर्मुखेण प्रोक्तैर्ग्रथितै पदै. 'तं भवललाट' इत्यादिभिर्योजयित्वा सम्यगन्यूनानतिरेकेणोक्ता गीताश्चेदमू षाड्ज्यादयो जातयो ब्रह्महणमपि ब्रह्मघ्नमपि पुरुषं पापाद् ब्रह्महत्यारूपान्मोचयित्वा प्रपुनन्ति पूत कुर्वन्ति । अनेन सम्यग्जातिगानस्य महापातकप्रायश्चित्तत्वमुक्त भवति । एवं सामर्थ्य जातीनामुक्तनियमयुक्तानामृगादिमन्त्रसादृश्यहेतुत्वेनाभिसंधाय तासामनियमप्रयोगं निषेधति—**ऋच** इति । ऋचो यजूषि सामानि यथा ऽन्यथा न क्रियन्ते स्वरवर्णोच्चारणादिवैपरीत्येन न प्रयुज्यन्ते, तथा सामसमुद्भूता सामभ्य समुत्पन्ना अत एव वेदसंमिता वेदसदृशा जातयो ऽन्यथा न क्रियन्ते; स्वरपदतालादिवैपरीत्येन न प्रयोक्तव्या इत्यर्थः । एतेन विपरीतप्रयोगे प्रत्यवाय सूचितो भवति ॥ ११३—११४- ॥

(सु०) **दृश्यन्त** इति । यासु जन्यजातिषु रागाशा नोक्तास्तासु तज्जनकजातिरागाशा ज्ञातव्याः । उक्ता जातीः स्तौति—**ब्रह्मप्रोक्तपदैरिति** । प्रस्तारोक्तानि पदानि शंकरस्तुतौ ब्रह्मप्रोक्तानि; तैः पदैः सम्यग्लक्षणाव्यभिचारेण प्रयुक्ता जातयो ब्रह्महण ब्रह्मघ्नमपि पवित्रयन्ति, किमुतान्यपापिनमित्यर्थः । जातीनामन्यथाप्रयोगे दोषमाह—**ऋच** इति । वेदसमाना जातयस्ता असम्यक्प्रयोगे दोषात्सम्यक्प्रोक्तव्या इत्यर्थ' ॥ ११३—११४- ॥

इति प्रथमे स्वरगताध्याये सप्तमं जातिप्रकरणम् ॥ ७ ॥

अथाष्टमं गीतिप्रकरणम्

शुद्धजातिसमुद्भूतकपालान्यधुना ब्रुवे ।
रागा जनकजातीनां तत्कपालेषु संमिताः ॥ १ ॥
षड्जो ग्रहो ऽंशो ऽपन्यासो गो न्यासो ऽतिबहू गमौ ।
अल्पा रिपनिधा लङ्घ्यो रिः कला द्वादशोदिताः ॥ २ ॥
यस्मिन्षाड्जीकपालं तद्गदितं गीतवेदिभिः[1] ।
यत्रर्षभो ऽंशो ऽपन्यासो मो ऽन्तो गनिपधाल्पता ॥ ३ ॥

(क०) अथोद्देशक्रमेण कपालानि लक्षयितुमादौ तदुत्पत्तिं दर्शयन्प्रतिजानीते— **शुद्धजातीति** । अधुना जातिस्वरूपनिरूपणानन्तरं शुद्धजातिसमुद्भूतकपालानि, शुद्धजातिभ्यः षाड्ज्यादिभ्यः सप्तभ्यः समुद्भूतानि कपालानि । एतेन संसर्गजजातिभ्यः कपालोत्पत्तिर्नेत्युक्तं भवति । ननु जातित्वाविशेषात्ताभ्यो ऽपि कपालोत्पत्तिः कुतो नेति चेत्, उच्यते । संसर्गजा अपि शुद्धाभ्यः समुत्पन्ना । कपालान्यपि ताभ्य एव । उभयेषामप्येककारणादव्यवधानोत्पन्नत्वस्याविशिष्टत्वात्संसर्गजाना कपालजातीयं पति कारणत्वायोगादिति कपालपरिज्ञानस्य दृष्टप्रयोजनं तावद्दर्शयति— **रागा** इति । जनकजातीनाम्, अत्र शुद्धजातयो जनकत्वेन विवक्षिताः, तासा रागा जन्या रागाः, 'षड्जे षाड्जीसमुद्भूतं श्रीरागम्' इत्यादिना वक्ष्यमाणप्रकारेण श्रीरागादयो रागा , तत्कपालेषु तासां षाड्ज्यादीना कपालेषु समिता सदृशाकाराः प्रतीयन्ते । रागस्वरूपपरिज्ञानमत्र प्रयोजनमित्यर्थः । यथा घटैकदेशत्वेन कपालानि घटप्रतीतिजनकान्येवमेतान्यपि रागैकदेशत्वेन रागप्रतीतिजननात्कपालानीव कपालानीति तेषा संज्ञा ऽव-

[1] मार्गवेदिभिः

सो ऽत्यल्पो ऽष्टकलं तत्स्यात्कपालं त्वार्षभीगतम् ।
मध्यमो[1] ऽंशो ग्रहो न्यासो ऽपन्यासो धैवतो बहुः ॥ ४ ॥
यत्राल्पाः सरिगा लोपाद्रिपयोरौडुवं भवेत् ।
तद्गांधारीकपालं स्यात्कलाऽष्टकविनिर्मितम् ॥ ५ ॥
मध्यमो ऽंशो निरिगपाः स्वल्पा यत्र कला नव ।
तन्मध्यमाकपालं स्यादिति निःशङ्कसंमतम् ॥ ६ ॥
ऋषभांशं सग्रहं च निधषड्जगमाल्पकम् ।
कपालं पञ्चमीजातिजातमष्टकलं विदुः ॥ ७ ॥
अत्यल्पर्षभगांधारं पन्यासं मधभूरि च ।
षाड्ज्या इव कपालं तद्धैवत्याः सकलाऽष्टकम् ॥ ८ ॥
ग्रहांशन्यासषड्जं च रिगाल्पमतिभूरिभिः ।
निधमैरष्टकलकं स्यान्नैषादीकपालकम् ॥ ९ ॥
इति सप्त कपालानि गायन्ब्रह्मोदितैः पदैः ।
स्वरैश्च पार्वतीकान्तस्तुतौ कल्याणभाग्भवेत् ॥ १० ॥

गन्तव्या । अथ वा, पुरा भिक्षाऽटनसमये शंभुना षाड्ज्यादिषु गीयमानासु निरतिशयरसाभिव्यक्त्या रसात्मिकाया तन्मौलिगतचन्द्रकलाया च स्रवन्त्या तदमृतरससिक्तानि तद्भूषणब्रह्मकपालानि तदा सजीवानि तद्गानमनुकृत्यागायन्किल । अत कपालगीतत्वात्कपालसंज्ञानीत्यैतिह्यम् । षाड्जीकपालादिलक्षणानि स्पष्टार्थानि । एतेषा जातिभ्य. स्वरूपभेदस्तु न्यासादिभेदाद् द्रष्टव्य । उच्यमाननियमेन कपालाना गातुरदृष्टफलयोगं चाह— **इति सप्त कपालानीति** ॥ १—१० ॥

[1] गाधारो

यत्र ग्रहो ऽंशो ऽपन्यासः पञ्चमो बहुलस्तु रि ।
सो न्यासो मधगांधारास्त्वल्पास्तत्कम्बलं मतम् ॥ ११ ॥

(सु०) '०कपालानि च कम्बलम्। नानाविधा गीतयश्च०' इति पदार्थसग्रहोक्तवस्तुक्रमानुरोधादुपयोगित्वेनोद्देशक्रममनुल्लङ्घ्यादौ कपालानि निरूपयितुमाह—**शुद्धजातीति**। यस्या जातेर्यत्कपाल समुत्पन्न तज्जातिरागा एव तस्मिन्कपाले ज्ञातव्याः ॥ १ ॥ षाड्जीकपालं लक्षयति—**षड्ज इति**। यस्मिन्षड्जस्वर एव ग्रहश्चाशश्चापन्यासश्च, गाधारो न्यासः, गाधारमध्यमयोरतिबाहुल्यम्, ऋषभपञ्चमनिषादधैवतानामल्पत्वम्, ऋषभस्य लङ्घनमीषत्स्पर्शः, द्वादश कलाः, तत्षाड्जीकपाल भरतादिभिर्गदितम् ॥ २, २- ॥ आर्षभीकपाल लक्षयति—**यत्रेति**। यत्रर्षभो ऽशो ऽपन्यासश्च, मध्यमो न्यासः, पर तु गाधारनिषादपञ्चमधैवता अल्पा, षड्जो ऽत्यल्प, अष्टौ कला', तदार्षभीकपालम् ॥ -३, ३- ॥ गाधारीकपाल लक्षयति—**मध्यमो ऽंश इति**। यत्र मध्यमो ऽशस्वरो ग्रहो न्यासो ऽपन्यासश्च, धैवतस्य बाहुल्यम्, षड्जर्षभगाधारपञ्चमा अल्पा', ऋषभपञ्चमलोपादौडुवम्, अष्टौ कलाः, तद् गाधारीकपालम् ॥ -४, ५ ॥ मध्यमाकपालं लक्षयति—**मध्यमो ऽंश इति**। यत्र मध्यमो ऽशस्वरः, निषादर्षभगाधारपञ्चमाः स्वल्पाः, नव कलाः, तन्मध्यमाकपालम् ॥ ६ ॥ पञ्चमीकपाल लक्षयति—**ऋषभाशमिति**। यत्र ऋषभो ऽशस्वरः, षड्जो ग्रह', निषादधैवतषड्जगाधारमध्यमा अल्पाः, अष्टौ कलाः, तत्पञ्चमीकपालम् ॥ ७ ॥ धैवतीकपाल लक्षयति—**अत्यल्पेति**। यत्रर्षभगाधारावत्यल्पौ, पञ्चमो न्यासः, मध्यमधैवतयोर्बहुत्वम्, अष्टौ कला', अन्यत्षाड्जीकपालवत्, तत्तु धैवतीकपालम् ॥ ८ ॥ नैषादीकपाल लक्षयति—**ग्रहाशेति**। यत्र षड्जो ग्रहो ऽंशो न्यासश्च, ऋषभगाधारयोरल्पत्वम्, निषादधैवतमध्यमा अतिबहुलाः, अष्टौ कलाः, तन्नैषादीकपालम् ॥ ९ ॥ कपालगाने फलमाह—**इतीति**। इति ब्रह्मप्रोक्तैर्जातिप्रस्तारे कथितै. पदैरुक्तैः स्वरैश्च सप्त कपालानि गायन्कल्याण भजते ॥ १० ॥ इति कपाललक्षणम् ॥

(क०) अथ यथोद्देशक्रमं कम्बल लक्षयित्वा तस्योत्पत्ति तद्भेदबाहुल्य च प्रदर्श्य तद्गानस्य फलमाह—**यत्र ग्रहो ऽशो ऽपन्यास इत्यादिना**।

पञ्चमीजातिसंजातमल्पताबहुतावशात् ।
स्वराणां बहवो भेदास्तस्य पूर्वैरुदीरिताः ॥ १२ ॥
प्रीतः कम्बलगानेन कम्बलाय वरं ददौ ।
पुरा पुरारिरद्यापि प्रीयते तैरतः शिवः ॥ १३ ॥
कपालानां क्रमाद् ब्रूमो ब्रह्मप्रोक्तां पदावलीम् ।

झण्टुं झण्टुं ॥ १ ॥ खट्वाङ्गधरं ॥ २ ॥ दंष्ट्राकरालं ॥ ३ ॥ तडित्सदृशजिह्वं ॥ ४ ॥ हौ हौ हौ हौ हौ हौ हौ हौ ॥ ५ ॥ बहुरूपवदनं घनघोरनादं ॥ ६ ॥ हौ हौ हौ हौ हौ हौ हौ हौ ॥ ७ ॥ ॐ ॐ हां रौं हौं हौं हौं हौं ॥ ८ ॥ नृमुण्डमण्डितम् ॥ ९ ॥ हूं हूं कह कह हूं हूं ॥ १० ॥ कृतविकटमुखम् ॥ ११ ॥ नमामि देवं भैरवम् ॥ १२ ॥ इति षाड्जीकपालपदानि ॥ १ ॥

निगदव्याख्यातमेतत् । कम्बलनाम्ना खण्डपरशुकर्णकुण्डलेन कुण्डलीन्द्रेण गीतत्वादस्य कम्बलसंज्ञा ॥ ११—१३ ॥

(सु०) कम्बल निरूपयति—यत्रेति । यत्र पञ्चमो ग्रहो ऽशो ऽपन्यासश्च, ऋषभस्य बाहुल्यम्, षड्जो न्यासः, मध्यमधैवतगाधाराणामल्पत्वम्, तत्पञ्चमीजातेः समुत्पन्न कम्बलमित्युच्यते । तस्य कम्बलस्य स्वराणामल्पत्वेन बहुत्वेन च बहवो भेदा भरतादिभि. पूर्वाचार्यैरुदीरिताः, ते तत्तद्ग्रन्थेषु विलोकनीयाः । इह तु ग्रन्थविस्तरभयान्नोच्यन्त इत्यर्थः । कम्बलशब्दप्रवृत्तिनिमित्त कम्बलगानस्य फल च कथयति—प्रीत इति । यस्मात्कम्बलो नागो गीतवास्तस्मात्कम्बलगानमित्यभिधीयते । ईश्वरः प्रीयते । तत्प्रीत्या च सकलपुरुषार्थसिद्धि. फलम् ॥ ११—१३ ॥ इति कम्बललक्षणम् ॥

(क०) 'गायन्ब्रह्मोदितैः पदैः' इति कपालगाननियमे प्रसक्तान । ब्रह्मोदितपदानां स्वरूपं हुमादिस्तोभाक्षरसहितं तत्तत्कपालोक्तकलासख्यावि-

झण्टुं झण्टुं खट्वाङ्गधरम् ॥ १ ॥ दंष्ट्राकरालम् ॥ २ ॥ तडित्सदृशजिह्वम् ॥ ३ ॥ हौ हौ हौ हौ हौ हौ हौ हौ ॥ ४ ॥ वरसुरभिकुसुम ॥ ५ ॥ चर्चितगात्रम् ॥ ६ ॥ कपालहस्तम् ॥ ७ ॥ नमामि देवम् ॥ ८ ॥ इत्यार्षभीकपालपदानि ॥ २ ॥

